उदयनचरितम्

आदरणीय मधुकर द्विवेदी की सेवा में
सस्नेह
कृष्णकुमार
2.7.91

डा० कृष्णकुमार

प्राच्य विद्या अकादमी
देवप्रयाग (जिला टिहरी) उ० प्र०।


प्रकाशक—
प्राच्य विद्या अकादमी
देव प्रयाग (जिला टिहरी)
उत्तरप्रदेश ।

"Published with the financial assistance from the Ministry of Education and Social welfare, Government of India."

मूल्य : रु० ३०.०० Rs 30 00

प्रथम संस्करण—१९८१ © डा० कृष्णकुमार ।
उदयनचरितम्—डा० कृष्णकुमार ।

मुद्रक :
साहित्यकार प्रेस, मेरठ ।



कोसमग्रामोद्गतभूमिखननसंप्राप्तेयमतिप्राचीन—
मृण्मुद्रिका वत्सराजोदयनप्रणयकथासंसूचिका
वर्तते । उज्जयिनीतो निर्गत्य करिणीमारूढौ
वासवदत्तोदयनौ पलायमानाववलोक्येते
मुद्रिकायामस्याम् ।

(दिल्लीस्थराष्ट्रीयसंग्रहालयसौजन्येन)

प्राक्कथन

प्राचीनसंस्कृतकथासाहित्ये लोकनायकरूपेण परां प्रसिद्धिं गतं दरीदृश्यते बहुशोऽस्योदयनस्य नाम । बहुभिर्महाकविभिरयमुदयनः स्वकाव्येषु नाटकेषु च नायकरूपेण स्वीकृतः । महाकवेः कालिदासस्य समयेऽप्युदयनस्य प्रसिद्धिः लोककथानायकरूपेणासीदिति मेघदूतस्य पूर्वभागस्याध्ययनेन 'प्राप्यावन्ती-नुदयनकथाकोविदग्रामवृद्धानिति" श्लोकांशेन सिध्यति । उदयनं नायकं कृत्वा निबद्धानि कानिचित् प्रसिद्धानि काव्यान्यधोलिखितानि सन्ति—

१. गुणाढ्यस्य बृहत्कथा, तस्याश्च संस्कृतसंस्करणानि ।

२. भासकविविरचिते स्वप्नवासवदत्तं प्रतिज्ञायौगन्धरायणं चेति द्वे नाटके ।

३. श्रीहर्षविरचिते प्रियदर्शिका रत्नावली चेति द्वे नाटिके ।

४. अनङ्गहर्षविरचितं तापसवत्सराजं नाम नाटकम् ।

५. शक्तिभद्रकृतं वीणावासवदत्तं नाम नाटकम् ।

वत्सदेशाधीशरूपेणोदयनस्यैतिहासिकस्थितिः निश्चयरूपेणासीदिति न किञ्चिदपि मतवैभिन्न्यम् । परं महाकविरचनासु विविधकल्पनाप्रसङ्गेन तस्यै-तिहासिकव्यक्तित्वं कल्पनाभिः सह तथा सम्मिश्रितं यथार्थस्य यथा विश्लेषणम-तिदुरूहं सञ्जातम् । अन्यैश्च स्रोतोभिरुदयनेन सम्बन्धितमैतिहासिकमितिवृत्त॰

मपि तथाऽस्पष्टं विद्यते यथा यथार्थैतिहासिकघटनानां कविकल्पनाप्रसूतानां घटनानां च विश्लेषणमशक्यमेव प्रतीयते ।

प्राचीनेतिहासाध्ययनेन विज्ञायते यदुदयनो वत्सदेशाधीश्वर आसीत् । राजधानी च तस्य यमुनातटवर्तिनी कौशाम्बी । बौद्धसाहित्यानुसारेण यस्मिन् दिवसे भगवान् बुद्धोऽस्यां धरण्यामवतीर्णस्तस्यामेव तिथावुदयनमपि तस्य जननी प्रासूत । अनेन च वर्णनेन बुद्धोदयनयोः समकालिकत्वं प्रतिपाद्यते । समयोऽयं च ईसातः षष्ठशताब्दीपूर्वकः । तस्मिन् समये भारतवर्षे षोडशमहाजनपदाः प्रसिद्धा आसन् अङ्ग-मगध-काशी-कोशल-वज्जी- मल्ल-चेदि-वत्स-कुरु-पाञ्चाल-मत्स्य-शूरसेन-अश्मक-अवन्ती-गान्धार-काम्बोजाः ।

षोडशमहाजनपदेष्वेषु केचन राजतन्त्रशासनान्तर्गता अन्ये केचन प्रजातन्त्रशासनगतगणशासनगताश्चासन् । राजतन्त्रेषु वत्सावन्तिमगधकोशला अधिकशक्तिशालिनः सम्बभूवुः । क्रमशश्च तेषां राज्यानां राजधान्यः कौशाम्बी-उज्जयिनी-राजगृह-साकेतनाम्न्यः नगर्यः । एवं च वत्साधीश्वरस्योदयनस्य राजधानी कौशाम्बी तस्मिन् काले धनधान्यसम्भृता राजनीतिकशक्तिसम्पन्ना च परां प्रसिद्धिं प्राप्ता ।

इतिहासविदः प्रमाणयन्ति पाण्डववंशीय एवासीदयमुदयनो नाम लोकनायकः । कुरुजनपदाधीश्वराणां पाण्डववंशीयानां नरपतीनां राजधानी हस्तिनापुर इत्येवासीत् । जनपदस्यास्य सीमानश्च पूर्वस्यां दिशि गंगायमुनयोः सङ्गमादारभ्य पश्चिमस्यां दिशि यमुनामप्युल्लंघ्य कुरुक्षेत्रपर्यन्तं, उत्तरस्यां दिशि हिमालयादारभ्य दक्षिणस्यां दिशि यमुनामुत्तीर्य दशार्णदेशपर्यन्तं विस्तीर्णा आसन् ।

महापराक्रमशालिभिर्नृपतिभिरपि शासितमेतद्राज्यं प्रकृतिकोपनिहतं सन्महान्तं विनाशमधिजगाम । प्रथमं तावत् टिट्टिभानां प्रकोपेण सवलानि

धान्यानि क्षेत्रेष्वेव विनाशं प्राप्तानि। तदनन्तरं भगवती माता गङ्गाऽपि प्रकुपिता। तस्याश्च महोघैः प्रलयकालिकं दृश्यं समजायत। महोघेन चैतेन कुरुकुलराजधानीरूपं हस्तिनापुरं महाप्रवाहेण प्रवाहितम्। पाण्डववंशीयाश्चैते नृपतयो बाध्याः बभूवुः नगरादेतस्मान्निर्गमनाय। प्रवासमापन्नास्तु वत्सभूमिं गत्वा तत्र यमुनायाः दक्षिणतटे कोशाम्बीं राजधानीं कृत्वा न्यवसन्। अधुनापि गङ्गायमुनयोः सङ्गमात् प्रयागराजाद् विंशतिक्रोश—(३० मील) मार्गमुल्लंघ्य यमुनायाः दक्षिणे तीरे कोसमाभिधेयो ग्रामो विद्यते। इतिहासविदः प्रमाणयन्ति ग्रामोऽयमेव कौशाम्बी नाम्नी राजधान्यासीत् पूर्वकाले। पुरातत्वविदां प्रयासैस्तत्र प्राचीनराजधान्याः बहवोऽवशेषाणि वस्तुजातानि समुपलब्धानि सन्ति।

प्राचीनसाहित्ये नरपतिनाऽनेनोदयनेन सहानेका अनुश्रुतयो दन्तकथाश्च सम्बद्धाः। प्रतिपाद्यते चैताभिश्चास्योदयनस्य लोकानुरञ्जनत्वं, प्रतापशालित्वं, नीतिनिपुणत्वं, विलासप्रियत्वं चापि। भारतवर्षस्यास्यानेकान् प्रदेशान् विजित्य तेन स्थापितं चक्रवर्तिविशेषणविभूषितं राज्यम्। प्रधानमन्त्री चास्य यौगन्धरायणो महान् कूटनीतिनिपुणः स्वामिभक्तिपरायणश्चासीत्। उदयनस्य पराक्रमेण सहास्य कूटनीतिरपि साम्राज्यस्थापने प्रधानकारणम्। आवन्तिकराज्येन मागधराज्येन च वैवाहिकसम्बन्धं संस्थाप्य तेन तयोः जनपदयोर्विरोधः प्रशान्ततां नीतः। तदनन्तरं कोशलराज्यं काशीराज्यं च कूटनीतिसहायप्रबलीभूते सम्मुखयुद्धे विजित्योदयनस्य चक्रवर्तित्वमार्गस्तेन प्रशस्तां नीतः।

प्रसिद्धैषा किंवदन्ती भारतीयलोकसाहित्ये, उज्जयिन्या अवन्तिराजः प्रद्योतश्चण्डमहासेननाम्नाऽपि प्रसिद्धश्चक्रवर्तित्वमधिजिगमिषुरुदयनेन सह प्रतिद्वन्द्विभावं प्रपन्नोऽपि, महच्छक्तिसम्पन्नोऽपि न साहसं चक्रे तेन सह सम्मुखसमरयोजनाय। कूटनीतिरेवाश्रिता तेन। द्वयोरेव राज्ययोः सीमावर्तिनि वनैकदेशे तेन रक्षितो विशालकाय एको हस्ती काष्ठनिर्मितः। तस्यान्तश्चानेके सैनिकाः सुशक्तिसम्पन्ना आयुधहस्ताः गुप्तरूपेण निधापिताः। हस्तिविद्यासुनिपुणोऽय-

मुदयनः स्ववीणावादनकौशलेनैव हस्तिनां ग्रहणे सुशिक्षणे च तथा व्यसनितां गतो यथा हस्तिग्रहणप्रलोभनवशीभूतः प्रद्योतस्य नीतिपाशान्तर्गतो निगृहीतः ।

सेनापतिनिदेशेन रज्जुभिर्बद्धस्स उदयन उज्जयन्यामानीतः । प्रद्योतेन प्रस्तुतं यद्युदयनस्तस्मै हस्तिविद्यां प्रदास्यति, तदैव स मोक्षं प्राप्स्यति । शिष्य-भावं स्वीकृत्य करयुगलं संयोज्योदयनसमीपं गतः प्रद्योतो हस्तिविद्यां प्राप्स्यतीत्युदयनेन प्रत्युत्तरः प्रेषितः । परन्तु दृढाहङ्कारपरिगतेन प्रद्योतेन न स्वीकृतं तादृशं विनयभावोपपन्नं प्रणामकरणमुदयनं प्रति । अन्यः कश्चिदपि राजकुलपरिगतो जनस्तादृशं विनयभावं स्वीकुर्वन् हस्तिविद्याधिकारी भविष्य-तीति तेनोदयनेन प्रस्तावः प्रेषितः ।

प्रद्योतेन नियुक्ता स्वकीया पुत्री वासवदत्ता वीणावादनशिक्षामाध्यमेन हस्तिविद्याग्रहणाय । नेपथ्यान्तर्निहिता सा उदयनाय प्रणमन्ती शिष्यभावोपपन्ना हस्तिविद्यां ग्रहीष्यति । परं तत्रान्यैव मधुरा परिणतिः सञ्जाता । उदयनस्य यौवनसौन्दर्यौदार्यादिभिर्गुणैर्मोहिता सा वासवदत्ता तं पतिरूपेण स्वीकृतवती । यौगन्धरायणसाहाय्येन प्रद्योतकारागारं भित्वा वत्सदेशं प्रति निर्गच्छतोदयनेन सह वासवदत्ताऽपि निर्गता । उदयनस्तां पट्टमहिषीरूपेण स्वान्तःपुरगतां चकार ।

कथासरित्सागरस्य कथा कामपि भिन्नतां प्रदर्शयति । अवन्तिदेशाधीशस्य प्रद्योतस्य महतीयमासीदभिलाषा, यदुदयनस्तस्य दुहितरं वासवदत्तामुद्वाह्य जामाता भवेत् । परमेतस्या अभिलाषायाः प्रार्थनारूपेणोदयनसमक्षं प्रस्तुतीकरणं स्वभावविरुद्धमेवासीत्तस्य चण्डप्रद्योतस्य । हस्तिनश्छलेन स उदयनं निगृहीत-वान्, स्वकीयप्रासादान्तर्गते च कारागारे शृंखलाभिर्निबद्धवान् । तदनन्तरं तेन वासवदत्तासंगीतशिक्षकरूपेण नियुक्त उदयनः । तत्र जनकस्याभिलाषां जानती वासवदत्तोदयनस्य यौवनादिभिर्गुणैर्वशीभूता च प्रणयपाशनिबद्धा सञ्जाता ।

कूटनीतिनिपुणमन्त्रिसाहाय्येन कारागारं भित्वा निर्गच्छतोदयनेन स्वकीय-प्रणयिनी वासवदत्ताऽपि कौशाम्बीमानीता । चण्डप्रद्योतोऽप्युदयनं जामातृरूपेण स्वीचकार ।

उदयनसम्बन्धिन्येषा किंवदन्ती विक्रमादित्यनवरत्नेष्वेकतमेन महाकविना कालिदासेनापि स्वकीयासु रचनास्वभिव्यज्यते । ईसातः पूर्वं प्रथमशताब्दी-समग्रसम्भवः स उदयनोत्तरं पञ्चशतवर्षसमयमनुजातः । तस्मिन् काले तादृश्यो दन्तकथा अवन्तिप्रदेशग्रामेष्वपि वृद्धैर्गीयन्ते स्म । मेघदूताभिधेयस्य गीतिकाव्यस्य "प्राप्यावन्तीरुदयनकथाकोविदग्रामवृद्धानिति" पंक्तिरियं प्रमाणीकरोति चोदयन-वासवदत्तयोः परस्परप्रीतिबन्धनकथाप्रसिद्धिम् ।

परमुदयनस्य विलासिभावोपपन्नं कामुकत्वं न प्रशान्ततां गतं परमलावण्य-वतीं यौवनाढ्यां वासवदत्तामपि प्राप्य । उदयनसम्बन्धिप्राचीनकाव्यानां कथाप्रसङ्गाः व्यञ्जयन्ति तस्यानेकनायिकाप्रणयिभावम् । पद्मावती-प्रियदर्शिका-रत्नावल्यादयो बह्व्यः प्रणयिन्यस्तस्य विलासभावं वर्धयन्त्यः संदृश्यन्ते । परं कविभिः स्वनायकस्य गौरवं रक्षद्भिस्तेषु प्रणयभावेषु कूटनीतिगर्भत्वं प्रदर्शयद्भिरौचित्यमेवाभिव्यञ्जितम् । कथासरित्सागरमहाप्रबन्धकाव्ये तक्ष-शिलाप्रदेशराजकन्याऽपि तमुदयनं प्रणयभावेन कांक्षन्ती कौशाम्बीमायाता, समुप-लभ्यते कथेत्यपि । परं न सोदयनेनोद्वाहिता ।

उदयनसम्बन्धिनीनां कथानां मूलस्रोतोभूता बृहत्कथा न कुत्रापि लभ्यते वर्तमानसमये । परं तस्याः संस्कृतसंस्करणैः कथासरित्सागरादिभिरुदयनविष-यकवृत्तान्ता ज्ञायन्ते । तेषु काव्येषु प्रकटीकृतान्युदयनचरितानि तं वैदिकसनातन-धर्मानुयायिनं प्रतिपादयन्ति । नास्ति तत्र कोऽपि बौद्धप्रभावः । परं बौद्ध-साहित्याध्ययनेनोदयनो बुद्धप्रभाववशीभूतोऽवभासते । भगवता बुद्धेन स्वल्प-समयावधिं यावत् कौशाम्ब्यां निवासो विहितः । परमुपेक्षितः स उदयनेन प्रथमम् ।

किञ्चित्कालानन्तरं बुद्धशिष्यस्य पिण्डोलस्य प्रभाववशीभूतेन तेनोदयनेन स्वीकृतं बुद्धस्य शिष्यभावमिति ।

उदयनस्योत्तराधिकारिणां परिचयो न लभ्यते। प्राचीनसाहित्येन न निश्चयरूपेण विज्ञातुं शक्यते यत् कस्मिन् काले स कथं निर्वाणत्वमुपगतः, के वा तस्योत्तराधिकारिण आसन्, कथं वा वत्सदेशस्य कौशाम्ब्याश्च पुरातन-गौरवं विनष्टतामुपजगाम । अनुमीयते प्राचीनेतिहासवृत्तवर्णनैर्यदुत्तराधिकारिण उदयनस्यातिदुर्बलाः सन्तः नापारयन् वत्सदेशगौरवरक्षणाय। उदयनानन्तरं वत्सदेशस्य स्वतन्त्रराज्यरूपेणास्तित्वं विश्रान्ततां गतम् । सम्भवतोऽवन्तिदेशाधि-पस्य चण्डप्रद्योतस्य पुत्रः कौशाम्बीं विजित्य वत्सदेशं स्वाधिकारवशवर्तिनं चकार। बौद्धसाहित्ये बोधिनामकस्योदयनपुत्रस्य विवरणं लभ्यते, परं स राजसिंहासनमधिचक्रे न वेति न ज्ञायते। एकस्यां जातककथायां वर्णनमिदं लभ्यते यदुदयनपुत्रो बोधिर्न्यवसत् कञ्चित्समयं यावत् संशुमारगिरौ, सम्भवतः वत्सदेशराज्यान्तर्वर्तिन्यां भूमौ ।

कथासरित्सागरकथावर्णनानुसारं नरवाहनदत्तनामानं सुतमजीजनदुदयनो वासवदत्तायामवन्तिदेशराजकन्यायाम् । उदयनः स्वजीवनकाल एव नरवाहनदत्तं यौवराज्यपदाभिषेकसिञ्जितं चक्रे। नरवाहनदत्तसम्बन्धिन्योऽनेकाः दन्तकथाः बृहत्कथासम्बन्धितेषु कथासरित्सागरादिषु प्राचीनेषु काव्येषु समुपलभ्यन्ते। परन्तु नैतासां कथानां किञ्चिदपि प्रामाणिकत्वमैतिहासिकरूपेण । कल्पनाप्रसूतास्ताः प्रायशो दृश्यन्ते कथाः, पौराणिककल्पनाश्च तासु दरीदृश्यन्ते। बृहत्कथाभिन्न-साहित्ये न समुपलभ्यते नरवाहनदत्तीयं किमपि वर्णनम्। नरवाहनदत्तविषये प्राचीनमन्यसाहित्यं मौनमेवावलम्ब्य तिष्ठन्न तस्य कमपि परिचयं ददाति ।

प्रस्तुते गद्यकाव्ये वत्सराज उदयनो नायकरूपेण निबन्धितस्तस्य च जीवन-कथा क्रमबद्धरूपेण निबध्यमाना सहृदयमनोरञ्जनाय प्रस्तुता। उदयनसम्बन्धि

प्राचीनकाव्यादिसाहित्यसमुदयमवलम्ब्य कथासरित्सागरप्रतिज्ञायौगन्धरायण-स्वप्नवासवदत्तप्रियदर्शिकारत्नावलीतापसवत्सराजवीणावासवदत्तादीनि काव्यानि च सम्यगधीत्य कथानकानां तेषां समन्वयं कृत्वाऽस्य गद्यकाव्यस्य विन्यासो विहितः। विविधकाव्यकथानकसंयोजने समन्वये च कल्पनाश्चापि बह्व्यः समाश्रिताः। वत्सराजेन सह प्रियदर्शिकाप्रणयविलासाः काव्येऽस्मिन् विदर्भराज्य-प्रासादे विलसन्ति, परं प्रियदर्शिकायां नाटिकायां कौशाम्बीराज्यप्रासाद एवोद-यनस्य विलासस्थली प्रियदर्शिकाविलासानाम्। रत्नावलिनाटिकाघटनाननुरूपं सिंहलनरेशः स्वयं स्वकीयां सुतां रत्नावलीं सिंहलद्वीपसम्प्राप्तायोदयनाय प्रस्तौति समर्पयति च। एवं च विविधेषु स्थलेषु विविधाः कल्पनाः घटनाचक्रं संयोज-यन्त्यः कथानकं योजनाबद्धरूपेण संयोजयन्ति।

कथानकस्य चरमपरिणतिरपि कल्पनाप्रसूतैव च। प्राचीनसाहित्यं न कथमपि कुत्रापि प्रज्ञापयति यत् कौशाम्बीराजसिंहासनमुदयनेन कथं परित्यक्तं, कथं वा तस्योत्तराधिकारिणश्च तदधिचक्रुः। एकेन वृत्तान्तेनानुमीयते यदुदयनो वृद्धावस्थायां कालिञ्जरगिरिं गतः स्वर्गारोहणाय राजसिंहासनं परित्यज्य। स्वकीयं शरीरं पर्वतशिखरान्निपात्य शिलायां स देहोत्सर्गमकरोत्। परं नैतद् विश्वसनीयं प्रतिभाति। पाण्डववंशीयानां महीपतीनां प्राचीना वैदिकी परम्परैषा दरीदृश्यते यदेते वृद्धतामुपगताः स्वोत्तराधिकारिभ्यः राज्यधुरं समर्प्य वानप्रस्थधर्ममङ्गीकृत्य तपोवनमनुप्राप्ताः मुनिवृत्तयस्तपोधर्मरताः भवन्ति स्म। गद्यकाव्येऽस्मिन्नुदयनसम्बन्धिनी परम्परैषा परिपालिता कथानकपरिणतिरूपेण स्वसुतं नरवाहनदत्तं राजसिंहासनारूढं कृत्वा तीर्थपुण्यजलैः सार्द्धं स्वाश्रुभिरपि तं निषिच्योदयनः राज्ञीभिः मन्त्रिभिरपि सार्द्धं वानप्रस्थव्रतं परिपालयन् तपोवनं प्रति प्रातिष्ठत्।

लब्धवयं प्रयासो लेखकस्यास्यातिनिर्बलबुद्धेरुदयनसम्बन्धिनं कथानकं क्रम-बद्धसमन्वितरूपेण निबध्य प्राचीनकाव्यसाहित्यमनुरुध्य बुद्धिविलासविहित-

गीर्वाणां सहृदयानां समक्षं तत्प्रस्तुतीकरणस्य। गद्यकाव्यमिदं साहित्यस्य कां विधां धत्ते, इति समालोचका एव निर्णेष्यन्ति। सम्यगध्ययनेन समालोचनेन चास्य काव्यस्य सहृदयाः पाठकाः प्राचीनकथानां मनोरञ्जनीं न केवलं सामग्रीं समधिगच्छन्तु, परं प्राचीनेतिहाससंस्कृतिसम्बन्धिनीं सामग्रीमपि विजानन्तु, प्रयास इति सम्यग्रूपेण विहितः।

सहृदया यदि स्वल्पमपि मनोरञ्जनं सन्तोषं वा गद्यकाव्यमेतदास्वाद्य लभेरन् स एव सुमहान् पुरस्कारोऽस्य विनयावनतस्य लेखकस्य।

विदुषां वशंवदः

कृष्णकुमारः

उदयनचरितम्

प्रथमो विरामः

प्रथमो खण्डः—पूर्वो वृत्तान्तः

विश्वम्भराभरणभूतस्यास्य भारतवर्षस्य नायकमणिरिव स्थितो वत्सदेशो महासमृद्धिशाली। हृदयमिवासौ भवति महामहिमशाली सकलभूमण्डलस्य। सकलभुवनभरणकर्तुः भगवतो भास्करस्य दुहितृभूता भगवती कालिन्दी स्वयमेवैनं देशं पीयूषभरीभिर्लहरीभिः सिञ्चन्ती धनधान्यसमृद्धं विदधाति। जगद्वन्दनीया कौशाम्बी राजधानी चास्य सकलजनानुरञ्जनी।

पञ्चशताधिकद्विसहस्रवर्षपूर्वस्मिन् काले नगरीयं प्रधानीभूता सकलधरणीमण्डलनगरीणाम्। प्रमुखं च केन्द्रमासीदियं वीरतायाः, विद्यायाः, राजनीतेर्वाणिज्यस्य च। प्रसृता यशःसुरभिः दशसु दिक्षु वत्सदेशाधीश्वराणां वीरतायाः, राजनीतिनिपुणतायाः प्रजावत्सलतायाश्च। वत्सदेशसेनासु सुभटरूपेण प्रवेश एव प्रमाणपत्रं वीरतायाः। कौशाम्बीवर्तिषु विद्याकेन्द्रेष्वध्ययनमेव स्नातकोपाध्यलब्धिभाजनत्वं च विदुषां परं सम्माननीयमासीत् सकलभुवनतले। सकलधरणीतलवर्तिव्यापारकेन्द्रेभ्यः सार्थवाहाः समागत्य स्वकीयानि विक्रेयवस्तून्यादायास्यां नगर्यां वाणिज्यमाध्यमेनास्याः परां समृद्धिं वर्द्धयन्ति स्म।

तस्मिन्नेव काले शतानीको नाम राजा बभूव तत्र पाण्डववंशावतंसः।

जनमेजयस्य पुत्रः, परीक्षितस्य पौत्रः, अर्जुनपुत्राभिमन्योश्च प्रपौत्रः स शतानीकः महाप्रतापी भूत्वा सकलभुवनतलं प्रशासन्नासीत् । भुजदण्डयुगलस्यास्य पराक्रमोऽवनिमण्डले प्रथितः । देवानां सम्राडिन्द्रोऽप्यस्य साहाय्यं ययाचेऽसुरैः सह समरोत्सवेषु । सकलसुखसमृद्धिसमेधितोऽपि स कथमपि पुत्ररत्नलालनानन्दं नाससाद । पुन्नामनरकपतनभयात्तस्य हृदयं सर्वदैव दूयमानं बभूव ।

एकस्मिन्नवसरे राजसभायां सिंहासनारूढेन कुतूहलादिकवार्ताभिः मनोविनोदकरीभिः समयं यापयमानेन शतानीकेन मन्त्रिणां समक्षं स्वमनोगतभावः प्रकटितो हृदयनिपीडनकरः । तेन कथितम्—

"सर्वाण्येव सुखान्यनुभवन्नपि सकलविलासैः विलसन्नपि सकलसमृद्धिसंयुतोऽप्यहं पुत्राभावरूपेणैकेन दुःखेन सदैव दूयमानो भवामि । कः प्रशास्यति राज्यमिदं परलोकगते मयि ? कः मे पितृपिण्डं प्रदास्यति ? एताभिश्चिन्ताभिश्चाकुलीभूतोऽहं न कदाचिदपि सुखं शान्तिं वासादयामि । भवन्त एव निवेदयन्तु कमप्युपायं यथाऽहमस्य दुःखार्णवस्य परं पारं गन्तुं शक्नुयाम् ।"

शतानीकस्य वत्सराजस्य मानसिकव्यथाभरभरितहृदयेन वृद्धेन मन्त्रिणैकेन प्रत्युदतरितम्—

"देव ! धर्मशास्त्रेषु विहितः पुत्रेष्टियज्ञः पुत्रप्राप्त्यै । राजा दशरथः पुत्रेष्टियज्ञं सम्पाद्य चत्वारः पुत्रान् सकलगुणगणान्वितान् प्राप । भवानपि पुत्रेष्टियज्ञं विदधातु । एवं च पुत्रलालनसुखमनुभवतु ।"

वृद्धमन्त्रिणोऽस्य परामर्शः शतानीकस्य हृदयायातितरां रुरुचे । तथा कर्तुं स निश्चयं चकार । तस्मिन् समये शाण्डिल्यो नाम मुनिः धार्मिककर्मकाण्डेषु परं प्रावीण्यं गत इति परा प्रसिद्धिः । प्रार्थितः स शतानीकेन पुत्रेष्टियज्ञसम्पादनाय ।

राज्ञोऽनुरोधं सम्मान्य शाण्डिल्यः शास्त्रोक्तेन विधिना पुत्रेष्टियज्ञयजनस्य व्यवस्थामकरोत् पूर्णतां गते च तस्मिन् पुत्रेष्टियज्ञे पट्टमहिषी राज्ञः शतानीकस्य यज्ञशेषरूपं प्रसादं जग्राह । कतिपयेष्वेव दिवसेषु च प्रजाभिः सहैव राज्ञोऽप्यानन्दवर्धनं गर्भं बभार राज्ञी, यथासमये च शुभमुहूर्ते ह्युदीयमानतपन-तेजोदीप्यमानं कुमारमसूत ।

पुत्रोत्सवानन्दनिर्भरः शतानीकः ब्राह्मणेभ्यो याचकेभ्यश्च सकलमेव राजकोषं प्रददौ । अनेकदिवसं यावत् प्रमोदमानमानसाः प्रजाजनाः कौशाम्बीराजमार्गेषु वीथिषु च चर्चर्यादिकनृत्यगीतवाद्यनिरता आनन्दोत्सवमनुबभूवुः । सांवत्सरिकैर्गणिते शुभे एकादशदिवसे स पुत्रं नामकरणसंस्कारविधिना सहस्रानीकनाम्ना सुशोभितं चकार । सम्प्राप्ते च तस्मिन् बालके पञ्चमे वर्षे तस्य शिक्षायाः सुप्रबन्धो विहितः । वेदवेदाङ्गादिषु सकलास्वेवाष्टादशसुविद्यासु, धर्मशास्त्रेषु, पुराणादिषु, दण्डनीत्यामिति सकलशस्त्रशास्त्रादिषु चतुःषष्टिकलासु च परं प्रावीण्यमागतः राजपरिवारस्य मन्त्रिणां प्रजानां च परमं प्रमोदं वर्धयन् महनीय-यौवनसम्पन्नः संबभूव स कतिपयैरेव वत्सरैः सहस्रानीकः । शुभमुहूर्तं संशोध्य पित्रा स स्वपुत्रः ससमारोहं यौवराज्यपदेऽभिषिक्तः । शनैः-शनैः सकलमेव राज्यप्रशासनधुरं सहस्रानीकाय समर्प्य स शतानीकः स्वकीयं हृदयं सकलाभ्य एव प्रशासनचिन्ताभ्यो निर्मुक्तं चकार ।

एकस्मिन्नवसरे यमदंष्ट्राभिधेयोऽसुराधिपतिः महतीं सेनां संयोज्यासंख्य-सुभटान्वितां स्वर्गमाचक्राम । सुमहद्बलशालिनं समरशौण्डमसुराधिपतिमवलोक्य सर्वविजयिनं भयविह्वलमानसः स्वराज्यसंरक्षणेऽसमर्थः सन् नाकाधिपतिः सुहृदः शतानीकस्य साहाय्यमैच्छत् । आमन्त्रयितुं तं पराक्रमशालिनं मित्रं शतानीकं स मातलिं प्रेषयामास पृथिव्यां रथाधिष्ठितम् । इन्द्रस्य हृदय-निर्विशेषस्य संदेशमधिगम्य युद्धोत्सुकः स शतानीकः सकलामेव प्रसासनधुरं पूर्वमपि तस्मिन् सन्निहितं पुनरपि संस्थाप्य युगन्धरं प्रधानमन्त्रिपदे सुप्रतीकं च

प्रधानसेनापतिपदे नियुज्य प्रजापालनभारचिन्तया निर्मुक्तो मातलिना सह रथमारुह्य स्वर्गलोकाय प्रस्थितः ।

स्वर्गलोकाधिपतिना देवराजेन्द्रेण प्रधानसेनापतिपदेन विभूषितः शतानीकः यमदंष्ट्रमसुराधिपतिं समरोत्सवायामन्त्रयामास घनघोरयुद्धं च बभूव द्वयोरपि सुरासुरसेनयोः परस्परबद्धवैरयोः । सकलत्रैलोक्यवीराश्चर्यकरणभूते तस्मिन् संगरे सकलामपि तां शौर्यमदमदान्वितामसुरसेनां निहत्यापि स शतानीकः यमदंष्ट्रेण सह युद्धं कुर्वन् तमपि जघान । परं स्वयमपि रिपुशरवर्षेण तथा क्षतविक्षतो बभूव यथा नाकाधिपतिहर्षेण सहैव युद्धभूमौ पपात स्वप्राणांश्च मुमोच । अथ महता दुःखेन स्तब्धीभूता देवसेना दुर्वहशोकभरविह्वला नयननिपतितैरश्रुजलैः पृथिवीमभिसिषेच ।

समरविजयिनः परमवीरस्य सुहृदः शतानीकस्य तादृशेन प्राणहारिणा निपतनेन परमावसादावसन्नोऽपि स सुराधिपतिः कथमपि हृदयं दधार । अन्त्येष्टिसंस्काराय स शतानीकपार्थिवशरीरं देवसेनासंरक्षायां कौशाम्ब्यामेव प्रेषितवान् । प्रजापालकस्य शतानीकस्य सकललोकरञ्जकस्यानेन हृदयविदारकनिधनसमाचारेण सकलोऽपि वत्सदेशः दुःखार्णवे निमग्नः । प्रियवियोगानलापेक्षया चितावह्निमेव शान्तिप्रदायिनमवकलय्य पतिव्रता महिषी सहस्रानीकजननी पत्युः पार्थिवशरीरेण सहैवात्मानमपि तस्मिन् भस्मावशेषतां प्रापयामास ।

प्रजाजनरञ्जनसम्भारेण सहैव परलोकं गते राजनि शतानीके राज्यसभा सहस्रानीकं राजसिंहासनारोहणायानुरुरोध । पितृवियोगव्याकुलितहृदयः सहस्रानीको न शशाक साहसमेनं कर्तुम् । परं लोकरक्षणभारोऽवश्यंभावीति मनसि कृत्वा मन्त्रिणां राज्यसभायाश्चानुरोधं निष्फलीकर्तुं नोत्सेहे ।

अस्मिन् समयेऽविवाहित एवासीत् स सुमनोहरानन्ददायियौवनसंभूषितोऽपि ।

बभूव तस्यैका सहचारिणी राज्यलक्ष्मीः भूभारभर्तुः, परं लोकधर्मरक्षिणी धर्मपत्नी सुयोग्यगुणसम्पन्ना न राजकुलशोभां वर्धयामास। विलासभराक्रान्त-हृदये तारुण्ये वर्तमानो मनोऽनुकूलां प्रेयसीं भार्यां विना न तस्य हृदयं कथमपि सुखं वा सन्तोषं वा प्राप्नोति स्म। अनिर्वचनीया व्यथैका सर्वदैव तस्य हृदयं विह्वलं कुर्वन्त्यासीत्।

किञ्चित्कालानन्तरं नाकाधिपतिना देवनायकेनेन्द्रेण समरविजयोत्सवस्या-योजनममरावत्यां विहितम्। आमन्त्रितश्च तस्मिन्नुत्सवे तेन स्वमित्रपुत्रः सहस्रानीकः। सारथिना मातलिना वाह्यमानमिन्द्ररथमारूढः स युवा राजा हार्दिकस्वागतमिन्द्रस्य सकलानामपि देवानां च लेभे। दीर्घकालपर्यन्तं तत्र तिष्ठन् स नाकलोकसुलभान् हृदयप्रीतिकरान् दिव्यान् भोगान् अधिजगाम। दुर्लभभोगपदार्थानामुपभोगं भुञ्जन् स एकदा नन्दनवनविहारानन्दमपीन्द्रिय-विषयगतं चक्रे। परं तत्र स्वर्गस्थानीयाः देवाः स्वप्रियाभिः सहैव यदा विहरन्ति, तांस्तथावलोकयन् स योग्यसहचरीसाहचर्यमाकांक्षन् सदैवान्यमनस्कः सन् विह्वलतामनिर्वचनीयामवाप।

सहस्रानीकस्य मनोगतभावानधिगम्यैकदा नाकाधिपतिना विहस्य कथितम्–

"वत्स! न किमपि दुःखकारणं विद्यतेऽधुना ते विह्वलीभवने। सद्य एव ते मनसः कामनां पूरयिष्यति भगवांच्छिवः। धरण्यामवतीर्णा ते प्रिया धर्मपत्नी मनोविनोदनैकहेतुः। सा च साकेतपरिपालकस्य भुवः भर्तुः कृतवर्मणो दुहिता मृगावती रूपेण, सौम्यभावेन, विनयेन अन्येन च सकलललनाललामगुणगणेन च सर्वथा ते योग्या।"

पीयूषसमुदयसम्भृतानि वचनान्येतानीन्द्रस्याकर्ण्य प्रेयसीसमागमचिन्ताकु-लितहृदयः सहस्रानीकः पूर्वतोऽप्यधिकं मनसि चिन्ताव्याकुलताभारमुवाह। कथमहं तया सह विलसितुं पारयामीति स इन्द्रादनेकानुपहारान् स्वर्गीयान्

संप्राप्य पितृमित्रेण विसृष्टः मातल्यधिष्ठितमिन्द्ररथमारुह्य कौशाम्बी प्रस्थितः ।

स्वर्गनिवासकाले सहस्रानीकस्य समक्षं तद्रूपगुणविमोहिता तिलोत्तमा नाम्न्यैकाप्सरःश्रेष्ठा सौन्दर्यसारसरसा कामविलासिनी वसन्तमदविह्वला स्वकीयां हृदयनिहितयौवनविलासकामनां प्रणयनिवेदनरूपेण प्रकटयाञ्चकार । परं मृगावत्यामासक्तचित्तात् सहस्रानीकात् कामपि प्रतिक्रियामाकर्षणरूपिणीमलभमाना सा नितान्तमपमानं मनोगतमनुबभूव । हृदयविदारिण्या लज्जया कोपेन चाकुलिता सा तिलोत्तमा प्रणयास्पदमपि तं सहस्रानीकं दारुणेन शापेनेत्थं शशाप—

"यस्यां प्रियायामासक्तचित्तस्त्वं देवैरपि कांक्षणीयायाः स्वर्गीयसौन्दर्यभूयायाः मम तिलोत्तमाया अवहेलनां करोषि तस्यास्त्वं चतुर्दशवर्षपर्यन्तं विरहजनितदुःखं निश्चयेन प्राप्स्यसि ।"

परं मृगावतीध्यानासक्तमानसेन सहस्रानीकेन न श्रुतस्तस्याः स दारुणस्तिलोत्तमायाः शापः । अथ च श्रुतवतापि मातलिना न प्रकटीकृतं रहस्यमेतत् कदाचिद् राजा ततोऽपि परं शोकमधिगमिष्यति । कतिपयैरेव क्षणैरिन्द्ररथः कौशाम्बीं प्रपेदे ।

स्वकीयां राजधानीं प्रपद्य प्रजापालनभारवहनव्रतं च स्वीकृत्य सम्यग्रूपेण सुशासनं संस्थाप्य सहस्रानीकेन देवेन्द्रेण प्रकटीकृतो मृगावतीवृत्तान्तो युगन्धरादिमन्त्रिणां समक्षं कथितः । मन्त्रिणश्च मृगावतीं साकेतराजकन्यां प्रति राज्ञः समुत्सुकतां प्रगाढासक्तिं च निरूप्य, नात्र विलम्बः समुचित इति विचारयामासुः । स्वयमेवायोध्यां गत्वा युगन्धरः साकेताधीशस्य कृतवर्मणः समक्ष

मृगावतीसहस्रानीकयोः परस्परमिलनभावं लोकरीतिसमुचितं देवराजेन चानुमतमिति प्रस्तुतवान् ।

अथ च प्राणभूता दुहितानुपमगुणशालिनं वरमनायासमेव लभत इति मत्वा सुप्रसन्नो राजा सकलं वृत्तान्तं महिष्यै निवेदितवान् । मृगावतीजनन्यपि प्रहृष्टा सती सहस्रानीकमसाधारणगुणसम्पन्नमनुमोदितवती स्वजामातृरूपेण । ततश्च सांवत्सरिकैः संशोधिते शुभमुहूर्ते कृतवर्मा समर्पयामास मृगावत्याः स्वदुहितुः पाणिं सहस्रानीकाय । पतिगृहगमनकाले च तस्याः जामात्रे स यौतुकरूपेण सहस्रशो हस्त्यश्वरत्नसुवर्णादिसामाग्र्यः दासदासीसमूहं च ददौ । कौशाम्बीं निवर्त्य सहस्रानीकः रूपगुणगणान्वितया हृदयबल्लभया साकं मनोगतविलासान् विलसन्नपि गृहस्थधर्मपालनेन सहैव प्रजानामपि पालनं चकार ।

स्वल्पसमयावधिरेव व्यतीतः । सहस्रानीकस्य मन्त्रिणां जायाः सुतान् जनयामासुः । प्रधानमन्त्रिणो युगन्धरस्य पुत्रो यौगन्धरायणो बभूव । प्रधानसेनानायकस्य सुप्रतीकस्य गेहे रुमण्वान् संजातः । नर्मसचिवस्य विदूषकस्य गृहिण्यपि वसन्तकनामानं पुत्रं प्रसूतवती । अथ सहस्रानीकबल्लभा मृगावत्यपि भुवनभारवहनसामर्थ्यशालिनं गर्भं बभार ।

गर्भभाराक्रान्ता सा राजमहिषी विचित्राभिः दोहदरूपिणीभिरभिलाषाभिः समाक्रान्ता बभूव । एकस्मिन् दिवसे सा राजानं निवेदयामास—

"आर्यपुत्र ! बलवती मे मनसोऽभिलाषा शोणितसंभृतायां वाप्यां स्नातुं क्रीडितुं च । यदि च न पूरितं भवति मे मनोगतं, मरणमेव मे निश्चितं जानीहि ।"

धर्माभिरुचिसमन्वितो राजा स सहस्रानीको नितरामतप्यत व्यथाविह्वली-

भूतोऽनया प्रियाभिलाषया । तस्य भुवनपालनकर्तुः धर्मपत्न्याः मनसि गतं तन्महदनुचितमेवासीत् । धर्मविरुद्धा लोकविरुद्धा च तस्य अभिलाषा अवर्तत । परं प्रियेण पुनः पुनरप्यनुरुध्यमानोपदिश्यमाना च सा स्वाभिलाषापूर्त्यै साग्रहा समवर्तत, मरणनिश्चयमेव चोदाहरत् । निरुपायो राजा मन्त्रिभिः सह परामर्श्य युगन्धरादिभिः रक्तमणिनिबद्धामेकां वापीं निर्मातुमादिदेश । सा च वापी लाक्षारसादिभिः रक्तवर्णरसैः प्रपूरिता कारिता । रक्तमणिनिबद्धा रक्तवर्णरसैश्च प्रपूरिता सा वापी शोणितपूर्णेव प्रतिभाति स्म । को हि जनः क्षमते निरोद्धुं स्त्रीणां मनसि गतम् । स्त्रीणां हठ एवातिबलवान् । न च ता अनुचितमुचितं वा विचारयन्ति । परिणामरूपेण च महान्त दुःखमपि चानुभवन्ति । लाक्षारसपूरितां वापीं दृष्ट्वा रक्तवर्णरसांश्च शोणिमयान् सम्भावयन्ती मृगावती महद्धर्षान्विता तस्यां वाप्यामवततार । तस्यां क्रीडन्ती तरन्ती सा रक्तवर्णशोभां दधौ । लाक्षारसेन संलिप्तायाः तस्याः सर्वाण्यङ्गानि सवस्त्राणि शोणिताक्तानीव संबभूवुः । दूरतः सा शोणितशोणमांसपिण्ड इव प्रतीयमाना तस्यां वाप्यामवतरन्ती शोभिता बभूव ।

तस्मिन्नेव काले गरुडकुलोत्पन्नो व्योमविहारी विशालकाय एकः पतत्री आकाशमार्गेणोत्पतति स्म । रक्तवाप्यां रक्ताञ्चितां क्रीडन्तीं तरन्तीं मृगावती-मवलोक्य, मांसपिण्डोऽयमिति मत्वा पक्षी भूमिसमीपमागच्छत् । आमिष-पिण्डोऽयमतीव सुस्वादु भविष्यतीति मन्यमानो मृगावतीं चञ्चुपुटे गृहीत्वा स सत्वरमेव सुदूरमाकाशमुल्ललंघ । परमाश्चर्यकरीं सुदारुणामेतां घटनां दृष्ट्वैव किंकर्तव्यताविमूढाः वापीतटगताः दास्यो भयभीताः सत्यो महान्तमाक्रन्दं तार-स्वरेण कर्तुमारभन्त । तासामाक्रन्दं करुणविलपनसंयुतं श्रुत्वा यावद्रक्षिणस्तत्र प्रधावन्ति तावत् स पक्षी सुदूरं गत्वा व्योम्न्यन्तरिक्षगतोऽदृश्यो बभूव ।

हृदयवल्लभायाः मृगावत्याः दशामेतादृशीं निशम्य सहस्रानीकस्य हृदयं महत्या विरहव्यथया स्फुटितुमारेभे । तत्क्षणमेवासौ निश्चेतनो भूत्वा भूमौ पपात । अघटघटनाया एतस्याः समाचारो देवराजेनापि कर्णपरम्परया विज्ञातम् ।

किमिदं सञ्जातम् इति पृष्टो मातलिः सहस्रानीकसम्बन्धितं तिलोत्तमाशापं चतुर्दशवर्षावधिवियोगप्रदं न्यवेदयत् । तदनन्तरमिन्द्रेण प्रेषितो मातलिः कौशाम्बीं प्रपद्य राजानं च शीतलोपचारैः ससंज्ञं कृत्वा तिलोत्तमयोदीरितस्य शापस्य घटनयाभिज्ञं चकार । अथ मृगावतीविरहमसहमानं भूमौ विलुण्ठन्तं दैवमाक्रोशन्तं तं राजानं स मातलिरुपदिदेश —

"राजन् ! भवितव्यं भवत्येव । न कस्यापि शक्तिर्विधेर्विधानमुल्लंघयितुम् । कः शक्नोति सकलभुवनचक्रपरिवर्तकस्य दैवस्य गतिं विज्ञातुम् ? सकलशास्त्राधिगमप्रखरबुद्धेस्ते किमुपदेशेन ? चतुर्दशवर्षावधिभूतस्तस्याः तिलोत्तमायाः शापः सहनीय एव भवता । धैर्यं संधार्य प्रतीक्षणीयैव सा मृगावतीपुनर्मिलनवेला । धैर्यधारणं विना न कोऽप्यन्य उपायो दृश्यतेऽत्र ।"

एवमाश्वास्य सहस्रानीकं वत्सदेशाधिपतिं मातलिः स्वस्वामिनमिन्द्रं जगाम । राजापि अन्तर्व्यथमानहृदयः कथमपि प्रतीक्षणपरः समयमाकांक्षमाणो मिलनवेलायाः प्रजापालने स्वकमुत्ससर्ज । कदाचित् स चतुर्दशवर्षविरहकल्पनयैव हृदि स्फुटतां प्राप्तो व्यथितो भूत्वैकान्ते करुणस्वरेणाक्रन्दनं चकार । मन्त्रिभिर्निबोधितोऽपि स न कथञ्चन शान्तिं लभते । परं रोदं रोदं परिश्रान्तः किमपि प्रतिविधातुमक्षमः धैर्यं धृत्वा राजकार्येषु मनः समादधत् । मन्त्रिणामादेशेन गुप्तचरा अन्ये चान्वेषका पदपद्धतिपरिज्ञानकुशलाः सर्वासु दिक्षु, वनेषु, सरितातटवर्तिषु प्रदेशेषु, जनपदेषु, नगरेषु, ग्रामेषु च मृगावतीमन्वेषमाणाः न कुत्रापि तामपश्यन् । अथ च निरुपायाः सन्तः कौशाम्बीमेव निवृत्य समायाताः ।

इतोऽपि विशालकायः स गरुडवंशीयः पक्षी चञ्चुपुटसंकीलितां मृगावतीं सुदूरायामुदयपर्वतभूमावानिनाय । पर्वतशिखरं समधिगम्य मांसपिण्डास्वादनाभिलाषया चेतनाविरहितां तां वराकीं नृपतिप्रियां भूमौ निदधे । यावदेव तेन तत्र चञ्चुप्रहारतत्परेण समभूयत, तावदेव मृगावतीशरीरे किमपि कम्पनं समजायत । जीवित एवायं कोऽपि प्राणीति सजीवमांसभक्षणविरतः स पक्षी

मृगावतीं परित्यज्य सुदूरं कुत्राप्युत्पतितः। एतस्मिन्नेव काले मृगावतीदुर्दशादर्शनं परिहरन् कमलिनीबल्लभोऽपि परमया लज्जयाऽस्ताचलमारुह्याकूपारापारपयसि निज्जयितुमात्मानमैच्छत्। तत्क्षणं शीतलेन वायुनावसरं प्राप्तेन प्रवहितुमारब्धम्। प्राणप्रदस्य पवनस्य शीतलेन स्पर्शेण समधिगतचेतना सती मृगावती गहनवनमध्ये पर्वतशिखरे सम्प्राप्य स्वकीयां तनुमेकाकिनी सती भयेन शोकेन च विह्वला तारस्वरेणाक्रन्दितुमारेभे।

परं नान्तं गता मृगावत्याः विपत्तिरेतेनैव दुर्भाग्येण। तस्मिन् काले विशालकायोऽजगरसर्पो एकस्तत्राससर्प। एकवस्त्रावृतां दुःखसम्भारभग्नामेकाकिनीं वराकीं तां राज्ञीं स्वोदरपूरणसामग्रीरूपेणावलोकयन् सोऽजगरो विशालविकरालमुखं विस्तार्य दीर्घश्वासं गृहीतवान्। परं विधिवशाद् दृष्टैषा घटना मृगयाभ्रमणकारिणा व्याधेनैकेनारण्यकेन। एकेनैव शरेण तेन विशालकायोऽजगरोऽसौ पञ्चत्वं नीतः। एतेनापि क्रूरो विधिः न परितुष्यति। एकस्यां विपत्तावन्याः विपत्तयः संगच्छन्त्यैवेति तस्य नियमः। मृगावत्या अनुपमं रूपं लावण्यं यौवनं वनस्य च चैकान्तत्वमवलोक्य स व्याधः स्वयं शरसंचालनकुशलोऽपि मनसिजशरविद्धोऽभूत्। अनायासमेवोपलब्धां तां सुन्दरीं गर्भभराक्रान्तामपि कामयमानः स संभोगविलासाय प्रार्थयामास। मृगावत्या पुनरपि पुनः निर्भर्त्स्यमानोऽपि प्रबलतामेवोपयाति तस्याग्रहः।

एवमसौ व्याधः न कामपि नैतिकतां स्वीचकार सानुनयं साश्रुनिर्भरं प्रार्थ्यमानोऽपि। जनशून्ये तस्मिन् पर्वतीये वने विलपन्तीमेकाकिनीमसहायामनाथामेकवस्त्रां गर्भभरनिपीडितां तां स क्रूरः कुलिशकठोरभुजनिपीडितां विधाय बलात्कारं कर्तुं प्रवृत्तः। किन्तु अरक्षितं तिष्ठति दैवरक्षितमिति विधातुर्नियमः। यावदेव क्रूरस्य तस्य व्याधस्य प्रयत्नाः साफल्यमुपयान्ति, तावदेव तस्य दक्षिणपादस्तत्र परिसर्पतः कालसर्पस्यैकस्य महाविषधरस्योपरि निपतितः। सहसैव निपीडनं प्राप्तेन क्रोधितेन तेन भुजगेन दष्टः स तत्क्षणमेव विगतचेतनो भूत्वा धरण्यां पपात।

विपत्तिभ्य एताभ्यो विमुक्ता मृगावती शरणमलभमाना किंकर्तव्यताविमूढा सती गर्भभरेण निपीडिता करुणं क्रन्दन्ती इतस्ततः परिभ्रमन्ती न काञ्चन शांति वा शरणं वा प्राप । तस्मिन्नेव काले सायन्तनसमये विधिवशादेको मुनिपुत्रो जमदग्निशिष्यस्तत्र फलानि मूलानि समिधश्च सञ्चयन् मृगावत्याः करुणक्रन्दनं निशम्य तत्रागच्छत् । सकलं वृत्तान्तं श्रुत्वा मधुरमनोहारिवचनैराश्वास्य तां नृपतिप्रियां स्वगुरोराश्रममानीय तस्मै न्यवेदयत् । करुणं क्रन्दन्ती प्रवहदश्रु-संक्लिन्ननयना राज्ञी सहस्रानीकप्रिया तस्य महर्षेः पादयोः पपात । वराक्यास्त-स्याः मृगावत्याः सकलं वृत्तान्तं निशम्य दिव्यदृष्टिः जमदग्निस्तामाश्वास्य मधुरवचनैरकथयत्—

"वत्से ! दिव्याप्सरसस्तिलोत्तमायाः शापेनैव त्वमीदृशीमवस्थां शोचनीयां सम्प्राप्ता । भर्तृवियोगदुःखं च तवापतितम् । चतुर्दशवर्षावधिरयं च तस्याः शापोऽयम् । न कथमपि सम्भवस्ते समागमः पत्या सहाधुना । निवस त्वमत्रै-वाश्रमे विगतभया एतावत्कालपर्यन्तम् । अत्रैव त्वं पुत्रं जनयिष्यसि पालयिष्यसि च । पुत्रश्च ते जातकर्मादिसंस्कारान् प्राप्य समुचितेनोपनयनविधिना मे शिष्यतां प्राप्य सकलविद्याकलालंकृतो भविष्यति । तदनन्तरमेव ते समागमो भविष्यति भर्त्रा सह । शोकं परित्यज्य प्रतीक्षैव समुचिता । न च धैर्यधुरः धैर्यं परित्यजन्ति ।" एवं मुनिना समाश्वासिता सा मृगावती कथमपि धैर्यं धृत्वा पुत्रप्रसवप्रतीक्षणपरा समजायत ।

द्वितीयः खण्डः

उदयनः

प्राणसमप्रियपतिविरहविह्वला मृगावती कथमपि जमदग्न्याश्रमवनमध्यवर्तिनी सती पुत्रप्रसवक्षणप्रतीक्षमाणा समयं यापितवती। दशमासावधिपूरिते समये सा शुभलक्षणसम्पन्नं करांगुलिजालग्रथितं शंखचक्ररेखाद्यङ्कितहस्तपादं तेजस्विन-मुदयद्भास्वरभानुं प्राचीव सुतं जनयामास। धर्मशास्त्रेषु कर्मकाण्डेषु च परमं प्रावीण्यमुपगतेन जमदग्निनैव तस्य जातकर्मादयः संस्काराः सम्पादिताः। एका-दशेऽहनि शास्त्रोक्तविधिना नामकरणसंस्कारसंयोजनां विधाय उदयन इति नाम्ना सुविभूषितं तं चकार। उदयपर्वतशिखरे स पक्षी मृगावतीं परित्यज्य गत इति हेतोरुदयत्सूर्यसमतेजस्वितां प्रपन्नोऽयमिति स बाल उदयन इति नाम्ना परमां शोभां प्राप्नोति स्म। बालकोऽयं चक्रवर्ती सम्राड् भविष्यतीति शुभलक्षणादि-भिर्नक्षत्रगणनां कृत्वा महर्षिः भविष्यवाणीं विदधौ।

शनैः शनैः शुक्लपक्षबालचन्द्र इव उदयनस्य वपुरपि वृद्धिं गतमायुषा सह। विद्याध्ययनयोग्ये च सञ्जाते तस्मिन् राजपुत्रे स ऋषिः क्षत्रियोचितसंस्कारान् सर्वान् विधाय शस्त्राणां शास्त्राणां च सकलाभिरपि शिक्षाभिस्तमलञ्चकार। शीघ्रमेव स तपोवनवासिषु सकलेष्वपि सहपाठिषु विद्यार्थिषु विशेषतामापन्नः स्वजनन्याः मृगावत्याः हर्षवर्धनैकहेतुरभूत्। सहस्रानीकनामाङ्कितमेकं कङ्कणं धारयामास सा तपस्विनी मृगावती स्वदक्षिणभुजे। तेन कङ्कणेन तया स्वसुत-स्योदयनस्याधिगतसकलविद्यस्यालङ्कृतो दक्षिणभुजः। उदयनोऽपि तं कङ्कणं धारयन्नेव सकलासु दिक्षु वनपर्वतमध्यभागेषु निर्भयः सन् परिभ्रमन्नासीत्। एवमचिरेणैव कालेन चतुर्दशवर्षविरहावधिर्व्यतीतः।

एकस्मिन् दिवसे वनमध्यवर्तिना मार्गेण पर्यटतोदयनेनावलोकितं यदेको भिल्लजातीयो मनुष्य एकं विलक्षणसौन्दर्यसम्पन्नं भुजगं गृहीत्वा समागच्छति। करुणाविगलितहृदयेन तेन सर्पस्य तस्य मोक्षो विचारितः। समीपं गत्वा स प्रार्थयामास तस्मै भिल्लाय सर्पस्य मोक्षणाय। परन्तु जीविकानिष्पादनव्यग्रमनाः भिल्लोऽसौ न बभूव सहमत उवाच च—

"प्राणान् प्रमाणीकृत्य मया गृहीत एषो भुजगो महता प्रयासेन स्वसर्पविद्यां प्रकटयता। सर्पक्रीडाप्रदर्शनैरेव मे जीविका भवति। महद्गुणसम्पन्नोऽपि सौन्दर्यशाली सर्पोऽयं मामकीयां महतीमाजीविकां सम्पादयिष्यति। तत्कथमहं जीविकासाधनभूतमेनं सर्पं स्वतन्त्रं कर्तुमुत्सहे। मोक्षणे चास्य निश्चयेन मे सपरिवारस्य मरणं जीविकाभावे।"

करुणावृतहृदयेन स्वभुजबन्धितं कङ्कणमुन्मुच्य भिल्लाय प्रदत्तम् कथितं च—"महार्घमिदं कङ्कणं महता मूल्येन विक्रेतुं शक्यम्। नगरं गत्वा कस्मैचिदपि रत्नवणिजे यदि प्रदास्यसि, प्रभूतान् स्वर्णान् प्राप्स्यसि त्वम्। गृहाणेदं रत्नजटितं कङ्कणं बन्धनरहितं च सर्पमेनं स्वच्छन्दविहारिणं कुरु।"

प्रसन्नोऽसौ भिल्लः सहस्रानीकनामाङ्कितं रत्नजटितं कङ्कणमादाय सर्पं परित्यज्योदयनाय प्रणम्य निर्गतः। भिल्ले च तस्मिन् चक्षुषोरगोचरीभूते स सर्पः मनुष्याकृतिर्भूत्वोदयनसमक्षं गतस्तमाश्चर्यचकितं कुर्वन् मनुष्यवाचा संजगाद—

"नागराजवासुकिभ्राताहं वसुनेमिर्नाम। सर्पशरीरमुद्वहन्नहं निर्भयो निश्चिन्तश्च विहरन्नासमस्मिन् नानावनस्पतिसङ्कुले रमणीये वनप्रदेशे। प्रकृतिसौन्दर्यप्रमुग्धेन मया विस्मृतं परितः वातावरणम्। असावधानश्चाहं निगृहीतोऽनेन सर्पक्रीडाजीविना भिल्लेन। परमनुगृहीतोऽहं भवतः दयाकरुणोदारतादिभिर्गुणैर्विभूषितेन स्वभावेन, येनातिमूल्यार्हरत्नकङ्कणविनिमयेनैकस्यातितुच्छस्य सर्पस्य प्राणानां रक्षा विहिता। कथमहं भवत उपकारस्य ऋणस्य आनृण्यमुपयास्यामि।

नास्त्यस्योपकारस्य कश्चिदपि प्रतिकारः। तथापि उपकारस्यास्योपेक्षा सर्वथा कृतघ्नतैव। तुच्छमप्युपहारं स्वीकरोतु भवान्। महती कृपा भविष्यति मयि भवतः।"

इत्युक्त्वा मनुष्याकृतिमापन्नेन सर्पेण तेन त्रीणि वस्तूनि प्रस्तुतान्युदयन-समक्षम्—स्रगैका, ताम्बूललता, वीणैका च। तान्युदयनाय समर्पयता तेन निवेदितम्—

"तिलककुसुममञ्जरीणां स्रगियं न कदाचिदपि म्लानतां प्राप्नोति। सर्व-दैवास्याः शोभानुपमा भवन्तीदृशी बध्नात्येव दृष्टिम्। स्रग्धारी च समराङ्गणे न कदाचिदपि पराजेतुं हन्तुं वा शक्यते सुभटैरपि शत्रुभिः। ताम्बूललतेयं विष-हारिणी। अनया स्पृष्टं जलं पाययित्वा विषविदग्धो जनो निर्विषः कर्तुं शक्यते। वीणा चेयं घोषवती नाम्नी अतिमधुरान् स्वरान् श्रुतयः नादान् ध्वनींश्च निस्सारयति। अस्याः नादान् श्रुत्वा मानवशरीरधारिणां तु का कथा, दुर्मदव्याला अपि वशीभवन्ति।

इत्थं त्रीण्युपहारभूतानि समर्प्य रत्नान्युदयनाय स वसुनेमिः पुनरपि सर्पाकृतिर्भूत्वा बिलं प्रविश्य पाताललोकं प्रविष्टः। उदयनोऽपि दिव्यानुपहारा-निमान् संप्राप्यातिप्रहृष्टमानसः स्वमात्रे निवेदयितुं जमदग्नितपोवनमेव सम्प्राप्तः।

सहस्रानीकनामाङ्कितं कङ्कणं रत्नजटितं महार्घं प्राप्य नितरां प्रहृष्टः स भिल्लः किमपि नग ति प्रस्थितः। विक्रयेनास्य प्रभूतं धनं भविष्यति, सपरि-वारं भोगाः भोक्ष्यन्ते, मनोमोदकान्येनान्यास्वादयन् स विधिवशात् कौशाम्बीमेव सम्प्राप्तः। रत्नविपण्यां स यदा कङ्कणं विक्रेतुं प्रायतत, बहवो रत्नविक्रेतारस्तं पर्यवारयन। उदयाचलशिखरसमवस्थितभास्करमिव दैदीप्यमानं कङ्कणमवलोक्य विस्मयाभिभूतास्ते यदैव तस्य मूल्यमाकलयन्ति, तदैवैकस्य वणिजो दृष्टि-

स्तस्मिन्नुट्टङ्किते सहस्रानीकनामनि पतिता । अहो ! महाराजस्य नामाङ्कितमेतत्कङ्कणं कथमस्य धनविद्याविरहितस्य भिल्लस्य हस्तगतं बभूवेति सर्वे वणिजो भयेन विस्मयेन च विस्तारितनयनाः सन्तः तारस्वरेणारटन्—"निश्चयेन चौर एष भिल्लः। महाराजप्रासादादेतद् रत्नं चोरयित्वा विपण्यां विक्रेतुमागतः। निश्चयेन वध्य एवेति" कथयन्तस्ते भिल्लं तं नगररक्षिभ्यः समर्पितवन्तः।

ताड्यमान एवासौ भिल्लस्तैर्नगररक्षिभिर्नीतो नृपतेरन्तिकम्। स्वनाम्नाङ्कितं कङ्कणं निरीक्षता सहस्रानीकेन स्मृता सा प्रियतमा चतुर्दशवर्षपूर्वं या गरुडजातीयेन महता पक्षिणापहृता। अद्यापि राजा तस्याः स्नेहमय्याः प्राणसमायाः प्रणयपात्रायाः मृगावत्याः स्मरति। विरहाकुलस्य निद्रामलभमानस्य पार्श्वपरिवर्तनैरेव तस्य व्यतियन्ति रजन्यः, अश्रुभिश्चार्द्रीभवति शय्या शशाङ्ककोमला। कङ्कणमेतत् प्रथमोपहारभूतं स्वप्रियतमायै सौभाग्यरजन्यां प्रथममिलनवेलायां परिधापितं तेन तस्याः भुजवल्लर्याम्। साभिलाषं कुत एतदिति पृच्छन्तमाह स भिल्लः—

"उदयपर्वतवनप्रदेशे सर्पमेकं निगृह्य गृहं परावर्तमानस्य ममैकश्चतुर्दशवर्षदेशीयस्तेजसा धर्षयन्निव जगदबालपराक्रमो बालो मार्गं न्यरुन्धत्। करुणार्द्रहृदयश्च कङ्कणमूल्येनामोचयत् स तं मे जीविकाहेतुभूतं भुजगम्। कङ्कणविनिमयेन किंचिदपि धनं लभेयमिति कौशाम्बीविपणिषु निगृहीत एव नगररक्षिभिः। एतदेवास्यागमः।"

गर्भभरालसामेव मृगावतीं रक्तवाप्यां क्रीडन्तीमपजहार स पक्षी चतुर्दशवर्षपूर्वम्। मृगावतीप्रसवः स चतुर्दशवर्षदेशीय एव भवेदिति। मे सुत एवासौ कङ्कणधर इत्यनुमतं सहस्रानीकेन। कङ्कणं गृहीत्वा भिल्लं च महता पारितोषिकेण तन्मूल्यसम्मितेन तोषयित्वा स मन्त्रिभिः सह परामर्शं कृत्वाऽऽगामिनि दिवसे गन्तुमुदयपर्वतं निश्चिकाय।

प्रभातप्रायैव रजनी। पूर्वस्यां दिशि उषसो मुखनैपथ्यमुत्तोलयत्येव भगवति भास्करे सहस्रानीकः कतिपयैरेव मन्त्रिभिः सुभटैश्च सह तमेव भिल्लं पथप्रदर्शकं कृत्वोदयपर्वताय प्रतस्थे। प्राणसमप्रियजनमिलनसमुत्सुकं तस्य चेतः भौतिकवपुषोऽपि पूर्वमेव तत्र गन्तुमुत्सहते स्म। त्वरितगत्या प्रचलन्तस्ते द्वयोरेव वासरयोरुदयपर्वतोपत्यकायां प्रविश्य सर्वतो विसरतस्तमस आवरणं भेत्तुमपारयन्तस्तत्रैव ते सर्वे स्थितवन्तः। प्रभाते च ते पर्वतशिखरस्यारोहणं प्रारभन्।

क्वचिच्छ्रमन्तः क्वचिच्च विश्रमन्तस्ते गिरिशिखरसमीपं यावदागच्छन्ति तावदेव सहस्रानीकेन सुमधुरः श्रोत्रसुखदायी वीणाध्वनिः कर्णाभ्यां गोचरीकृतः। कुतोऽयं सुगहने वने सुमधुरो ध्वनिः सम्भवतीति विचारयन् स त्वरितगत्या तमेवानुससार। शिखरसमीपमुपगम्य समवालोकितस्तेन चतुर्दशवर्षदेशीयस्तत्रैको किशोरकस्तरुतले तिष्ठन् वीणां वादयन्। वीणाया मधुरध्वनिनाऽऽकृष्टाः वन्यप्राणिनः परितस्तमवस्थिताः नयनेभ्योऽश्रूणि प्रवाहयन्तो धरां सिञ्चन्ति।

अनुपमसौन्दर्यतेजःसम्पन्नं किशोरकं दृष्ट्वा राज्ञः सहस्रानीकस्य हृदयस्य गतिरतितरां वृद्धिं प्रपेदे। मनसि चौत्सुक्यस्य महौघः समुत्पन्नः। निश्चयेनायमेव मे प्राणवल्लभायाः हृदयानन्दवर्धन इति रोमाञ्चितः सन् स पृष्ठतो गत्वा वीणावादनमग्नमनसो ध्याननिमीलितनयनस्याविदितबाह्यजगद्घटनाचक्रस्य तस्य किशोरकस्य दक्षिणे स्कन्धे करं धृत्वाऽनिमेषनयनस्तं चक्षुर्भ्यां पातुमारेभे। किशोरकस्यापि ध्यानमग्नता सहसैव विलीनतां गता। सुरूपं प्रभावशालिनं तेजस्विनं गौरवास्पदं च जनमेकं स्नेहसिक्तनयनाभ्यामवलोकयन्तमवलोक्य किशोरक उत्थाय तं राजानं प्रणनाम। "वत्स कस्त्वं? कौ ते पितरौ? कुत्र ते निवास?" इति साग्रहं पृच्छन्तं तं स उदतरत्—

"तात! वत्सदेशाधीश्वरस्य महाराजस्य सहस्रानीकस्य पुत्रोऽहं साकेता-

धिपतिकृतवर्मणो दुहितरि महादेव्यां मृगावत्यां समुत्पन्नः। तिलोत्तमानाम्नी वैकाप्सराः स्वर्गनिवासिनी रूपयौवनगर्विता मानखण्डिता शशाप मे पितरं चतुर्दशवर्षवियोगव्यथादायिना शापेन प्रियतमायाः। अपहृता च मे जननी रक्तसरोवरे क्रीडन्ती विशालकायेनैकेन पक्षिणा। आनीता चास्मिन्नुदयपर्वत-शिखरप्रान्ते। जमदग्नितपोवने चाश्रयं प्राप्य सा मां तत्रैव प्रासूत। क्षत्रियो-चितैः संस्कारैः संस्कृत्य, संपोष्य मां स जमदग्निर्नाम महर्षिरुदयनाभिधेयं कृत्वा शस्त्रैः सह शास्त्राण्यपि शिक्षयामास। रत्नकङ्कणविनिमयेन चैकं वसुनेमिनामानं नागं मोचयित्वाधिगता मयेयं मधुरवादिनी घोषवती वीणा।" इत्युक्त्वा विरराम स किशोरकः।

"वत्स! पिताऽहं ते सहस्रानीकः, पुत्र एव मे त्वम्। दैवगत्या वियोगस्यायं दीर्घावधिः समाप्तिं गतः।" इति जल्पन्नेव राजा सहस्रानीकः स्वप्रियपुत्रमुदयनं भुजाभ्यामाकृष्य वक्षसि गाढमालिलिङ्ग। अश्रुसिक्तनयनाश्च तस्य सहयायिनः पितृपुत्रमिलनावलोकनेन परमां सन्तुष्टिं संगच्छन्तः परितोऽवातिष्ठन्।

तदनन्तरं पुत्रेण सह जमदग्न्याश्रमं गत्वा विरहक्षामशरीरामेकवेणीं प्रसाधनविरहितां राजमूर्तिं हृदये दधानां प्रणयास्पदीभूतां मृगावतीमवालोकयत्। दृष्ट्वैव चरणयोः पतन्तीं प्रणमन्तीं प्रियतमामुत्थाप्य भुजाभ्यां वक्षसि दधार। चिरतृषितनयनयोस्तयोः परस्परदर्शनपिपासा न कथमपि शशाम। मृगावतीं वामपार्श्वे पुत्रं च दक्षिणपार्श्वे कृत्वा प्रणमन्तं राजानं जमदग्निः प्रोवाच—

"राजन्! दैवगतिः विचित्रा। निरपराधेनापि त्वया चतुर्दशवर्षावधिभूतो दारुणो विरहविह्वलतादायी कृतान्तक्रकचविदारणतुल्यः शापोऽनुभूतः। पूर्वज-न्मकृतकर्मणामेवैतत् फलम्। नात्र कश्चिदप्यपराध्यति। परमशक्तिशालिनो भग-वतो विधेर्महिमा लीला चैवेयम्। परं दुःखानि तेऽधुना परिसमाप्तानि। भार्यया पुत्रेण च ते समागमः सर्वकष्टहरः सकलसुखप्रदश्च। पुत्रोऽयं ते महा-तेजस्वी, प्रतिभाशाली, सकलराजन्यगुणसम्पन्नो यथोचितैः संस्कारैः शिक्षया च

समायोजितः । चक्रवर्तिनं पदमधिगमिष्यत्ययं निश्चयेनेत्यस्य लक्षणानि सूचयन्ति । गच्छ त्वं भार्यापुत्रसहितः स्वराजधानीं, राज्यभोगांश्चानुभुञ्जन् राजधर्मं परिपालय ।

मुनिना समनुमतः सपत्नीकः सपुत्रश्च सहस्रानीकः कौशाम्ब्यां निवर्त्य सानन्दाश्रुनिर्भरः प्रजाजनैः स्वागतीक्रियमाणः प्रासादं प्रविवेश । सकलमेव जगदानन्ददायि तस्य प्रतिभाति । सप्तवर्षावधिः क्षण इव व्यतीतः । चतुर्दशवर्षवर्षीयः स किशोरक एकविंशतिवर्षीयो भवन् परिपूर्णयौवनं प्राप्तः । शस्त्रेषु शास्त्रेषु दण्डनीत्यां सकलेषु च राज्यकार्येषु निपुणं वीक्ष्य सुतं स राजा युवराजपदाभिषिक्तं चकार । युगन्धरसुतो यौगन्धरायणः, सुप्रतीकसुतो रुमण्वान्, नर्मसचिवसुतो वसन्तकश्च तस्य सहायकाः नियुक्ताः । मित्रत्वमापन्नानां सहायकानां साहाय्येन राजकार्याणि कुर्वता तेन निश्चिन्ततां नीतः स्वजनकः सहस्रानीकः कतिपयैरेव संवत्सरैः सकलामेव शासनधुरं सञ्चालयन्नुदयनो राजयोग्यैः गुणैः पितरं सन्तोषयामास । सहस्रानीकोऽपि योग्यमुत्तराधिकारिणं वीक्ष्य सकलाभ्यश्चापि चिन्ताभ्यो निर्मुक्तः सन् सानन्दं मृगावत्या सह समयं यापयामास ।

प्रशासनधुरं वहतस्तस्योदयनस्य दश वर्षाणि व्यतीतानि । आन्तरिकबाह्यविपद्भ्यो निर्मुक्ताः प्रजाजनाः सुखं शान्तिं चानुभवन्तः सहस्रानीकस्यापि स्मरन्ति स्म । विविधविलासाननुभवन् भगवति शिवे च भक्तिमुद्वहन्नयं सहस्रानीकः प्रियसहधर्मिण्या मृगावत्या साकं परमं सुखं शान्तिं सन्तोषं चोद्वहन्नास्ते ।

बहूनि वर्षाणि व्यतीतानि । वत्सदेशे परा समृद्धिः विस्तृता । एकस्मिन् दिवसे दर्पणे मुखमालोकयता सहस्रानीकेनानुभूतमुपश्रोत्रं केशेषु धवलत्वम् वार्द्धक्ये मुनिवृत्तिरिति सनातनधर्म एवासीत् पाण्डववंशीयानां नरपतीनाम् स्वकीयं तद् वार्धक्यं तपोवनं गत्वा तपश्चरणयोग्यत्वं च विचार्य निश्चितः ते

वानप्रस्थभावः । मृगावत्यपि पतिसहधर्मचारिण्येवासीत् । युगन्धरादयोऽपि सचिवाः वृद्धत्वमापन्नास्तपोवनाय स्वकीयानि मन्तव्यानि प्रकटयाञ्चक्रुः । मन्त्रिभिः राजसभासदस्यैश्चानुमतिं प्राप्तेन सहस्रानीकेनाभिषिक्तो राजसिंहासने राजपदे स्वसुत उदयनः सांवत्सरिकैः संशोधिते शुभमुहूर्ते । तदनन्तरं यौगन्धरायणं प्रधानसचिवपदे, रुमण्वन्तं प्रधानसेनापतिपदे वसन्तकं च नर्मसचिवपदे नियुज्य सहस्रानीको मृगावत्या युगन्धरादिभिर्मन्त्रिभिः बालसहचरैर्वयस्यभूतैः सह हिमालयं प्रति प्रस्थितस्तपोवनेषु तपस्यायै ।

पितुः मातुश्च वियोगेनोदयनो नितरामखिद्यत । परमेषा एव सनातनगतिः पाण्डववंशीयानामिति मनसि दृढतामायोज्य प्रजानामनुरञ्जने शासने च निरतो बभूव । राजनीतिपण्डितानां यौगन्धरायणादीनां सचिवानां साहाय्येन तस्य राज्ये परं स्थैर्यमाजगाम । यौगन्धरायणस्य महामन्त्रिणो नीतिनैपुण्यं तथा प्रथितमभूद् यथा यौगन्धरायणो राजनीतिर्वा समानार्थकावेव शब्दौ सुप्रसिद्धौ सञ्जातौ । रुमण्वतः प्रधानसेनानायकस्य शौर्यं युद्धकलानैपुण्यं च सकलवत्सदेशे सुखं च शान्तिं च सुरक्षां च संस्थापयामास । राज्यसीमान्तर्वासिनो न कस्यापि साहसो बभूवोपद्रवकरणाय । बाह्यसीमानश्चापि सुरक्षिता आसन् । न कस्याप्यन्यस्य राज्ञः शक्तिः सामर्थ्यं वा बभूव वत्सदेशं प्रति शत्रुभावेनालोकयितुमपि । एवं चान्तरिकबाह्योपद्रवाणां भयाद् विनिर्मुक्ताः प्रजाजनाः स्वकार्येषु संलग्नाः सुखेन न्यवसन् ।

शासनं सुव्यवस्थितं कृत्वा राज्यभारं च मन्त्रिषु योग्येषु निवेश्योदयनः घोषवतीं वीणां वादयन् तस्याः परममधुरझङ्कृतिषु परमानन्दमनुभवन्नास्ते । सकलराज्यभारचिन्ताविनिर्मुक्तः स कदाचिदेकाक्येव विहरति सुरम्येषु हरितवनस्पतिसम्भृतेषु हिंस्रवन्यपशुसंकुलेषु विपिनेषु । वीणां वादयंश्च तत्र सुमधुरझङ्कृतिभिराकृष्टैः मृगादिभिः परिवार्यते । परमाश्चर्यमेतद् यद् विशालकायाः मदगन्धस्राविणः करिणोऽपि वीणाघोषेण वशवर्तिन इव सन्तः समागत्य परिवारयन्ति

निस्तब्धकर्णाः निमीलितनयनाश्च तमुदयनम् । एवं च वन्यहस्तिनो वशीकृत्य स एकस्य सुमहतो मदस्राविणो मदगन्धस्य करिणः पृष्ठमारुह्य वीणां वादयन् कौशाम्बीं निवर्ततेऽन्ये व बहवो हस्तिनस्तमनुयान्ति । वत्सराजेन वीणा-मधुरझङ्कृतिभिर्मदगन्धिनोऽपि करिणो वशीक्रियन्त इत्युदयनयशः सर्वासु दिक्षु प्रथितम् ।

परमललितयौवनाढ्योऽप्युदयनः घोषवतीं वीणामेव सहचरीं मन्यमानस्तस्या-मेवानुरक्तो न विचारयति गृहस्थधर्मपरिपालनं यौवनसुखविलासानुभवांश्च । परं यौगन्धरायणादयो मन्त्रिणस्तु न तथा वर्तन्ते । राज्यपदप्रतिष्ठायै सुयोग्य-गुणसम्पन्ना महादेवी भवितव्यैव । मन्त्रणां च चक्रुस्ते का राजकन्याऽस्मिन् भरतखण्डे वत्सराजमहादेवीपदयोग्यतामादधानोदयनहृदयं वशीकर्तुं शक्नोति ।

तस्मिन् युगेऽवन्तिदेशे चण्डप्रद्योतो नाम राजा । राजधानी च तस्य भुवन-ललामभूतोज्जयिनी शिप्रातटवर्तिनी । तस्यैका कन्या वासवदत्ताभिधेया ललित-लावण्यस्वामिनी शीलवती गुणवती चोच्चकुलप्रसूता । तस्याः रूपलावण्यमहिमा-नमाकर्ण्योदयनस्तस्यां मनसोऽभिलाषां बबन्ध । स्वहृदयसिंहासनारूढां कृत्वा तां महादेवीपदमपि तस्यै मनसि चक्रे । सैव मे धर्मपालनयोग्येति विचारयन्नपि स न प्रेषितवान् कमपि दूतमुज्जयिन्यै याचनामगौरवास्पदीं मन्यमानः । अयाचितव्रतं च परिपालयन् स न ययाचे प्रद्योतं तां राज्यकन्याम् । राजनीति-प्रतिद्वन्द्विता चापि वत्सावन्तिदेशयोर्मध्ये प्रधाना बाधाऽऽसीत् । अनुभवति स्म लज्जां लघुतां चासौ वासवदत्तायै स्वनिवेदनं प्रस्तोतुं राजनीतिकहेतुभिः ।

— — —

तृतीयः खण्डः

वासवदत्ता

आसीदुज्जयिन्यां महासेनो नाम राजा परमपराक्रमी तेजस्वी नीतिज्ञ उच्चकुलप्रसूतश्च। भगवती चण्डी चाराध्यमाना तपसा भक्त्या च सुप्रसन्ना तस्मै खड्गमेकमजेयं वररूपेण ददौ। अतः स चण्डप्रद्योतनाम्नाऽपि च प्रसिद्धिमवाप्तवान्। पालकगोपालकनामानौ तस्य द्वौ पुत्रौ वासवदत्ता नाम्नी चैका पुत्री।

महासेनपुत्री वासवदत्ता अवन्तिराजकन्या रूपेण, शीलेन, विद्यया, सदाचारेण, यौवनेन चाद्वितीयेयं परमसौभाग्यशालिनी प्रसिद्धा। महासेनोऽतितरां स्निह्यति स्म तस्यै। संगीतव्यसनिनी चासौ कन्या तारुण्यमारूढा पितुः हृदये महतीं चिन्तां समुत्पन्नां चकार कस्मै प्रदयेति। दूतेभ्यो वत्साधीशस्योदयनस्य गुणान् निशम्य, स एव मे रूपवत्याः गुणवत्याश्च दुहितुः पाणिं ग्रहीष्यतीति स निश्चयं चकार मनसि। वासवदत्ता तस्यैव जीवनसहधर्मिणी भूत्वा कृतार्थतामवाप्स्यतीति तस्य विचारो बभूव। परमेवं मनसि विचारयन्नप्यसौ महासेनः वत्सदेशेन सह राजनीतिकविरोधविषयकमपि मनसि चकार—

"वत्सदेशस्य राजवंशोऽस्माकं सततविरोधी प्रतिद्वन्द्वी च वर्तते। परमुदयनेन सह वासवदत्ता अवश्यमेव विवहनीया। एतेन महनीयेन सम्बन्धेन कन्या सुखमवाप्स्यति, परमगुणसम्पन्नो जामाता लप्स्यते, वत्सदेशेन च सह सततविरोधोऽपि शान्तिं गमिष्यति। द्वयोः महाशक्तिसम्पन्नयोः राज्ययोः शक्तिः

सर्वप्रधाना भविष्यत्यस्मिन् भरतखण्डे। परं कथमस्य संकल्पस्य सिद्धिर्भवेत्। कथमुदयन उज्जयिन्यामानेतुं शक्यते। यद्यहं प्रार्थये वत्सेशमुदयनं स्वसुतापाणिग्रहणाय, अतिलघुता मे गौरवहानिश्च भविष्यति। क्रियमाणेऽपि तादृशे प्रयत्ने वत्सेशो स्वीकरोति न वा मे प्रस्तावम् इति सन्देहास्पदमेव। अनङ्गीकरणे चापमानलज्जया जीवनधारणमपि मे दुष्करम्। एक एवोपायोऽत्र वर्तते। कौशाम्बीमाक्रम्य, उदयनं शृंखलाभिः निबध्योज्जयिन्यामानीय स्वराजप्रासादे प्रतिष्ठापयेयम्। अत्र च महता सत्कारेण सन्तुष्टं विधाय तं वासवदत्तायाः पाणिं ग्राहयामि। अनेनोपायेन मे प्राणसमा वत्सा वासवदत्ता योग्यं भर्तारं लप्स्यते, वत्सदेशेन सह राजनीतिकविरोधोऽपि प्रशान्तिं गमिष्यति। अथ च मे मानहानिरपि न भविष्यति।" ऊहापोहमिति कृत्वा तेन स्वमनोगतविचाराः बुद्धिमतो नीतिशालिनो मन्त्रिणो नीतिवर्मणः समक्षमुद्घाटिताः। बुद्धिमता मन्त्रिणा विचार्य निवेदितम्—

"देव ! वत्सेश उदयनस्तेजस्वी, बलसम्पन्नः, स्वाभिमानी लोभरहितश्चेति प्रसिद्धिः। प्रजाजनस्तस्मै स्निह्यतितराम्। नीतिकुशलैः सचिवैः सन्निहितः स सुमहत्या सुशिक्षितयोत्साहसम्पन्नया सेनया सदा रक्ष्यते। दानेन, दण्डेन, भेदेन वा स न वशीकर्तुं शक्यते। सामप्रयोग एवात्र समुचितः। विनम्रव्यवहारेणैव स वशीकरणीयः। भवता सह मे महान् स्नेहः, भवानपि मयि स्निह्यति, मे कन्या संगीतशिक्षाभिलाषिणी भवन्तमेव गुरुरूपेण कामयते च, संगीतविद्यायामतिनिपुणो भवान्, उज्जयिन्यामागत्य तस्यै संगीतशिक्षा प्रदेया इति संदेशः उदयनाय प्रेषितव्यः। परमोदारस्वभावोऽसौ वत्सेशः भवत्प्रार्थनां श्रुत्वा राजकन्यायाः वासवदत्ताया अभिलाषामवगम्य तद्गुणगणाकृष्टो निश्चयरूपेणोज्जयिनीमागत्यालङ्करिष्यति। तदैव तस्मै राजकन्या प्रदेया ससम्मानं सयौतुकं च।"

नीतिवर्मणो नीतिगर्भितं परामर्शं स्वीकृत्य महासेनेन विविधैः महार्घैरुप-

हारैः सह दूताः सम्प्रेषिताः कौशाम्ब्यै । ते चावन्तिदेशाधिपतेरुपहारानुदयनायोपहारीकृत्य स्वस्वामिनः सन्देशं निवेदयामासुरुज्जयिनी अलङ्करणीयेति । परमुदयनो न तत्कालमेव प्रत्युत्तरं ददौ । स नीतिज्ञेन यौगन्धरायणेन सह परामर्शं चकार, किमत्र करणीयमिति । यौगन्धरायणेनोक्तम्—

"राजन् ! शाश्वतिकविरोधस्य विश्रान्तिः सर्वदैव समुचिता । यद्यवन्तिदेशाधिपो महासेनो भवता सह मैत्रीमिच्छति, प्रतिद्वन्द्विताया: विरोधभावस्य च परिहाराय प्रयतते, तस्यामन्त्रणं स्वीकरणमेव समुचितम् । महासेनस्य सुता राजकन्या वासवदत्ता शीलेन, रूपेण, वंशेन च सर्वैरेव प्रकारैः वत्सवंशमहादेवीपदयोग्या । परं राजनीतौ विश्वस्तोऽपि न विश्वसनीयः । न विश्वसेत् पूर्वविरोधितस्येति पुरातनानां राजनीतिनिष्णातानां मतम् । पूर्वविरोधितानां कूटनीतिशालिनां मनोगतान् भावान् को हि ज्ञातुं समर्थः ? छलस्यापि सम्भावना आशंक्यतेऽत्र । उज्जयिन्यामामन्त्र्य स महासेनो भवतोऽनिष्टमपि कर्तुं पारयति । स्वसुतासौन्दर्यपाशेन स भवन्तं कारागारान्तर्गतमपि कदाचित् कुर्यात् । अतः सुविचार्यैव कार्यं करणीयम् । महासेनेन महताऽभिमानेन भवानामन्त्रितः । तस्य सुता संगीतविद्याशिक्षां भवतोऽभिलषति इति । यदि सा शिष्यभावेन भवन्तं कामयते, शिष्य एव गुरुमनुसरति, न गुरुः शिष्यम् । संगीतशिक्षाभिलाषिणी वासवदत्तात्रैव कौशाम्ब्यामागच्छेदित्येव भवता सन्देशः प्रेषितव्यः । अस्मिन् समये नोचितमुज्जयिनीगमनं महासेनस्यामन्त्रणरक्षणं च" इति ।

यौगन्धरायणस्य नीतिगर्भितानि वचांसि नितरामरोचन्त वत्सेशाय । महासेनदूतानाहूय तेन प्रतिसंदेशः प्रहितः—"नाहमस्मिन् समये स्वदेशं परित्यज्योज्जयिनीं गन्तुं समर्थः । यदि च भवत. राजा मयि स्निह्यति तस्य च कन्या मां गुरुरूपेण कामयमाना संगीतशिक्षाभिलाषिणी, सा कौशाम्बीमेवायातु । गुरुः शिष्यं नोपगच्छति, शिष्य एव सविनयं गुरुमुपगच्छति ।" इति ।

उदयनस्य प्रतिसंदेशवचांसि श्रुत्वा विदित्वा च तस्याभिप्रायं महत्यां चिन्तायां निमग्नो महासेनः नीतिवर्माणं चाहूय प्रोवाच—

"स्वाभिमानी नीतिनिपुणैर्मन्त्रिभिश्च परामर्श्यमाण उदयनो न स्वयमत्रागमिष्यति कथमपि। अहमपि वासवदत्तां न कथमपि कौशाम्ब्यां प्रेषितुं समर्थः। अत्यपमानकरोऽयं भविष्यति प्रस्तावः। बलप्रयोग एव समुचित इदानीम्। केनाप्युपायेनोदयन आनेतव्य एवात्रोज्जयिन्याम्। प्रथमं तावत् कुपितोऽपि स यथायोग्यैः सत्करणैः प्रसादमवाप्स्यति। प्रसन्नीभूतश्च पुनः वासवदत्तायाः विनयभावेन च सन्तुष्टः संगीतविद्यां प्रदास्यति तस्यै। तदनन्तरं वासवदत्तायाः रूपेण गुणैश्च वशीभूताय तस्मै कन्यादानं सुकरमेव।

राज्ञः महासेनस्य नीतिगर्भितानि वचांस्याकर्ण्य प्रस्तुतैका योजना सुकूटकपटयुक्ता। कथितं च तेन—

"प्रत्यक्षरूपेण वत्सदेशं सेनाभिराक्रमणेऽस्माकं विजयो न निश्चितः, अपितु सन्दिग्ध एव। अतोऽस्मिन् विषये कूटनीतिप्रयोग एव समुचितः। नर्मदा नदी अवन्तिवत्सदेशयोः सीमारेखा। नर्मदोत्तरं वत्सदेशः दक्षिणं चावन्ती। गहनवनाच्छादिताः नर्मदातटवर्तिनः प्रदेशाः। उत्तरतटवर्तिवनं वेणुवनमिति, दक्षिणतटवर्तिवनं च नागवनमिति लोकेषु विश्रुतम्। अत्र वनयोः भद्रजातीयाः मदवारणाःस्वच्छन्दं विहरन्ति। उदयनश्चास्ति परमव्यसनी हस्तिना ग्रहण इति सर्व एव जानन्ति। एककयेव स घोषवतीं वीणां वादयन् वेणुवने भ्रमति हस्तिनश्च स्ववशीकृत्य कोशाम्ब्यामानयति। किंवदन्त्येषा सर्वत्र प्रसिद्धा। केनाप्युपायेन यदि नर्मदामुत्तीर्य नागग्रहणाभिलाषी स नागवनमध्यमायाति, सुकरमेव भविष्यत्यस्माकमुद्देश्यपूरणप्रयासः। अस्मत्सीमान्तर्गतः स वत्सेशः सुखेन ग्राह्यो बद्धश्च भविष्यति।"

अरण्यविहारव्यसनमुपगत उदयन एकस्मिन् दिवसे वनविहाराय गतो वेणुवनं प्रति सेनया सह। प्रजानामनुशासनाय यौगन्धरायणः कौशम्ब्यामेव सन्निहितः, परं सेनापतिः रुमण्वान् अनुगतवानुदयनम्। एक-

स्मिन्नवसरे वत्सेशः रुमण्वता सह सेनानायकैरन्यैश्चाप्यनुगतः नर्मदातीरे परिभ्रमन्नासीत् । तदानीमेव सहसैकः सैनिकः प्रधावन् त्वरितवेगेनागत्य वत्सेशस्य पादयोर्निपत्य प्रणामं कृत्वा विनयभावेन तत्समक्षं तस्थौ । वत्सेशेनानुमतः सोऽवादीत् —

"महाराज ! नागवने मया सालवृक्षाणां मध्येऽवलोकितः नीलवर्णो वारण एकः सुविशालतनुः । महत्सौन्दर्यसम्पन्नो भद्रजातीयो वारणोऽसौ भवतो वाहनयोग्यतां दधाति" इति ।

नीलवर्णवारणवृत्तान्तं निशम्यातिप्रहृष्टतां गत उदयनः । समीपस्थि[illegible] रुमण्वन्तं प्रोवाच स—

"हस्तिविद्याशास्त्रेषु नीलवर्णो हस्ती प्रधानभावेन सकलगुणसम्पन्नत्वेन च वर्ण्यते । ऐरावतसदृशप्रभावशाली वारणोऽयं यस्य राजधान्यां वर्तमानो भवति, विश्वं विजित्य स राजा निश्चयेन चक्रवर्तिपदभाग् भवति । भाग्यवशादेवैतादृशो हस्ती कदाचिदेव प्राप्यते । नायमवसर उपेक्षणीयः । अहमवश्यमेव तं हस्तिनं घोषवतीवीणायाः मधुरध्वनिभिः सम्मोह्यात्रानेष्यामि । तिष्ठन्तु भवन्तोऽत्रैव । चत्वार एव सैनिकाः मया सह गमिष्यन्ति तत्र । नर्मदामुत्तीर्य नागवनं प्रविश्य सत्वरमेवाहं नीलवर्णं हस्तिनमानयामि ।"

"स्वसीमान्तेभ्यो बहिर्भूते नागवने प्रवेशो नोचितः स्वामिन" इति वारम्वारमनुरुध्यमानोऽपि रुमण्वता वत्सेशो नर्मदाप्रवाहे स्वकीयमश्वमवतारयामास । भवितव्यतां निरोद्धुं कः क्षमः । सा तु भवत्येव । भगवतो विधेरादेशमुल्लंघयितुं कस्य सामर्थ्यम् । सह गन्तुं समुद्यतं रुमण्वन्तं निषेध्योदयनः नर्मदाधारामुल्लंघ्य नागवनमनुप्रविष्टः चतुर्भिरेव सैनिकैः सह ।

नर्मदायाः पारं नागवनमध्यवर्तिनि गहनसालवृक्षान्तरितपथे प्रचलन् स

किञ्चिदेव दूरं गत्वा सहसैवातिष्ठत् । लतापरिवेष्टनालिङ्गितसालसर्जकदम्ब-करञ्जशाकसरलासनार्जुनप्रभृतिसुघनपादपमध्यवर्तिनि समतलभूमावेको नील-वर्णो वारणोऽतिभव्यरूपोऽतिष्ठत् । वारणस्यास्यातिदीर्घौ मुखवर्तिभूतौ दन्ता-वतिधवलौ प्रकाशमानाववर्तन्तां नीलघनमध्यवर्तिनी तडिदिव । वारणसौन्दर्या-कृष्टहृदय उदयनः कतिपयक्षणपर्यन्तं निस्तब्ध एव निमिषनेत्राभ्यामा-लोकयत् ।

अस्मिन्नेवान्तरे वनमध्यवर्तिनि प्रदेशे पञ्चाननस्यैकस्य सुमहान् भयंकरो गर्जनध्वनिः श्रुतिगोचरीभूतः । चमत्कृत्य तेन त्रयः सैनिकाः सिंहान्वेषणाय प्रेषिताः । सहवर्तिनं च तमेकाकिनं सैनिकं, तिष्ठ त्वमत्रैव, क्षणमात्र एवाहमेनं वारणं गृहीत्वाऽऽगच्छामि, इत्युक्त्वा घोषवतीं वीणां वादयन् हस्तिनं प्रति प्रचलितः । परन्तु महदाश्चर्यचकितेनावलोकितं तेन यत् तस्य नीलवर्णवारण-स्योदरमुद्घाट्य निर्गता अनेके सुभटाः शस्त्रसन्नद्धाः । वस्तुतस्तु उज्जयिनी-नगरवास्तव्यैः शिल्पिभिर्निर्मितस्यैतस्य कृत्रिमस्य नीलवर्णस्य हस्तिन उदरमध्ये सन्निधापिता आसन् अनेके सुभटाः नीतिवर्मणा महासेनमहामन्त्रिणा । स च हस्ती नागवनमध्ये स्थापितः । छलेनानीतश्चोदयनो हस्तिग्रहणव्यसनी । नागोद-रवर्तिनस्ते सैनिका उदयनमेव प्रतीक्षमाणा आसन् । समीपवर्तिनि सञ्जाते च तस्मिन् नागस्योदरमुद्घाट्य ते बहिरागत्य तं वत्सेशं कोशसमुद्घाटितान् खड्गान् समुत्तोलयन्तः पर्यवारयन् ।

क्षणं यावन्निस्तब्धनिश्चलोऽप्युदयनश्छलमेतच्छत्रूणामिति परिभाव्य कोपेन प्रज्ज्वलन्नभूत् । एकाक्येव समरोत्सवं तैरसंख्यैरेव सार्धमाकांक्षमाणो वीणां घोषवतीमेकतो धृत्वा कोषात् खड्गमाकृष्याचक्राम तांश्छलनिपुणान् सैनिकान् । परं नासीत्तेषामुद्देश्यमुदयनस्य प्राणानामपहरणम् । जीवत एव तस्य ते ग्रहणेच्छुका आसन् । उदयनस्य प्रहारान् वर्जयन्तस्ते रज्जुभिस्तस्य बन्धने प्रयासं चक्रुः ।

परमुदयँनोऽपि महाशक्तिशाली शस्त्रविद्यायां चातिनिपुणः। स्वल्पेनैव समयेन केचन महासेनसैनिकाः स्वर्गगामिनो बभूवुः, केचिच्च क्षतविक्षताः शोणितपङ्कनिमग्नाः सञ्जाताः। ततः क्रुद्धेनैकेन सैनिकेन पृष्ठतः समागत्योदयनशिरसि दण्डप्रहारस्तथा कृतः यथा स भूम्यां निपत्य निश्चेतनो जातः। क्रोधोन्मत्ताश्च ते सैनिका अनेनैवास्माकं मित्राणि व्यापादितानीति पादप्रहारैस्तं कुट्टितं कर्तुमारभन्त। अनेनैव मे भ्राता निहतोऽवश्यमेव मे वध्य इति क्रोधाविष्टः सैनिक एकः खड्गमुत्तोलयन्नुदयनं प्रति प्राधावत्। परं सहसैव पाषाणेनैकेन पादयोर्निहतो निपतितः।

इत्थं यदैव ते सैनिका उदयनं निहन्तुमिच्छन्ति, विशालसालसमूहमध्यादेकः सैनिको बहुमूल्यवस्त्राणि धारयन् तत्रागतः। उज्जयिनीसेनानायकः सालङ्कायन एवासीदसौ। उदयनहननोद्यतान् सैनिकान् स निर्भर्त्स्यावादीत्—

"महासेनस्यावन्तिदेशाधिपस्य महाराजस्यादेशो न ज्ञायते किं युष्माभिः। जीवन्नेवासौ वत्सराजः नेतव्य उज्जयिन्याम्। योऽधुना कश्चिदेवैनं प्रहरिष्यति निश्चयेन स मृत्युदण्डभागी भविष्यति महाराजादेशेन। कोमलरज्जुभिर्बद्धो नेतव्योऽयं राजसभायाम्।" कथयित्वैव तेन स्ववस्त्रमध्यान्निष्कास्यैकयाऽतिकोमलकौशेयसुघटितया रज्ज्वा सुबन्धितं हस्तपादमुदयनस्य। तदनन्तरं जलबिन्दुभिरभिषिच्य मुखं स चैतन्यतामानीतः।

एतस्मिन्नन्तरे सिंहान्वेषणाय गतास्त्रयः सैनिका निवर्त्य समायाताः उदयनस्य। चत्वारोऽपि ते स्वामिनः परित्राणाय सन्तोऽप्यल्पसंख्यावन्तः शत्रुष्वापतन्। परं त्रयोऽपि निहतास्ते वराकाः। केवलमेक एव भटः जीवन्नपि मृतोऽवशिष्टः। हंसकनामानं तं सैनिकं सम्मुखमानीतमवदत् सालङ्कायनः—

"गच्छ, वद च स्वकीयं कपटनीतिनिपुणत्वेन प्रसिद्धं महामन्त्रिणं यौगन्ध-

रायणं समरव्यसनिनं च महासेनापतिं रुमण्वन्तं यद् रज्जुभिः बद्धो नीयते युष्माकं स्वामी वत्सेशः उज्जयिन्याम् । यदि कापि शक्तिर्बुद्धिर्वा विद्यते मोचयितव्यस्त्वया स्वप्रभुः ।" उदयनेनाप्युक्तो हंसकः—"गच्छ हंसक ! ब्रूहि च यौगन्धरायणम् । बद्धो नीयते युष्माकं स्वामी शत्रुसैनिकैरुज्जयिन्याम् ।"

स्वाम्यादेशं परिपालयन् शरीरेण शिविरं प्रति, परं मनसा स्वामिनं प्रति प्रस्थितवान् स हंसकः पुनरपि पुनः पृष्ठतो परावर्तमानः । सालङ्कायनोऽपि रज्जुभिर्निबद्धमुदयनं रथे समारोप्योज्जयिनीं प्रति प्रस्थितः ।

रज्जुभिर्बद्धो वत्सेश उदयन उज्जयिन्यामानीयतेऽस्माकं सुभटैः पराजितः समराङ्गण, इति समाचारः राजधान्यां पूर्वमेव समागतः । वत्सेशयशःसुरभिणा नागरिका अस्य देशस्य सुरभिता एव आसन् पूर्वत एव । तस्य दर्शनसौभाग्यान्विततां प्राप्तुमेकत्रिताः बभूवुरसंख्याः जनाः राजपथे । राजपथस्य चत्वराणि, विपण्यापणानि, पार्श्वद्वयविरचितभवनवलभीगवाक्षाश्च समाश्रिताः सर्वैरेव नगरनिवासिभिः । आपणेषु वर्तमानाः वणिजः कार्याण्युत्सृज्य साश्रुनयनाः समालोकयन् सुबद्धमुदयनं राजरथेन नीयमानम् । वलभीषु गवाक्षेषु च संश्रिताः नगरयुवतयः साभिलाषं तं वीक्षमाणाः नेत्रनिमीलनमपि व्यस्मरन् । सञ्जाताश्च तासामेतानि मिथोजल्पितानि—

एका वदति—"पश्यास्माकं नरपतेः पराक्रममुदयनसदृशो वीरो येन निबद्धः ।" अन्या कथयति—"कथमत्र तस्य वराकस्य नरपतेः पराक्रमः प्रशस्यते ? छलेनैकाकी वत्सराजः गृहीतस्तेन ।" कस्य सामर्थ्यं विद्यते वत्सेशमेनं पराजेतुं निबद्धुं वा !" तृतीया वक्ति—"अस्माकं राजा चण्डप्रद्योतः, न केवलं नाम्ना कर्मणाऽपि चण्डो विद्यते, येन रूपगुणसमन्वित एषो वत्सेशः क्रूरत्वेन तथा रज्जुभिर्दृढं बद्ध्वा नीयते कारागारे ।" एवमालपन्त्यस्ताः करयुगलान्यायोज्य प्रार्थयामासुः भगवते परब्रह्मणेऽश्रुभरितनयनाः, न भवेत् कथमपि किमप्यनिष्टं वत्साधीश्वरस्य सकलगुणसमन्वितस्य ।

क्रमशश्च नगरतोरणं प्रविश्य प्रधानराजपथमुल्लंघ्य शनैः शनैः प्राप वत्स-देशाधीशाधिष्ठितो राजरथो राजप्रासादम् । उदयनग्रहणसमाचारेण च सुप्रहृष्टेन महासेनेनादिष्टम्—"वत्सेशस्तत्समक्षमानेयः ।" प्रस्तुतश्च दृढकोमलगुणसन्दानितो वत्सेशो घोषवत्या वीणया सह राजद्वारे सालङ्कायनेन ।

साग्रहेण साभिलाषेण च महासेनेन द्वारदेशः स्वयमेवालङ्कृतः । स्वकीयाभ्यामेव कराभ्यामुदयननिबन्धनं बन्धनरहितं कृत्वा दक्षिणकरेण तमालम्ब्यानीय च राजसिंहासनसमीपं स्ववामपार्श्वे समासीनं चकार, अवदच्च स्नेहसिक्तेन स्वरेण—

"न किमपि शत्रुत्वं विरक्तिभावो वा वर्तते मे भवन्तं प्रति । नितरां स्निह्यति मे हृदयं भवते महांश्च समादरोऽस्ति । मनसि महतीं पीडामुद्वहामि भवतो दुर्दशामिमामवलोकयन् । परं नात्र मम कोऽपि दोषः । भवत एव बाल-भावस्यापराधोऽयम् । गुरुभावेन भवन्तं कामयमाना मे सुता वासवदत्ता वीणां शिक्षितुकामा वर्तते । ममापि सैवाभिलाषा । परं स्निह्यति मे हृदयं तस्यै । यदि भवान् मे स्नेहामन्त्रणमङ्गीकृत्य स्वयमत्रागत्य वासवदत्तावीणाशिक्षणभारं गृह्णीयात् तत्कथमनेन प्रकारेणैतं व्यवहारं लभेत । आहूतव्या मया वासवदत्ते-दानीम् । गुरुशिष्याभ्यां परस्परमेव वार्तालापं कृत्वा शिक्षाप्रणाली निर्धारणीया ।"

परमुदयनो न किञ्चिदपि प्रत्युत्तरं ददौ । लज्जया पश्चात्तापेन च समा-लिङ्गितः परां व्याकुलतां विह्वलत्वं चोपगतो महासेनप्रकटितसमादरेण च सङ्कुचितः स अधोमुख एव तस्थौ । एतस्मिन्नेवान्तरे समायाता तत्र वासवदत्ता पित्राहूता । पितुः सङ्केतेन च वत्सराजं प्रणम्य सा तत्र समक्षमेव तस्थौ ।

वासवदत्ताया अप्रतिमसौन्दर्याभिभूतोऽसावाश्चर्येण नेत्रनिमेषमपि व्यस्मरत् । निर्निमेषो भूत्वा तस्याः लावण्यरसपाननिमग्नचेताश्च सञ्जातः । न शशाक

स्वकीयां दृष्टिमपनेतुं पीयूषसरोवरभूताद् वासवदत्तामुखात्। वासवदत्ताया रूपेण, यौवनेन, विनयभावेन च तस्य हृदये सुमहन्मथोन्मथनं समुत्पन्नम्। वासवदत्ता चाप्युदयनमवलोक्य तस्य रूपगुणसम्पत्त्या छलितेव स्थगितेव निश्चला संस्थिता।

द्वयोरेव तयोरेतां मनोहारिणीं काम्यमानामवर्णनीयामवस्थामवलोक्य वात्सल्य-भावेन मन्दं-मन्दं स्मयमानेन महासेनेन क्षणं विरम्योक्तम्—

"वत्सेश! भवतः संगीतकलानैपुण्यकीर्तिधारा चतुर्षु दिक्षु भुवनतले प्रवहति। कर्णपरम्परया आगता चैवास्याः वासवदत्तायाः कर्णयोरपि। अभिलषति चेयं भवतोऽधिगन्तुं संगीतविद्याम्, विशेषतः वीणावादनम् स्वकोमलाङ्गुलिभिः। भवतः कृपाकांक्षिणीयं सर्वदैव समुत्सुका निशिदिनमेतस्याः स्मरति। यदीयं कलास्याः कराङ्गुलिगता भवति भवानपि परमं कल्याणमधिगमिष्यति। न खेदः कश्चित् कथमपि कदापि करणीयो भवता। न किमपि कष्टं प्राप्स्यति भवान् पारिश्रमिकं च यथायोग्यं गुरुदक्षिणारूपेण भविष्यति।

वासवदत्तायाः रूपेण, लावण्येन, यौवनेन, विनयेन, कलाव्यसनितया च नितरां विमोहितायोदयनाय वचनान्येतानि चण्डप्रद्योतस्यातिशयेन पीयूषपूर्ण-श्रोत्रसुखदान्यरुच्यन्त। अवन्तिदेशाधीश्वरकृतमवमानं छलं बन्धनं वा स तत्क्षणमननुभवन् विस्मरंश्चैकपदे स्वीचकार तस्याः सर्वसुखदायाः वासवदत्तायाः सङ्गीतशिक्षणभारम्। घोषवतीं वीणामुत्थाप्य मधुरझङ्कृतिभिस्तस्याः सर्वानेव समुपस्थितान् जनान् चमत्कृत्य तां वासवदत्ताया अरुणमणिशोभाजितकरतलयोर्निदधौ। मोहितेव सा वासवदत्ता परमया लज्जया जडीभूता पदाङ्गुष्ठेन दक्षिणेन भूमिं विलिखन्ती कांश्चन क्षणान् यावत् तस्थावेवाधोमुखी। न शशाक कमपि वचनमुच्चारयितुं स्वमुखात्। उषःसमारुणकोमलकपोला च कथमपि मन संयम्योच्छलद् वीणां कराङ्गुलीभिः सुकोमलाभिः गृहीत्वातिविनयभावोपपन्नोद यनस्य चरणयोः प्रणनाम।

राजप्रासादान्तर्वर्तिन्यां सङ्गीतशालायामेवोदयनस्य निवासः संविहितः। सर्वाश्चैव भौतिकसुखसुविधास्तत्र संयोजिता आसन् राज्ञश्चण्डप्रद्योतस्य निदेशेन। प्रतिदिनं नियमितरूपेण वासवदत्ता तत्र गत्य सङ्गीतं शिक्षमाणा वीणां वादयति। क्रमशश्च सा नैपुण्यमधिगच्छति। यद्यपि तत्र निवसति वत्सेशः प्रत्यक्षरूपेण बन्धनरहितः स्वातन्त्र्यं सर्वविधमपि परमनुभवन्, परमप्रत्यक्षरूपेण तथा रक्षिणो नियोजिता गुप्तचरविभागेन यथा स कथमपि सङ्गीतशालाप्राङ्गणाद् वहिर्निर्गन्तुं न पारयेत्। इत उदयनोऽपि वासवदत्तासौन्दर्यमदिरां चक्षुर्भ्यामिवास्वादयन् सकलस्यापि जगतः विस्मरन् घोषवतीवीणां शिष्यायै समर्प्य तस्याङ्गुलिस्पर्श-जनितरोमाञ्चनं क्षणे क्षणे चानुभवन् अध्यापनकार्यसंलग्नो भवति। वासवदत्तापि संगीतशिक्षाशुल्करूपेणैव स्वकीयं हृदयमेवोदयनाय समर्पितवती। एवं च महता कालेन व्यतीतम्।

सालङ्कायनेनानीतो विवशो हंसकोऽश्रुपूरितनयनोऽवलोकयामास स्वस्वामिनं शत्रुभिर्बद्ध्वा नीयमानम्। किञ्चिदपि प्रतिकर्तुमशक्तः स तस्मिन् गहनसालतरुमध्यवर्तिन्यां भूमौ तावत् स्थितः यावत्ते शत्रुसैनिकास्तस्य स्वामिन-मुदयनमपहरन्तो रथाधिष्ठितं नयनयोरगोचरतां सम्प्राप्ताः। अगोचरीभूतेषु च तेषु सर्वेषु कथमपि मनः संयम्य हृदयं संस्तभ्य प्रतिनिवृत्य नर्मदामुत्तीर्य स वेणुवनमायातः। तत्र शिविरवर्तिने स्वामिप्रतीक्षणव्यग्राय सेनापतये रुमण्वते सकलमेव वृत्तान्तं न्यवेदयत्। चरणयोः पतंश्च नयननिःसृतैरश्रुभिश्च भूमिमार्द्री-कुर्वन्नतिष्ठत्। अवन्तिसैनिकाः सालङ्कायनसेनानायकाधिष्ठिताः वत्सेशं छलेना-पहृत्योज्जयिनीं नीतवन्तः, समाचारेणानेन प्रज्ज्वलित इव वह्निः सर्वत्रोदयन-सेनासु। उज्जयिनीमाक्रान्तुं स्वामिनं विमोचयितुं चण्डप्रद्योतं च ग्रहीतुं सुभटानां प्रचण्डबाहवः प्रस्फुरिताः बभूवुः। परं रुमण्वान् शौर्येण सह नीत्याऽपि कार्यसाधने कुशल आसीत्।

वनविहारायैवागत आसीदुदयनोऽस्मिन् वेणुवने रुमण्वता सार्द्धम्। अल्पसंख्यका

एव सैनिका आसन् तेन सह। महता कोपेनाविष्टान् रक्तवर्णनयनान् प्रस्फुरित-प्रचण्डभुजदण्डान् शस्त्राण्युत्तोलयन्तस्तान् सैनिकानुवाच रुमण्वान्—

"महाबलशाली चण्डप्रद्योतो नामोज्जयिनीनरेशः। महत्या सुशिक्षितया शस्त्रसन्नद्धया चानीकिन्या सुरक्षिता तस्य राजधानी। अतो नोचितोऽवसरोऽयं तत्राक्रमणस्य। सुलब्धवीयमस्माकं सेनेह विद्यमाना न समर्था विजयाय। अस्मिन् काले तत्राक्रमणमात्मघात एव। सम्भवति च स्वामिवधः कुपितेन चण्डप्रद्योतेनास्मत्कर्मणा। अतः कोशाम्बीनिवर्तनमेव श्रेयोऽधुना। कूटनीतिनिपुणो यौगन्धरायणो महामन्त्री सूचयितव्यः सकलयानया घटनया दुर्घटितया। स एव बुद्धिकौशलं प्रयुज्य कमपि तादृशमुपायं करिष्यति येनास्माकं स्वामी शत्रुभ्यो विमुक्तो भविष्यति। यथायोग्यानि नीतिगर्भितान्यवसरयोग्यान्येतानि वचनानि रुमण्वतो सेनापतेः निशम्य प्रशान्ततां गताः सर्वे सैनिकाः। स्वामिनो विमोचनं कथं भवेत्, कथं च वै चण्डप्रद्योतेन सह वैरनिर्यातनं भवेदित्येवंप्रायाः वार्ताः जल्पन्त एव ते कोशाम्बीं प्रति प्रस्थिताः।

सेनया सह रुमण्वान् प्रतिनिवृत्तः कोशाम्बीं त्वरितगत्या। उज्जयिनीनरेशेनास्मत्स्वामी छलेन निगृहीत इति समाचारः सकलवत्सदेशं दावानलो वनानीवाच्छादयामास। सकलजनहृदयानुरञ्जकं राजानं रिपुभिरपहृतं निशम्य क्रोधेन प्रज्ज्वलिताः प्रजाजनाः। वीराणां निर्घोषाः प्रसरिताः चतुर्षु दिक्षु व्योम लंघयन्तः। नगरान्नगराद् ग्रामाद् ग्रामात् कौशाम्ब्यामागत्य समुदितं वीरयुवकैः। अद्यैव ते उज्जयिनीमाक्रम्य भस्मसाच्च कृत्वा चण्डप्रद्योतराजधानीं स्वराजानं मोचयिष्यन्ति इति विक्रोशन्तस्तत्र मार्गेष्वदृश्यन्त। कौशाम्ब्याः विपणयो राजपथाः महापथाः वीथयो वाटिकाश्च सर्वाण्येव स्थलानि वीराणां हुङ्कारमिश्रितैः निर्घोषैः वत्सराजस्य जयजयकारैर्गुञ्जितानि समजायन्त।

मन्त्रिपरिषदि यौगन्धरायणो रुमण्वान् वसन्तकश्चान्ये च प्रमुखाः नीतिज्ञाः

सभासदः समागत्य परामर्शनिरताः बभूवुः । किं करणीयमिदानीम् ? राजा एव मूलं राज्यस्य । तस्मिन्नपहृते राज्यमेवापहृतं शत्रुभिः । अधुना कोऽप्युपायः करणीय एव तादृशो येन स्वामिनः शरीरक्षतिरपि न भवेत् शत्रुकारागृहनिर्मुक्तो भूत्वा च स कोशाम्बीमागच्छेत् । पश्चात् वैरनिर्यातनस्य वार्ता भविष्यति ।

विचाराणामादानप्रदानावसरे प्रस्तुता यौगन्धरायणेन सुगुप्तैका कूटयोजना, सर्वैरेव मन्त्रिपरिषत्सदस्यैरनुमोदिता च । परं न जानीयात् कोऽपि गुप्तचरो महासेनस्यावन्तिनरेशस्य योजनामेतामिति सर्वैः निश्चितम् । प्रचारस्य तु का कथा, परस्परवार्तालापोऽप्यस्याः विषये निषिद्धः। कूटयोजनामनुसृत्य तदनुसारेण वत्सराजमोक्षस्य गुरुभारः स्वीकृतो यौगन्धरायणेन स्वस्कन्धयोर्वोढुम् । तदनन्तरं वत्सदेशनागरिकाणां सैनिकानां च सभायां तेनैवमुद्घोषितम्—

"वत्सदेशप्रजाजनाः वीराः सुभटाश्च, महत्प्रशंसापात्राणि भवन्तः प्रदर्शयन्तो राजानं प्रत्यप्रतिमं प्रेम भक्तिं च । एतादृशाय प्रजानुरञ्जकाय कर्तव्यपालकाय शासनाधीशाय को वा न स्निह्यति, आपदि च तस्य प्राणानामप्युत्सर्गे सङ्कोचं न विदधाति । परं नात्रावसरो बलप्रदर्शनस्य । अहितस्यैव सम्भावना सम्भवति । आवेशाविष्टाः भूत्वा यदि वयं किमपि प्रतिकारं कुर्याम, अतिबलशाली चण्डो निर्दयश्च चण्डमहासेनो महत्या साधनसम्पन्नया सुशिक्षितया शस्त्रसन्नद्धया च सेनया संयुक्तः । कूटनीतिनिपुणाश्चास्य मन्त्रिणः । उज्जयिनीरक्षायाश्च तेन सुमहान् प्रबन्धोऽपि विहितः । न शक्या साऽऽक्रमितुं विजेतुं च महत्या सेनयापि । आक्रमणे च क्रोधितश्चण्डप्रद्योतः कदाचिद् वधमपि कुर्यादस्मत्स्वामिनः । अतः नोचितमस्मिन्नवसरे बलप्रयोगप्रदर्शनं वत्सेशस्य मोक्षणाय । अवसरस्य प्रतीक्षैव योग्या । गच्छन्तु सर्वे सैनिकाः स्वसैन्यशिविराणि । निवर्तन्तां प्रजाजनाः स्वकीयानि गृहाणि । वयमपि मन्त्रिणः सेनापतयो मन्त्रिपरिषत्सदस्याश्च राजसभासदश्चास्मत्स्वामिनो मोक्षणाय विचारतत्पराः स्मः । अवसरानुसारेणैव ह्युपायं कृत्वा वत्सेशमुदयनं मोचयिष्यामः ।"

यौगन्धरायणस्यौजःसम्भृतं सारगर्भितं च भाषणमाकर्ण्य समनुभूय च बलप्रयोगस्य व्यर्थतां जग्मुः सर्वे सैनिकाः नागरिकाश्च समाश्वस्ताः स्वशिविराणि गृहाणि च। यौगन्धरायणोऽपि स्वामिनं मोचयितुं प्रयासान् प्रसारयितुं संलग्नः सञ्जातः।

रुमण्वता सह गुप्तरूपेण परामर्शं विधाय यौगन्धरायणेन सेना द्वयोर्विभागयोर्विभक्ता। सेनायाः विभागमेकं कौशाम्बीरक्षार्थं सुनियोजितं कृत्वा द्वितीयं विभागमनुयायिनं कृत्वा रुमण्वता वसन्तकेन च सह वेणुवनं गतः। रेवातीरे सुरक्षितमुन्नतमेकं स्थलं सुनिरीक्ष्य स्थापितानि तेन सैन्य-शिविराणि। रेवापारमुपनागवनमेवासीदेको भिल्लानां राजा पुलिन्दको नाम वत्सेशस्य हृदयाभिन्नत्वेन गतं मित्रम्। पुलिन्दकं निमन्त्र्य सकलां च परिस्थितिं वर्णयित्वा तेनैका कूटयोजना प्रस्तुता—

"उज्जयिन्याः कथमपि स्वामिनं बन्धनविरहितं कृत्वा निर्वतिष्यामहे वयं नागवनमार्गेण कौशाम्बीम्। तत्र पुलिन्दकः भिल्लानां महतीं शक्तिशालिनीं सेनां सज्जीकरिष्यति। सा सेना अस्मदनुप्रधावतां प्रद्योतसैनिकानां गतिं निरुन्ध्यात्। सा च पराजिताऽपि भवति चेत् कञ्चित् समयं प्राप्स्यन्त्येव वयं नर्मदापारं गन्तुम्। तत्र च सन्नद्ध एव रुमण्वान् वत्ससेनया सह। समुल्लंघयितुं न समर्थाः अवन्तिसैनिकाः कस्यामप्यवस्थायाम्।"

एवं च व्यवस्थां कृत्वा यौगन्धरायणेन मार्गाणां सुरक्षा सम्पादिता। स्थाने स्थाने च गुप्तरूपेण सुशिक्षितसैनिकानां नियुक्तिः कृता। तदनन्तरमनेके गुप्तचराः विविधवेशधारिणः प्रेषिता उज्जयिन्याम्। केचन साधुवेशा, अन्ये ब्रह्मचारिवेशा, अपरे व्यापारिवेशा, इतरे नटवेशाश्च उज्जयिन्यां स्वकार्यसंलग्नाः बभूवुः। बाह्यरूपेण जीविकोपार्जनेषु स्वकीयेषु संलग्नास्ते भविष्यन्ति। परन्तु गुप्तरूपेण प्रद्योतनरेशगुप्तयोजनानां भेदं ग्रहीष्यन्ति। प्रमुखं च कार्यं

षां भविष्यति नगरमुपद्रवैः व्याकुलीकरणम् । नगरीतः प्रद्रवणसमये च स्वामिनः
रक्षणमपि ते करिष्यन्ति । तदन्तरं गुप्तरूपेण सवसन्तको यौगन्धरायण उज्ज-
यनीं प्रति प्रस्थितः ।

गुप्तचरैर्वत्सदेशीयैः संयोजितानि स्वकार्याणि गत्वोज्जयिनीम् । यौगन्ध-
ायणवसन्तकावपि सम्प्राप्तौ स्वल्पेनैव समयेनोज्जयिनीबाह्याञ्चलानि । नगराद्
हिरेव देवमन्दिरमेकं प्रधानपथात् किंचिद्दूरं सुरक्षितं विज्ञाय तत्र स्थितवन्तौ ।
त्र यौगन्धरायणेन वेशपरिवर्तनविधिः प्रयुक्तः । स्वकीयवस्त्रान्तः सुगुप्तनिहितां
प्पीमेकां निष्कास्य तदन्तर्गतरसेन सकलस्यापि वपुषो निषेचनं कृतं तेन ।
द्रसप्रभावेण स कृष्णवर्णो वलीसंवृतशरीरश्च सञ्जातः । तदनन्तरं तेन जीर्णैः
लिनैश्च वस्त्रैरावृतं स्ववपुः । कृष्णवर्णेन वृद्धब्राह्मणरूपेण परिलक्ष्यमाणं
मवलोक्य न कश्चिद् वक्तुं समर्थो यौगन्धरायण एवायं चिरपरि-
ितोऽपि । स्वकीयं वेषं परिवर्त्य यौगन्धरायणेन वसन्तकस्यापि स्वरूपपरिवर्तनं
हितं येन स उन्मत्तक इव लक्ष्यमाणोऽभवत् । विदूषकोऽपि वसन्तकः
चित्राणि कार्याणि विचित्राश्चोन्मत्तक इव चेष्टाः वार्ताश्च प्रदर्शयितुमारेभे ।

उन्मत्तकभूतोऽसौ वसन्तको नृत्यन् गायन् विचित्राश्च चेष्टाः कुर्वन् उज्ज-
न्याः राजपथेषु महापथेषु वीथिषु च धावितुमारेभे । यौगन्धरायणोऽपि हा
स ! हा पुत्र ! किमिदं ते सञ्जातम्, गृहं प्रति निवर्तस्व, माता ते रोदिति,
ते तारस्वरेण जल्पन् तमनुससार । विचित्रानन्दकरेण तेन दृश्येन मेलकमिव
ातं तत्र राजवीथ्याम् । करतलैस्तालीः वादयन्तो बालकाः प्रधावितुमारभन्त
ानु । वयस्काः स्त्रियश्च पुरुषाश्चोच्चैःस्वरेण प्राहसन्त एनं दृश्यमवलोक्य ।
ं सकलस्यापि नगरस्य परिक्रमां कुर्वन्तौ तौ राजप्रासादस्य समीपमाजग्मतुः ।

राजप्रासादस्योपरि संस्थिता वासवदत्ताप्यात्रालोकयत् तन्मनोरञ्जकं
यम् । कुतुहलेनौत्सुक्येन च महताऽऽक्रान्तहृदया काविमौ, कथं चायमुन्मत्तवद्

धावति ? कथं च द्वितीयोऽयं कृष्णवर्णो वृद्धस्तमनुधावतीति स दासीं प्रैषयत् । सा च तत्र गत्वा तौ सङ्गीतशालायामानीतवती । वत्सराजमवलोक्य तत्र योगन्धरायणस्य हृदयमानन्दहर्षातिरेकेणान्तः ननर्त । चक्षुषोश्च तस्य विशेष चमत्कृतिः समुत्पन्ना । परं कदाचिदपि भेदो भिद्यत इति भयेन स रोदितुमारेभे । कृष्णवर्णो वृद्धोऽयं जनकोऽस्योन्मत्तकस्य, पुत्रस्य चोन्मत्तभावेनायं रोदितीति मन्यमान उदयनस्तं सान्त्वयन् प्राह—

"विप्रवर ! मा रुदिहि । न त्वया कश्चिदपि शोकः करणीयः । चिकित्स्योऽयं प्रतीयते ते सुतः । राजवैद्याश्चिकित्सां विधास्यन्ति । स्वस्थोऽयं भविष्यति नायं विषयश्चिन्तायाः ।"

योगन्धरायणोऽपि समाश्वस्त इवात्मानं प्रदर्शयन् वत्सेशान्तिकं गत्वा बोधयामास स्वस्य योगन्धरायणभावं गुप्तसंकेतैः । वासवदत्ताया अन्यत्र गमनमेव समुचितमिति मनसि कृत्वोदयनः तामुवाच—"राजपुत्रि ! ब्राह्मणपुत्रस्यास्य चिकित्सार्थं चिकित्सकस्त्वयाऽऽनेतव्यः । भोजनस्यादिकस्यापि व्यवस्था करणीया ।" वसन्तकस्योन्मत्तकभूतस्य विचित्रैः हास्योत्पादकविचेष्टनैः प्रहसन्ती वासवदत्ता प्रचलिताऽऽदेशपालनाय वत्सेशस्य ।

गतायां च वासवदत्तायां योगन्धरायणेनोक्तमाश्वस्तीभूतेन—"देव ! योगन्धरायणोऽहं परिवर्तितरूपो वसन्तकश्चायमिति । भवतो मोक्षणाय समागतमावाभ्याम् । विविधान् रूपान् सन्धारयन्तः शतशो गुप्तचराः संचरन्ति चोज्जयिन्यामस्मिन् काले । भवतो निर्मुक्तेर्निरापदरूपेण च कौशाम्बीगमनस्य च योग्यः प्रबन्धः कृतोऽस्माभिः । नागवने भिल्लराजस्य पुलिन्दकस्य वेणुवने च नर्मदातीरे रुमण्वतो नायकत्वेऽस्माकं च सैनिकाः सन्नद्धाः वर्तन्ते भवतः रक्षार्थं । अधुनैवास्मिन्नेव क्षणे भवान् प्रस्थातुं शक्नोति स्वदेशाय ।"

परमतिशयेनाह्लादमापन्नोऽपि वासवदत्तायामासक्तचित्तेनोदयनेन प्रत्युत्तरितम्—"कूटनीत्यामतिविलक्षणबुद्धिर्योगन्धरायणः । अहमपि शौर्येण, साहसेन

शस्त्रसाहाय्येन च न कञ्चिदपि गणयामि । शतशः सैनिकानेकाक्येव योद्धुं समर्थः । निर्गमनसामर्थ्यमत्रसरयोग्यतां चावलोकयन्नपि नोत्सहे त्वया सह प्रस्थातुम् । चण्डप्रद्योतस्येयं सुता वासवदत्ता मे जीवनम् । स मयि स्निह्यति अतिशयेन । अहं चातितरामनुरक्तमनास्तस्याम् । तां परित्यज्यात्रैव कथमहं गन्तुं शक्नोमि । स्वर्गराज्यमपि व्यर्थमेव नारीरत्नभूतां तां विना । स्वकीयायामस्यां योजनायां तथा विधातव्यं यथास्या वासवदत्ताया अप्यपहरणं सम्भवेत् । सा मे वचनानि प्रतिपालयिष्यत्येव । अनेनास्माकं द्वे कार्ये सफलतामधिगमिष्यतः । प्रथमं तावन्महाभिमानशीलस्यास्य चण्डप्रद्योतस्य मानभङ्गो भविष्यति वैरप्रतियातनं च । द्वितीयं तावद् वासवदत्तासदृशं नारीरत्नं मया लभ्यते । दुर्लभा खल्वेतादृशी रूपवती गुणवती च कन्या । यद्यपि महासेनोऽयमुज्जयिनीनरेशोऽभिलषति स्वयमेव स्वकीयां सुतां मह्यं प्रदातुं, परं छलेनापहृतोऽहं छलेनैव तस्य मानभङ्गं निश्चयेन करिष्यामि ।"

उदयनस्य वचनान्येतान्याकर्ण्य यौगन्धरायणः किञ्चिदिव विचार्य प्रोवाच—

"देव ! यद्येवं भवतो मनसि वर्तते, प्रबन्धो मया तथा विधातव्यो यथा भवतोऽभिकांक्षा परिपूर्यते महासेनश्च मानभङ्गं प्राप्नोति । राजकन्यामपहृत्य भवतः परितोषो यथा भवेत् तथैव मया करणीयम् । यद्यपि महतीनामस्मिन् विषये विपत्तीनां सम्भावना वर्तते, तथापि यौगन्धरायणोऽहम् । यदि चेयं राजकन्या भवति स्निह्यति तथा यथा भवान् मन्यते, तामपि स्वकीयायां योजनायां सम्मिलितां विदधातु भवान् । तदनुसारं चास्माभिः प्रयतितव्यम् ।"

एतस्मिन्नन्तरे दृष्टा सा वासवदत्ता राजवैद्यमानयन्ती शनैः शनैः । तदनु च चेट्येका स्थाल्यां भोजनसामग्रीं करयोर्धृत्वा, समायान्त्यवलोकिता । वासवदत्तामवलोक्य वसन्तकेन पुनरप्युन्मत्तकेनेव चेष्टाः प्रारब्धाः हासजनकाः । यौगन्धरायणोऽपि सावधानो भूत्वा पुत्रं संस्तम्भयितुमारेभे ।

समीपमागते राजवैद्ये वसन्तकस्योन्मत्तकस्य चेष्टाभिरतिशयेन वर्धितम्
कदाचित् स हस्तौ पादौ चेतस्ततः परिभ्रामयन् विचेष्टते, कदाचिद् दन्तान् प्र
श्योंच्चैः हसति, कदाचिच्च वदनं विस्तार्य तारस्वरेण रोदिति । विचित्राश्चेम
पश्यन्ती चेष्टाः वासवदत्ता न पारयामास कथमपि निरोद्धु स्वकीयं हासम्
सा दन्ताभ्यां प्रपीडयन्ती स्वकीयमेवोत्तरीयं कथमपि संस्थापयामास आत्मानम्

राजवैद्यस्तु विचित्रमेतद् रोदनं दृष्ट्वा विस्मयाभिभूत एवासीत् । रोगिण
स्तु नाडीपरीक्षणाय अग्रे कृतस्तस्य दक्षिणकरस्तु सहसैव वसन्तकेनोन्मथितः
पीडया निपीडित इव स हस्तमाचकर्ष । वसन्तकोऽपि समीपस्थितायाः चेट्य
कराभ्यां भोजनस्थालीं गृहीत्वा नर्तितुमारेभे । कर्मणैतेन भोजनसामग्री सकल
चेतस्ततो विकीर्णा । मोदकं मोदकमतिमधुरमिति तारस्वरेण रटन् वसन्तक
भक्षयितुमारेभे तानि वस्तूनि भूमेरुत्थायैकैकशः । दृष्ट्वेदं दृश्यं राजवैद्य उवा
वासवदत्ताम्—

"राजपुत्रि ! महान् वातरोगोऽत्र कुप्यति । न प्रशान्तो भविष्यत्यधुना
रज्जुभिः बद्ध्वा रक्षणीय एवायं रोगी समयेऽस्मिन् । प्रात एवैनं परीक्ष्य सर्व
प्रकारेण चिकित्साविधानं करिष्यामि ।" इत्युक्त्वा गते तस्मिन् चिकित्सके
वासवदत्तया विहितो यौगन्धरायणवसन्तकयोर्निवासस्य प्रबन्धः सङ्गीतशाताय
एवैकस्मिन् कक्षे ।

अन्यस्मिन्नहनि प्रभातवेलायां सङ्गीताभ्यासं कारयित्वोवाचोदयनो वास-
वदत्ताम्—

"राजकन्ये ! सङ्गीतं शिक्षयतो निवसतश्च ममात्र द्वौ मासौ व्यतीतौ ।
संगीतविद्यां गृह्णन्त्या त्वया मे हृदयस्याप्यपहरणं कृतम् । त्वां विना व्यर्थमेव मे
जीवनम् । त्वमेव मे वपुषो मनसः प्राणानां च स्वामिनी । यावज्जीवं ते साहच-

र्यमेव मे सार्थकता प्राणधारणस्य । न कथमपि सोढुं शक्यते ते विरहो मया । यद्यपि ते पिता महासेनोऽभिलषत्यावयोः सङ्गमम्, परं न जाने कदा स कृपां करिष्यति । औत्सुक्यभावाभिभूतं हृदयं न कदापि शान्तिं प्राप्नोति । रजन्यश्चाहं पार्श्वपरिवर्तनैरेव यापयामि इतश्च राज्यस्यास्माकं न जाने कीदृशी अवस्था ? प्रजाः सुखिनः सन्ति न त्यहमप न जानामि । नोचितं मे दीर्घकालं यावद् राज्यादतिदूरनिवसनम् । पूर्णरूपेण स्वकीयां त्वां विधातुं विह्वलीभूतं मे हृदयम् न कथमपि शान्तिं त्वधिगच्छति । क्षणमपि ते विरहो न शक्यते सोढुम् । यदि तवेष्टमिदं प्रतिभाति, कोप्युपायः करणीय एतादृशो येनावयोरभिलाषा पूर्यते एकसूत्रतां चावामधिगच्छावः ।"

उदयनस्यातिशयप्रेमपूर्णानि वचनानि श्रुत्वा लज्जावनतमुखी वासवदत्ता रक्तकपोला न किञ्चिदप्युच्चरितुं शशाक । स्वीकृतिं व्यञ्जयन्ती च मौनावलम्बिनी तस्थौ । पुनः पुनरनुरुध्यमाना प्रियेण सा केवलमेतदेव कथयामास—

"प्रियतम ! सकलमेव मया भवते समर्पितमिदं वपुः, मनः, प्राणाश्च । त्वमेवैतेषां स्वामी । यथेच्छसि तथा कुरु । तवादेशं प्राणानप्यविगणय्य सर्वदैव पालयिष्यामि ।"

आनन्दार्णवेऽतिशयतरङ्गिते निमज्जन्निवोदयनः कथमपि सन्धार्योद्वेगं हृदयस्य वासवदत्तायाः दक्षिणं करं वामहस्तेन गृहीत्वोवाच—

"प्रिये ! यौगन्धरायणो मे मन्त्री समागतोऽत्रोज्जयिन्यां मे मोक्षणाय । प्रस्तुतापि तेन मे मोक्षस्य सर्वाङ्गपूर्णा योजना न मया स्वीकृता, ते विरहभयात् । गतोऽप्यहं प्राणानन्नैव त्यक्ष्यामि । कथं मया ते विना गन्तव्यमिति सूचितो यौगन्धरायणः । राज्यं, प्राणाः, सेवकानां च प्राणास्त्वदधीना एवेदानीम् । कथय, कीदृशस्ते मनसोऽभिप्रायः ?"

कुत्र ते महामन्त्री यौगन्धरायणो महानीतिशाली प्रथितः सकलभूमण्डल इत्यौत्सुक्येन वासवदत्तां वदन्तीमाहोदयनः—

"उन्मत्तको यस्त्वयाऽवलोकितः पूर्वस्मिन् दिवसे, स मे प्रियं मित्रं नर्मसचिवो वसन्तकः, वलीप्रावृतमुखश्च कृष्णवर्णो वृद्धो यौगन्धरायण एवेति जानीहि। मामेव मोचयितुं तौ प्राणान् करतलीगतान् विधायागत वत्र।"

"प्रियतम ! त्वदधीना एव मे प्राणाः। यथैव तवादेशो भवति, तथैवाहं करिष्यामीति', कथयन्ती वासवदत्ता स्निग्धेन कटाक्षेणापश्यदुदयनम्। हर्ष-परितोषमदसम्भृतहृदयेनोदयनेन सकला योजना प्रस्तुता तत्समक्षम्। सा च सर्वं स्वीकृत्य प्रियेणानुमता गता कन्यान्तःपुरम्। समागतौ च तत्र वसन्तकयौगन्धरायणौ। सकलामेव वार्तां श्रुत्वा वासवदत्तायाश्च स्वीकृतिं विदित्वा यौगन्धरायणो वत्सेशेन सह वासवदत्ताया अप्यपहरणयोजनां सम्पादनाय प्रयासान् प्रसारयितुमारेभे।

चण्डप्रद्योतस्य हस्तिशालायां भद्रवती नाम्नी हस्तिनी त्वरितगतिशालिनी वर्तते। प्रतियामं सा योजनानां द्विशतादप्यधिकं धावति। तत्रैव नडागिरिर्नाम हस्ती भद्रवत्या अपेक्षयापि तीव्रगामी। वासवदत्तावाहनभूता भद्रवती प्रद्योतवाहनभूतश्च नडागिरिः। द्वावेतौ राजकीयहस्तिशालायां परं सम्मानितौ परस्परस्नेहभाजनावपि स्तः। परं सा भद्रवती चिरपरिचितेव वासवदत्तायै स्निह्यत्यतिशयेन, तदादेशपालनतत्परा च सदैव तिष्ठति।

भद्रवतीपरिचालको हस्तिपक आषाढकाभिधेयो महता उत्कोचराशिना स्ववशीकृतो यौगन्धरायणेन। वासवदत्ता समागच्छति स्म प्रातः सायं प्रतिदिवसमुदयनसमीपं संगीतशालायां प्रतिवासरम्। एकदा तु सायं समये स्वसखीभूतया प्रधानचेट्या काञ्चनमालया सह सङ्गीतशिक्षार्थिनी समायाया तत्र, न च प्रतिनिवृत्ता स्वावासे कन्यान्तःपुरे।

कूटनीतिनिपुणेन यौगन्धरायणेन साधितं स्वकार्यमनेन प्रकारेण— विविधैः मनोरञ्जकैः परिहाससम्भृतैर्वार्तालापैः हस्तिपकानां मनांस्यावर्ज्य महामदसंमदाः मदिराः प्रभूतं पाययित्वा तांस्तथा मदविमोहितांश्चकार, यथा ते निस्संज्ञा इव सन्तो गहननिद्रायां भूमावेव सुप्ताः । विविधगुप्तवेशान् धारयन्तो यौगन्धरायणस्य गुप्तचरा. पूर्वमेव नगरस्य अनेकेषु क्षेत्रेषु निवसन्तः कार्यतत्परा आसन् । ते सर्वे राजप्रासादसमीपमागत्य समवेताः बभूवुः ।

यौगन्धरायणपक्षीयैरेतैः गुप्तचरैस्तत्र मिथ्याकलहः प्रारब्धः । तेषामेतेन कर्मणा राजभवनरक्षकाणां सैनिकानां चान्येषां नगररक्षकाणां दृष्टयस्तत्र सन्निपतिताः । असावधानाश्च ते समभवन् । एतस्मिन्नन्तरे यौगन्धरायणस्य केचन गुप्तचराः वसन्तकेन सह सङ्गीतशालामेत्य परितो वर्तमानानि भवनानि वह्निज्वालादग्धानि कर्तुमारभन् । प्रासादरक्षकास्तादृशीमघटनीयामविश्वास्यामतर्कनीयामवलोक्य घटनां निर्वापयितुमनलं तत्रैव प्राधावन् । अस्मिन्नेव समये भग्नतां नीतः राजप्रासादस्य प्राकार एकस्यां दिशि कतिपयैः गुप्तचरैः । भद्रवतीं हस्तिनीं वाहयन्नाषाढकस्तत्रासीत् सज्ज एव ।

यौगन्धरायणेन वसन्तकेन शस्त्रधारिभिश्च गुप्तचरैः रक्ष्यमाणो वत्सेशः सकाञ्चनमालया वासवदत्तया सह बहिरागतो राजप्रासादाद् भग्नप्राकारमार्गेण । काञ्चनमालां वासवदत्तां च हस्तिनीमारोहयित्वा स स्वयमपि तामारुरोह । वसन्तकोऽपि स्वामिनमनुससार । स्वामिनीं वासवदत्तां परिचित्याषाढकस्य च सङ्केतं प्राप्य सा भद्रवती अतित्वरितगत्या नगराद् बहिरागत्य नागवनं प्रति प्राधावत् । अश्वारूढो यौगन्धरायणोऽपि सैन्यशिक्षापारङ्गतैस्तैः गुप्तचरैः सह तमनुजगाम ।

नगरद्वाररक्षकाः महान्तः प्रयासान् चक्रुः उदयनस्य रोधनाय । परं ते पराजिताः यौगन्धरायणेन । युध्यतां केषाञ्चन रक्षकाणां शिरोविहीनाः कबन्धाः लुठन्तो धरामार्द्ररक्तां चक्रुः । केचिच्च शोणशोणितपरीताङ्गाः विक्षताः विचेष्टन्तो

महदाक्रन्दं व्योम्नि प्रासारयामासुः। अन्ये च कातराः सन्तः प्रधानमन्त्रिणं नीतिवर्माणं सूचयितुं प्रद्रुताः। इतस्तु सैनिकैः सहोदयनमनुसरन् यौगन्धरायणो नागवनं प्रति गतिं चक्रे। अमुतश्च प्रद्रुतैः नगरद्वाररक्षकैः सूचितो नीतिवर्मा सूचयामास महासेनाय, सकलस्मिन्नपि नगरे समाचारोऽयं प्रसृतो यदुदयनो वासवदत्तामपहृत्य प्रद्रुतः।

भगिन्यपहरणवृत्तान्तेन महासेनपुत्रः पालकोऽतिकुपितोऽभवत्। पित्रा निषेध्यमानोऽपि नडागिरिमारुह्य स वेगेनोदयनं त्वनुधावत्। शीघ्रमेव सन्निहिता भद्रवती बभूव। चण्डप्रद्योतपुत्रं पालकमनुधावन्तं दृष्ट्वा पूर्वमपि च तं द्वेषभावापन्नं विज्ञायोदयनः कुलिशकठोरशरान् मुमोच धनुषः। परं वासवदत्तायाः सहोदर इति कृत्वा न जहार तस्यासून्। विद्युद्गत्या सम्मुखमापतति नडागिरौ हस्तिनि तथा बाणवर्षा तेन कृता यथा अग्रे सरणस्य तु का कथा, व्रणविक्षतः सन् स हस्ती पीडयाक्रन्दनेन वनप्रान्तानि गुञ्जयन् तु उज्जयिनीमेव निवृत्य प्रद्रुतः।

परावर्तिते पालके पुनरपि प्रचलितमुदयनेन नागवनं प्रति। भयप्रदाः विपत्तयः परिसमाप्ताः। शत्रोः मानभङ्गः सञ्जातः। हृदयनिर्विशेषा प्रिया सम्पादिता। बान्धवैश्च संयोगः पुनरपि समासादितः। वत्सराजं सकुशलं सपत्नीकं समागतं विलोक्य हर्षाभरणसम्भृतेन विकसितनयनेन प्रफुल्लितवदनेन भिल्लराजेन पुलिन्दकेन अग्रे गत्वा स्वागतीकृतः सोत्साहं प्रियवयस्यः हृदयनिर्विशेषः। यौगन्धरायणोऽप्यनुयायिभिः सह समागतस्तत्र। नागवने द्विदिवसं यावत् पुलिन्दराजस्यातिथ्यमुपभुज्य नर्मदां चोत्तीर्य वेणुवनमध्यवर्तिस्वसैन्यमध्ये प्रविष्टः वत्सराजः। रुमण्वदादिभिः सेनानायकैः सत्कृतः स। कदाचिच्चण्डप्रद्योतसैनिका उदयनमनुधावन्तो वाक्रमयेयुरिति मनसि विचार्य रुमण्वता स्वचमूस्तत्र नर्मदातीरे व्यूहबद्धा संस्थापिता झटित्येव।

वत्सराजेन पराजितः परिभवेन च दह्यमानहृदयः पालको निवृत्योज्जयिनी-मुवाच पितरम्—

"पितः ! भगिनीं वासवदत्तामपहरतोदयनेन तेन महदपमानिताः वयम् । अन्तर्दह्यत इव मे हृदयमनेनापमानेन । प्रतिक्रिया चास्य निश्चयेन विधातव्या । वैरनिर्यातनं प्राणव्ययेनापि क्षत्रियाणां धर्म एव । अवन्तिदेशस्य सुविशालां युद्ध-निपुणां सोत्साहामनीकिनीं नीत्वा सद्य एवाहमाक्रम्य कौशाम्बीं, शीघ्रमेव च भगिनीं मोचयित्वा प्रतिनिवर्तिष्ये ।"

रोषावेशपराधीनं प्रस्फुरिताधरोष्ठं वैरनिर्यातनसमाहितचित्तमपि वीक्ष्य पुत्रं पालकं शान्तचेताः प्रोवाच महासेनः—

"पुत्र ! नायं कोपस्यावसरः । वासवदत्तायाः पाणिर्ग्राहयितव्य एवोदयना-येत्येवास्माकमभिलाषा वर्तते । तव भगिनी अपि तदाकांक्षिणी बभूव । एतत्प्रयो-जनसिद्धये एवास्माभिर्वत्सराजस्यापहरणं कृतम् । एतदर्थमेव सा शिष्यभावेन तं प्रतिपद्य विनीतभावेन संगीतशिक्षामगृह्णात् । अतः व्यर्थमेव युद्धकरणम् । जामातृरूपेणैव स सम्माननीयः । नीतिरपि नानुमोदयति युद्धाय वाक्रमणाय वा। चारैः सूचिताः वयं महती शक्तिशालिनी सेना भिल्लानां वत्सावन्तिदेशयोर्मध्य-वर्तिनि नागवने वर्तते । भिल्लराजश्च पुलिन्दक उदयनस्य द्वितीयमेव हृदयम् । प्राणानगणयित्वापि सोऽस्माकं मार्गं रोत्स्यति । तस्य विजयेऽपि नाग्रवर्ती मार्गः सुकरः । नर्मदापारं वेणुवने वत्सदेशस्य महती सुशिक्षिता सेना सुसज्जिता वर्तते रुमण्वतो नायकत्वे । युद्धविद्यायां परमपण्डितोऽसौ रुमण्वान् । उदयनश्चापि वीरः, पराक्रमी, स्वाभिमानी, युद्धविद्यानिपुणश्च । तस्य महामन्त्री यौगन्ध-रायणो वीरतामापन्नोऽपि कूटनीतिनिपुणः । दृष्टं च प्रत्यक्षमेवात्राधुनैव त्वया तस्य कौशलम् ।"

अपरं च तव भगिनी वासवदत्ता वत्सराजेऽनुरक्ताऽतिशयेन । प्राणेभ्योऽपि

गरीयसो भर्तुरनिष्टे सति न जीवति सा। तस्यास्तु दुःखभावोऽस्माकमपि दुःखायैव। सर्वमेव प्रकरणं च घटनाचक्रं च परिस्थितींश्च विचिन्त्य न रोचते मे काचिदपि विग्रहवार्ता। उदयनवासवदत्तयोः सम्बन्धः स्वीकरणीय एवास्माभिः। दूतान् प्रेषयित्वाऽस्माभिः मैत्रीस्नेहसंदेशः प्रापयितव्यस्तत्र। तदनन्तरं त्वया वा भ्रात्रा वा ते गोपालकेन तत्र गत्वा महत्या राजयोग्यया यौतुकसामग्र्या च सह तयोः शास्त्रोक्तविधिना विवाहसंस्कारः सम्पादनीयः"।

अरुचिकरमपि पितुः प्रस्तावमङ्गीकर्तुं विवश आसीत् पालकः। परं न स कौशाम्बीगमनं स्वीचकार। तस्यानुजो गोपालक एव तत्र यास्यति इति निश्चयोऽभूत्। राजकीयगौरवानुरूपं सकलं सामग्रीजातं गृहीत्वा कतिपयैः सेवकैः सह कौशाम्बीं गमिष्यति गोपालकस्तत्र भगिन्याः वासवदत्तायाः पाणिं समर्पयिष्यति वत्सराजायेति सन्देशः प्रेषणीयो बभूव। योजनामनुसृत्य चैतां नीतिवर्मणा प्रधानमन्त्रिणा महासेनस्य प्रहिता दूताः वत्सराजान्तिकं वेणुवने। तत्र च गत्वा वत्सेशमुपगम्य तैर्निवेदितम्—

"राजन्! प्रहिताः वयमवन्तिदेशाधिपतिना चण्डप्रद्योतेन महासेनेन महामहिमशालिना, यदनुमतं तेनापहरणं भवत्कृतं तदीयायाः सुतायाः वासवदत्तायाः। भवानेव तस्याः योग्यो वर इति निश्चितम् तेन बहुकालपूर्वमेव। एतदेव लक्ष्यीकृत्यानीतो भवान् नागवनात् कृत्रिमनागच्छलेन। पुत्रवत् स्निह्यति भवत्यवन्तिदेशाधिपः। कश्चित् कालः प्रतीक्ष्यो भवता। तस्य पुत्रो गोपालकः सकलां विवाहसंस्कारयोग्यां सामग्रीं राजविभवयोग्यं च यौतुकजातं गृहीत्वा समागच्छत्येव कौशाम्बीं कतिपयैरेव दिवसैः। शास्त्रोक्तविधिना स राजदुहितरं वासवदत्तां भवतेऽर्पयिष्यति।"

अवन्तिदेशाधिपस्य महासेनस्य स्नेहगर्भनिर्भरमिमं संदेशं श्रुत्वा प्रसन्नतातिशयं प्राप वत्सराजः। सर्वे चोदयनानुयायिनः परमप्रमोदास्पदतां गताः। एतया

वार्तया सूचिता वासवदत्ताऽपि परमं हर्षमनुभवन्ती स्मयन्ती बभूव काञ्चनमालया सह । दूतान् सत्कृत्य विसृज्य च यौगन्धरायणेन च सह सम्मन्त्र्य स्थापितो रुमण्वान् सेनया सह गोपालकस्य स्वागताय नर्मदातीरे वेणुवने । यौगन्धरायणेन वसन्तकेन वासवदत्तया च सह प्रस्थितः स कौशाम्बीम् । मार्गस्थितानां ग्रामाणां नगराणां च निवासिभिः सार्जवं सस्नेहं च स्वागतीक्रियमाणः स कतिपयैरेवाहोभिः कौशाम्बीं प्रपेदे ।

अवन्तिदेशाधिपस्य राजकन्यां परमलावण्यवतीं गुणवतीं वासवदत्तामपहृत्य वत्सेश्वरः कौशाम्बीमागच्छतीति समाचार उदयनात् प्रागेव कौशाम्बीमाजगाम । राजदर्शनोत्सुकाः सकलाः प्रजाः औत्सुक्येनाधीरतां प्रपन्नाः प्रतीक्षारता आसन् । स्वागतायोदयनस्य प्रजाजनमनोरञ्जकस्य भाविन्याः महादेव्याश्च सकलैव कौशाम्बी नगरी नववधूरिवालङ्कृता बभूव । उपनगरद्वारं समागत एव सपरिवार उदयने सहस्रशः प्रजाजनास्तत्र समवेताः जयजयकारैः सर्वा अपि दिशः गुंजिताश्चक्रुः ।

सुसज्जितं विविधपुष्पमालाभिः स्वलङ्कृतं नगरबाह्यद्वारतोरणमुल्लंघ्य प्रवेशः कृत उदयनेन राजधान्याम् । राजपथस्य द्वयोः पार्श्वयोः स्थिताः प्रजाजनाः हर्षनिर्भराः सन्तो गायन्तो नृत्यन्तश्च प्रचेतुः । "उदयनो वत्सराजो विजयताम्, महादेवी वासवदत्ता विजयताम्, महामन्त्री यौगन्धरायणो विजयताम्" इति निर्घोषैस्तेषां सम्भृता सकलैव कौशाम्बी प्रतिकोणम् । भवनानां वलभीषु शिखरेषु च स्थितानां मङ्गलगीतगानसंलग्नानां युवतीनां करकिसलयैः विप्रकीर्णानामक्षतानां कुसुमानां च सम्भारैः समाकीर्ण एव सकलो राजमार्गः । एवं च हर्षनिर्भरप्रजाजनैः निष्पादितं स्वागतमनुभवन् उदयनो वासवदत्तया सह तदवसरयोग्यविशेषरूपैः सुसज्जितं राजप्रासाद विवेश ।

कतिपयदिवसानन्तरमेव महासेनपुत्रो गोपालकः सकलामेव विवाहसंस्कारसमुचितां सामग्रीं यौतुकभारं चानीय सेवकैः सह कौशाम्बीमायातः । प्रथमं

तावन्नर्मदातीरे रुमण्वता तदनन्तरं च कौशाम्ब्यां यौगन्धरायणेन सम्पादितं हार्दिकस्नेहसम्भृतं स्वागतमनुभवन् मनसि च प्रहर्षनिर्भरः स उदयनं वासवदत्तां चावालोकयत् । उदयनस्य परममित्रं भिल्लराजः पुलिन्दकः प्रधानसेनानायको रुमण्वानपि च तेन सहैव समागतौ कौशाम्बीम् । यौगन्धरायणेन यथायोग्यं सर्वेषां स्वागतं कृत्वा निवासस्य प्रबन्धः कृतः । भिल्लराजं पुलिन्दकं राजकीयायामतिथिशालायां सन्निवेश्य स गोपालकस्य निवासव्यवस्थां राजभवनस्यैकदेश एवाकरोत् ।

गोपालकस्य आगमनेन वासवदत्तायाः हृदयस्य अवस्था अनिर्वचनीयतामादधाना विचित्रैवासीत् । पितृभ्यां द्रोहं कृत्वा अवन्तिराजकुलापमानं पुरस्कृत्य अननुमता च केनाप्यन्येन स्वसम्बन्धिना सा प्रियतमेन सह समायातेति लज्जया न शशाक मुखमपि दर्शयितुम् । परं भगिनीहृदयभावाभिज्ञो गोपालकः स्वयमेव तस्याः कक्षमुपगम्य पश्चात्तापशोकहर्षाश्रुविभिन्नं सिक्तकपोलमार्द्रनयन वदनमुन्नमय्य पितुः स्वीकृतिसन्देशं स्वयमुवाच । भ्रात्रा सस्नेहं सानुकम्प च समाश्वासिता सा कथमपि नयनाश्रूणि प्रमृज्य शान्तचिता बभूव । भ्रातरं सादरं सस्नेहं सम्मान्यात्मानं सा धन्यसौभाग्याममन्यत ।

अपरस्मिन्नेव दिवसे सांवत्सरिकैः संशोधिते शुभमुहूर्ते शास्त्रोक्तेन विधिना पुरोहितैः सम्पाद्यमाने विवाहसंस्कारे गोपालकेनानुजायाः वासवदत्तायाः पाणिरुदयनस्य हस्ते निहितः । होमकुण्डस्य प्रदक्षिणां कृत्वा वह्निं च साक्षीकृत्य गोपालकप्रदत्तं वासवदत्तायाः सुकोमलकरकिसलयमुदयनो स्वकीयपाणिना जग्राह । करस्पर्शजनितानन्दरोमाञ्चितोऽसौ सकम्पन सात्विकभावमनुभवन् विचित्रेणैवावर्णनीयेनानन्दभरेण सम्भृतसकलाङ्गो बभूव । वासवदत्ताऽपि प्रियतमकरस्पर्शरोमांचिता कम्पमाना च सात्विकेनैव स्वेदेनार्द्रीभूताङ्गी समभवत् । प्रियमिलनाभिनवानन्दजनितलज्जया अरुणिमानं प्राप्ते तस्य नयने शोणिततरे सञ्जाते होमाग्निधूमेन घनीभूतेन ।

विवाहस्यास्य शुभवेलायां गोपालकसमर्पितेन यौतुकसम्भारेण मित्रनृपतीनां प्रतिष्ठितानां च पौराणामुपहारैरनर्घैः वत्सराजस्य प्रासादो राजराजकुबेरस्य कोषमपि तिरस्करोति स्म । विवाहसंस्कारानन्तरं विशेषरूपेण सम्मानिताः सर्वे जनाः समुपस्थिताः वत्सराजेनोदयनेन । यौगन्धरायणः, रुमण्वान्, पुलिन्दकः, वसन्तकः, गोपालकः समभ्यागताश्च राजानः सर्वे विशेषेण सम्मानिता बभूवुः । यथायोग्यं च याचकानामभ्यर्थिनामभिलाषाः परिपूरिताः । प्रजापालकेन प्रदत्तैः दानैः न कोऽप्यासीत् धनरहितस्तस्यां नगर्याम् ।

विधिपूर्वकं वत्सराजाय भगिनीहस्तं समर्प्य पितुश्च सन्देशं प्राप्य उज्जयिनीतः प्रतिनिवृत्तो गोपालकः ।

अनेकजन्मसञ्चितपुण्यकर्मणामेव फलमियं वासवदत्तेति मनसि चिन्तयन्नुदयनस्तां दर्शं दर्शं प्रतिक्षणमेव विकासतां प्राप्नोति । चिरकालप्रतीक्षाप्रवृद्धविरहव्यथासंजातोत्कण्ठितौ नासादयाममासतुः कथमपि तृप्तिं द्वावेव तौ प्रणयिनौ । कामकेलिभिरेव तयोर्निशा परस्परप्रगाढालिङ्गनबद्धयोः व्यत्येति क्षणवर्तिनीव । विलासविहरणलीलासु तयोर्दिवसाः गच्छन्त्यवसानताम् । विविधैः क्रीडाभिरुदयनो वासवदत्तां प्रसादयति । कदाचित् स वासवदत्ताकरकिसलयं करे गृहीत्वा विविधकुसुमसुशोभितासु वाटिकासु विचचार । कदाचिदिन्दीवरपुण्डरीकतामरसपद्मविभूषितसरोवरतटोपविष्टः कमलकुसुमस्रजो ग्रथित्वा ताः प्रियायाः सुदर्शनकण्ठहारतां नीत्वा तस्याः व्रीडास्मितालङ्कृतं वदनं द्वयोरेव करयोरुन्नमय्य चिरं पिपासार्दित इव पपौ । कदाचिच्च सखीभिः सार्द्धं विचरन्तीं तां छलेन रहस्याकार्य तया सह क्रीडासरसि चिरं जलक्रीडानन्दमनुबभूव । कदाचिदानन्दिता, कदाचिद् हर्षिता, कदाचिच्छ्वसिता, कदाचिदुत्कण्ठिता, कदाचित्कम्पिता, कदाचिल्लज्जिता, सा नवप्रणयिनी न शशाकाधिगन्तुं किं करोमि, किं वा न करोमीति । एतादृशेषु अवसरेषु सा द्वावेव कोमलविटपानुकारिणौ भुजौ प्रियतमकण्ठहारौ कृत्वा स्वकीयं शिरश्च तस्य वक्षसि निधाय किंकर्तव्यताचिन्तारहिता बभूव ।

एवं च प्रियया सह विविधविलासप्रणयक्रीडाभिर्विलसता उदयनस्य दिवसेभ्यो दिवसाः, सप्ताहेभ्यो सप्ताहाः, मासेभ्यश्च मासाः व्यतीताः बभूवुः। वासवदत्तासौन्दर्यसागरतरङ्गिततरङ्गेषु निमज्जनोन्मज्जनं विदधतस्तस्य गच्छन्ति यामिन्यो दिवसाश्च । सकलमेव विस्मृतं कार्यजातं तेन। प्रियासङ्गमरूपकर्मण्येवासक्तं तस्य चित्तं सततं बभूव । तस्मै सा वासवदत्ता क्षणे क्षणे नवतां दधाना प्रतिभाति स्म । क्षणमपि तस्य वियोगं सोढुं न शशाकोद्दामप्रणयपरवशः। राज्यप्रशासनस्यावश्यकानिवार्यकार्याणां वीक्षणाय निरीक्षणाय चापि नावकाशं तेन लभ्यते स्म । प्रजाजनानां प्रार्थनापत्राणि निवेदनानि दर्शनाभिलाषाश्चाप्युपेक्षमाणः स प्रियामुखदर्शनमेवाचकांक्ष। न स मनसि कदाचिदनुबभूव राजसभायामपि तस्योपस्थितिरनिवार्या, मन्त्रिपरिषत्सु तेन गन्तव्यं, यौगन्धरायणरुमण्वद्वसन्तकैरपि सह च तेन विश्रम्भवार्ताः करणीया इति । वासवदत्तातिरिक्तं सर्वमन्यच्छून्यं जगदित्येव तस्य व्यतीतः बहूनां मासानामवधिः प्रियानिमग्नमनसः।

———

चतुर्थः खण्डः

पद्मावती

वासवदत्तानिमग्नचित्तस्य विविधप्रणयप्रसङ्गविलासनिभरस्योदयनस्य राजप्रशासनमप्ययुपेक्षमाणस्यैताद्दशीमवस्थामवलोकयन्तौ रुमण्वद्यौगन्धरायणौ सकलमेव प्रजारक्षणपरिपालनभारग्रहणं चक्रतुः। रुमण्वतः शौर्येण यौगन्धरायणस्य च कूटनीतिनैपुण्येन तथा प्रथितं सकलभूमण्डले यथा न कस्यापि साहसो बभूव तिर्यग्दृष्ट्याप्यवलोकयितुं वत्सदेशं प्रति। परं राज्यसमृद्धिविस्तारचिन्तानिमग्नमनसा यौगन्धरायणेनोक्तो रुमण्वान् एकस्मिन्नवसरे—

"सेनापते! पाण्डववंशीयस्यास्योदयनस्य शासनं कुलपरम्परानुसारेण सर्वस्मिन्नेव विस्तृते भरतखण्डे भवितव्यम्। पूर्वजैरस्यार्जुनादिभिर्विजित्य सकलाः दिशश्चक्रवर्तिसाम्राज्यं संस्थापितम्। परमधुना सङ्कुचितसीमान वत्सप्रदेशमंवायमुदयनः प्रशास्ति। वत्सेशस्य कर्तव्यमिदं यत्पूर्वजानां गौरवमनुस्मृत्य राज्यविस्तारं कृत्वा सकलमेव भरतखण्डमेकचक्रवर्तिशासनान्तर्गतं कुर्यात्।

परमेतद्विपरीताण्येव वत्सेशस्य कार्याणि। राजकार्याण्युपेक्षमाणः स सकलमप्यन्यद् विस्मृत्य अवन्तिदेशराजकन्यायां वासवदत्तायां निमग्नमनाः भोगबिलासानेव बहु मन्यते। व्यसनेषु आसक्तः स राज्यशासनप्रबन्धं सम्पूर्णरूपेणास्मादृशषु मन्त्रिषु समर्प्य विगतचिन्तः सन् मन्त्रणावसरमपि न ददाति। अधुना कर्तव्यमिद भवतश्च मम चापि, यद् वयं राज्यरक्षया सह प्रान्तप्रदेशसुरक्षां सुदृढां कृत्वा

साम्राज्यस्य विस्तारं कुर्वन्तश्चक्रवर्तिपदभाजिनं वत्सेशं कुर्याम। एवं सत्येव मे मन्त्रित्वस्य भवतश्च सेनापतित्वस्य सार्थकत्वं साफल्यं च।

यौगन्धरायणस्य सारगर्भितानि युक्तिसमुचितानि वचांस्याकर्ण्य प्रत्युत्तरितं रुमण्वता—

"मन्त्रिश्रेष्ठ ! यथायोग्यमेव भवता कथ्यते। वत्सराजस्य चक्रवर्तिसम्राट्पदभागतैव साफल्यं कृतार्थता चावयोर्मन्त्रित्वसेनापतित्वयोः। परं विषयभोगासक्तेनोदयनेन वत्सेशेन न क्षणमपि लभ्यते वासवदत्तां महादेवीं प्रद्योतसुतां विहाय। अस्माभिः सह विश्रम्भवार्तानां तु का कथा, मन्त्रणां कर्तुमपि न कदाचिदवसरं ददाति। अतः यत् किञ्चिदपि करणीयमस्माभिरेव करणीयम्।

अस्मिन् समये भारतवर्षे द्वावेव राजानौ शक्तिसम्पन्नाववलोक्येते—पूर्वस्यां दिशि मगधानां राजा प्रद्योतः, पश्चिमस्यां च दिशि अवन्तिदेशाधिपो महासेनः। विजययात्रायै प्रस्थितेष्वस्मासु यदि किञ्चिद् भयमस्ति, पूर्वदिशात एव सम्भाव्यते। अवन्तिदेशराजकन्याऽधुना वत्सदेशस्य महादेवी। अतः निर्भया वयं तस्याः दिशः। वत्सेशस्य श्वसुरत्वात् सहाय एवास्माकं चण्डमहासेनः। परं दूरीभूतेष्वस्मासु राजधानीतो विजययात्रासु यदि मगधराजेनाक्रम्यते वत्सदेशः, मूलमेवास्माकं विपद्ग्रस्तं भविष्यति। नास्माकं तादृशी शक्तिशालिनी विशाला सेना, यया वयं मगधराज्यमाक्रम्य विजयाशिनो भवेम। अतो विजययात्राविचारकरणपूर्वमेव मगधदेशस्य प्रबन्धः करणीय एव।

राजनीतिनिपुण एवासीद् यौगन्धरायणः, सकलया च भारतीयराजनीतिकस्थित्या परिचितः। नीतिगर्भितं रुमण्वद्वर्णितमाकर्ण्य कथितं तेन—

"सेनापते ! सत्यमेव कथयसि त्वं याथातथ्येन। मगधशक्तिर्नोपेक्षणीया। मागधीया सेना प्रबलशक्तिसम्पन्ना, नयज्ञाः तत्रत्याः मन्त्रिणः, शौर्यप्रज्ञाबलसम-

न्वितश्च मगधाधीशः । तस्य प्रतीकारमकृत्वा न शक्नुमो वयं दिग्विजयाय प्रस्थातुम् । परं न तथा वयं बलशालिनो यथा दण्डोपायेन स साध्येत । अन्य एव नीतिप्रयोगः श्रेयान् । येनोपायेनावन्त्यधिपः स्वानुकूलः सञ्जातः स एवोपायो मगधाधिपाय प्रद्योतायापि योग्यः । प्रद्योतसुता राजकुमारी पद्मावती सर्वगुणसम्पन्ना रमणीललामभूता सर्वथा योग्यैवास्माकं स्वामिनो देवीपदभागिनी भवितुम् । अपरं च ज्योतिर्विद्भिः प्रमाणीक्रियते यन्मगधराजसुतायाः पद्मावत्याः पाणिग्रहीतैव सकलं भरतखण्डं स्वाधीनं विधाय चक्रवर्तिपदभाग्भविष्यति । मगधराजोऽपि स्वकीयां हृदयनिर्विशेषां सुतां वत्सराजायार्पयितुमभिलषति स्म । परं प्रेषितस्तस्य प्रस्तावः वासवदत्ताप्रसङ्गेन न साफल्यं गतः ।

तदनन्तरं मयानेकशः प्रार्थ्यमानोऽपि मगधराजो नाङ्गीचकार स्वसुतां वत्सराजाय स्वामिने प्रदातुं वासवदत्ताप्रणयिने । न समर्था पद्मावती कथमपि सपत्नीजन्यपीडां सोढुमिति कृत्वा वासवदत्ताधिष्ठिते प्रासादे न शशाक स प्रेषयितुम् । वत्सराजोऽपि स्वप्राणेभ्योऽप्यभिमततरां मन्यते वासवदत्तामिति प्रथितमेव सर्वत्र । मयापि नाधिकाः प्रयासाः, उपायाः वा सम्पादिताः प्रयोजनस्यैतस्य पूरणाय । कदाचिन्नाङ्गीकरिष्यति महाराजो वासवदत्तायै समर्पितहृदयप्राणोऽन्यां कन्यामपि काम् । तथापि करणीय एवास्माभिरधुना कश्चिदीदृश उपायो येन मगधराजकन्यां पद्मावतीं परिणयतु वत्सराजो वयं च विगतचिन्ताः सन्तः दिग्विजयाय प्रतिष्ठेम ।"

एवमुक्त्वा विरराम यौगन्धरायणः । तदनन्तरं मुहूर्तं यावद् विचिन्त्य पुनरपि प्रोवाच—

"सेनापते ! विचारितो मयैक उपायः कार्यसिद्ध्यै । अनुमतो भवता निवेदयामि तावत् ।" रुमण्वतः सशिरश्चालनं स्वीकृतिं प्राप्य प्रकटितः स्वमनोगत उपायस्तेन—

"वत्सदेशगौरववृद्ध्यर्थं वत्सराजस्योदयनस्य चक्रवर्तिपदोपलब्ध्यर्थमुपायो मया यो विचारितो व्यथादायी भविष्यति महादेव्यै वासवदत्तायै। परं भवितव्यैव सहमतया तया तेनोपायेन। भवन्ति पतिधर्मानुसारिण्यो भारतीयनार्यः। पत्युः यशसे समृद्ध्यै गौरववृद्ध्यै च ताभिः सर्वस्वत्यागोऽपि विधीयते। वत्सेशस्य गौरव-सम्भावनया महादेवी निश्चयेन सहमता भविष्यत्यनया योजनया प्रभूतव्यथादा-यिन्यापि पतिमंगलाकाक्षिणी। मदीयेयं योजना—

कौशाम्ब्याः कतिचित् क्रोशान्तरालवर्तिन्यां यमुनातीरगतायां वनमध्यभूमौ स्थित एको ग्रामो लावणको नाम। अतिशयरमणीयेऽस्मिन् ग्रामे पञ्चषा एव गृहस्थजनाः निवसन्ति वन्यपदार्थैश्च स्वकीयामाजीविकां निष्पादयन्ति। ग्रामं परितः गहनारण्ये विचरन्तः संख्यातीताः वन्यजन्तवः सिंहव्याघ्रशार्दूलवराहमहिष-गण्डकवृकहस्तिमृगादयो मृगयाव्यसनिनो जनान् सततमाकर्षयन्ति। मृगयाव्य-सन्ययमुदयनो नेतव्यस्तत्र मृगयाव्याजेन लावणकग्रामे सपरिवारः। तत्र च सर्व-विलाससुशोभिते तृणादिविरचिते शिविरे निवासस्य प्रबन्धो विधेयः।

कदाचिन्मृगयायै निर्गते मृगयाव्यसनिनि तस्मिन्नृपे सरुमण्वति अग्निसात्क-र्तव्यं तृणादिभिर्ज्वलनशीलैः द्रव्यैर्निर्मितं तच्छिबिरं महादेवी वासवदत्तां सूचितां कृत्वा सुरक्षितां च तां विधाय। कस्याश्चिन्मृतरमण्याः मृतपुरुषस्य च मृतकशरीरौ तस्मिन्ननले निपातनीयौ। मृगयापरावृत्तश्चोदयनो द्रक्ष्यति भस्मीभूतं शिबिरं, तत्र च वह्निना संप्लुष्टौ द्वौ शवौ। क्रन्दन्तो वक्षांसि करतलैस्ताडयन्तः सेवकाः सूचयिष्यन्ति तस्मै महादेव्याः प्रधानमन्त्रिणश्चाग्निरथमारुह्य स्वर्गगमनम्। रक्षितव्याश्च प्राणाः रुमण्वता, कदाचिदनिष्टमप्यात्मनः शरीरे निपातयितुमुद्य-तस्य वासवदत्ताविरहविदग्धहृदयस्य स्वामिनः। तदनन्तरं च पुनः पुनरनुरुध्यमानो मगधराजो वासवदत्ताविरहविधुराय महाराजाय दास्यत्येव स्वसुतां पद्मावतीं तद्गुणसम्मोहितः। वत्सराजोऽपि पद्मावतीरूपशीलादिगुणप्रभावितस्तां परिण-

ष्यत्येव । क्रूरतमोऽप्युपायोऽयमस्माभिः प्रयोजनीय एव राज्यस्य स्वामिनश्च हिताकांक्षिभिः । कटुमप्यौषधं पाययन्त्येव रोगिहिताभिलाषिणो भिषजः ।"

सुकठोरामपि परिणामहितकारिणीमेनां योजनां स्वीचकार रुमण्वान् । भेदभेदने सञ्जाते भयमासीद् यद्यपि राजकोपस्य, तथापि स्वामिभक्तिपरिगतौ राजहिताकांक्षिणौ द्वाविमौ रुमण्वद्यौगन्धरायणौ न बभूवतुर्विचलितावङ्गीकृतव्रतपरिपालनात् । देशं प्रति स्वामिनं प्रति च भक्त्या परिपूरिताभ्यां ताभ्यां सा योजना पूरणीयैव । परं भविष्यद्विपत्तिमाकलय्य रुमण्वता प्रोक्तम्—

"मन्त्रिवर ! सुविचार्य सुविरचितेयं योजना कल्याणदायिनी वर्तत एव । परमनिवार्योऽस्मिन् विषये महादेव्याः वासवदत्ताया अवन्तिदेशाधिपस्य महासेनस्य च सहमतिरप्यनिवार्या । अभावायां च तस्यां सहमतौ न कश्चिदप्युपायो सफलीभवितुमर्हति । सुगुप्तरूपेण महादेवीं विश्वासतामानीय गोपालकोऽत्र निमन्त्रयितव्य उज्जयिनीतः । भगिनीहिताकांक्षी स निश्चयेनास्मद्योजनामङ्गीकरिष्यत्येव । सम्भवत्येवं दुहितृवियोगसंरब्धचित्तो महासेनो न शक्नुयात् पालकं महाराजद्वेषिणं भगिनीविपत्समाचारश्रवणप्रकुपितं कथंचनापि छलमाशङ्कमानं संरोद्धुमाक्रमणात् । महाराजस्य द्वितीयस्य विवाहस्य समाचारस्तमतिशयेन रोषाविष्टमानसं विदध्यात् । अतो गोपालकोऽत्रानेतव्य एव ।"

यौगन्धरायणस्य योजना सकलश्च परामर्शोऽतितरामरोचत रुमण्वते । गतौ तौ द्वावेव महादेवीं वासवदत्तामविज्ञातावेवोदयनेन वत्सेशेन । प्रस्तुता च सा योजनाऽविकलरूपेण वत्सदेशोन्नतिकारिणी वत्सेशकल्याणकारिणी चक्रवर्तिपदप्रदायिनी व मगधेशराजकन्यानयनरूपा ।

परं महाविस्मयोऽत्र वर्तते । प्रियपतिविरहसम्भावनयाऽतिविह्वलतां गतापि सपत्नीजन्यमहाक्लेशमाशङ्कमानापि सा पतिव्रतानारीसमुदायतिलकभूता पातिव्रत्यधर्मपालनेन सकलमपि जगच्चमत्कुर्वन्ती भर्तृमङ्गलाकांक्षिणी वत्सदेशाभ्यु-

दयसहायभूता महादेवी वासवदत्ताऽश्रुभरसम्भृतनयनाऽङ्गीकृतवती तां यौगन्धरायणप्रस्तुतां योजनां सुविचारितां गोपालकामन्त्रणं च ।

अन्यस्मिन्नेवाहनि प्रेषितो दूत उज्जयिन्यं गोपालकमामन्त्रयितुमतिव्यग्रहृदया वासवदत्ता भ्रातृमुखदर्शनायेति संदेशेन सह । भगिनीस्नेहासिक्तचित्तो गोपालको न चकार किमपि विलम्बं, समायातश्च कौशाम्बीं सत्वरमेव । तत्क्षणमेवानीतो स यौगन्धरायणेन स्वगृहं रुमण्वता सार्धम्, प्रकटीकृता च सकला योजना विस्तरेण । भगिन्याः भर्तुरभ्युदयाकांक्षिणा गोपालकेनाङ्गीकृता सा योजनाऽतिकष्टप्रदायिन्यपि । परं निवेदितस्तेन तत्र स्वहृदयस्थितः सन्देहः—

"नीतिकुशलोऽयं यौगन्धरायणः स्वामिभक्तश्च येनैतादृशी सकलवत्सदेशाभ्युदयहितकारिणी योजना संयोजिता । परं ह्युपायं चिन्तयता प्राज्ञेन अपायोऽपि चिन्तनीय एव । सहोदरायै मे वासवदत्तायै अतिशयेन स्निह्यति वत्सेशः । न हि तस्याः वियोगं क्षणमपि सोढुं क्षमतेऽसौ । कदाचित् तस्याः प्राणविपत्तिरूपसमाचारदह्यमानहृदयः स्वप्राणानपि जह्यात् ।"

गोपालकस्याशङ्कां निवारयन् प्रत्युदतरद् यौगन्धरायणः—

"राजपुत्र ! तथ्यमेवाभिहितं भवता सुविचारयता वत्सेशस्य महादेव्या सह स्नेहसम्भारम् । परं न वयमुदासीना असावधाना वाऽस्मिन् विषये । प्राणव्ययेनापि वयं रक्षिष्यामः प्राणान् वत्सराजस्य । न कथमपि तेनैकाकिना वर्तितव्यम् । कार्यसिद्ध्यनन्तरं पुनरपि प्रकटतां गता महादेवी द्विगुणतरस्यानन्दस्य हेतुर्भविष्यति महाराजस्य ।"

परामर्श्य गोपालकेन रुमण्वता च सह यौगन्धरायणः प्राप्तवान् वत्सराजम् । अन्वगच्छतां च तौ द्वावपि तम् । उपस्थिताऽऽसीन्महादेव्यपि तत्र । प्रस्तुतः स पूर्वमेव विचारितः प्रस्तावो महामन्त्रिणोदयनसमक्षम् । स प्राह—

"कौशाम्ब्या अविप्रकृष्टान्तरालवर्ती लावणको नाम सुरमणीयो ग्रामः सुरमणीयैर्वनप्रदेशैः परिवेष्टितः भगवत्या कालिन्द्या च निषिञ्चितः। प्रभूतैर्वन्यप्राणिभिः सम्भृतेषु तेषु वनेषु मृगयाक्रीडा परमानन्ददायिनी भविष्यति। कालिन्दीजलक्रीडाविलसितानि च परममनोरञ्जनभूतान्यनुरञ्जयिष्यन्ति। गन्तव्यं चास्माभिस्तत्र मनोविनोदाय सपरिवारैः।"

अनुमोदन्तौ गोपालकरुमण्वन्तौ दृष्ट्वा महादेवीं वासवदत्तां च सोत्साहामनुभूय वनभ्रमणं जलविहारं च प्रति उदयनोऽपि विहारव्यसनी सहमतो बभूव तत्र गमनाय। अन्यस्मिन्नेवाहनि राजादेशः प्रचारितो बभूव सर्वासु दिक्षु।

यौगन्धरायणेन समादिष्टैरनेकसंख्यैः कारुभिर्विरचितं सुविशालं शोभनं शिविरं लावणकग्रामेऽतिरमणीयसर्वसाधनसम्पन्नम्। पृथक्-पृथक् च संरचनाः बभूवुस्तत्र राजपरिवारमन्त्रिसेनापतिसेवकादिभ्यो बहूनां पटकक्षानाम्। शोभने मुहूर्ते संशोधिते सांवत्सरिकैः प्रस्थानं विहितमुदयनेन महादेव्या वासवदत्तया, श्यालेन गोपालकेन, महामन्त्रिणा यौगन्धरायणेन, सेनापतिना रुमण्वता, नर्मसचिवेन वसन्तकेन अनेकैः सैनिकैः सेवकैश्च सह।

अस्ताचलशिखरमारूढे सवितरि व्योम्नि च सन्ध्यारागारुणिमम्नि भविष्यद्वासरावसानचक्रवाकयुगलविरहदायिनि समये सम्प्राप्तो लावणको नाम ग्राम उदयनेन सपरिजनेन। ग्रामवासिनः प्रजारञ्जकस्यास्य वत्सेशस्य समागमदर्शनसुखमनुभवन्तः परमप्रमोदास्पदतां दधानाः हर्षनिर्भराः नृत्यगीतादिभिः स्वागतोपकरणैर्हृदयभावनाः प्रकटयाञ्चक्रुः। उदयनोऽपि स्मितेनैव तेषां प्रकटितस्वागतसम्माननानि स्वीक्रियमाणः दीर्घाध्वयात्राश्रमश्रान्तः शिविरं प्रविष्टः। को वा न लभते जनहृदयानुरञ्जनो जनेशो जनैः हार्दिकस्वागतसम्भारम्।

अन्यस्मिन्नेवाहनि प्रारभतोदयनो मनोहारित्वलावण्यप्रचुरायास्तस्याः ग्राम्य-

वन्यप्रकृतेः रमणीयत्वमपि भोक्तुम् । लावणकग्रामं परितश्च परिवेष्टनरूपेण विस्तीर्णेष्वरण्येषु विहारेषु स निमग्नो बभूव ।

कदाचित् स वासवदत्तया, गोपालकेन मन्त्रिभिरन्यैश्च प्रियवयस्यैः सार्धं निकटवर्तिवनप्रदेशलतानिकुञ्जेषु समुपविष्टो वीणां वादयन्नास्ते । कदाचित् सर्वानेव सहयायिनः शिविर एव परित्यज्य केवलयैकयैव वासवदत्तया हृदयनिर्विशेषया संगतः वनतरुषण्डवल्लरीनिकुञ्जेषु विललास । कदाचिद् यमुनातीरविरूढारुणिमकिसलयसुशोभितस्य कदम्बकस्य छायायां शिलातले वासवदत्ताङ्कशयितशिराः नयनाभ्यां निपीयमान एव तया चिरं घोषवतीं वीणां वादयामास । कदाचिद् वासवदत्तामेकाकिनीमाकृष्य कालिन्दीतीरे कृष्ण इव राधिकरयोरुत्थाय कण्ठालिङ्गनगतां प्रियस्पर्शजनितेन शीतलजलसमुद्भिन्नेन च रोमाञ्चेन सह चिरं मज्जनोन्मज्जनं चकार । कदाचिद् गोपालकेन रुमण्वता च सह कतिपयैरेवाङ्गरक्षकैरनुगतो मृगयाव्यसननिरतो वनेषु सुदूरं यावच्चिचक्राम संख्यातीतसिंहव्याघ्रवृकऋक्षशूकरगण्डकादिपरिवृते तस्मिन्नरण्ये मृगयारसानन्दमास्वादयन् दिवसं यापयामास । कान्तानयनचञ्चत्कटाक्षसन्दयशिक्षिकाणां मृगीणां विलासकामुका एते इति कृत्वा शरव्यानपि हरिणान् स न जघान । एवं च लावणकग्रामे विहरतस्तस्य मासेनैकेन व्यतीतम् । कार्यस्य प्रभूतस्याभिव्यस्ततेति गोपालकः प्रतिनिवृत्तो स्वकीयां जन्मभूमिमुज्जयिनीम् ।

एकस्मिन् दिवसे यौगन्धरायणस्य सङ्केतं परिज्ञाय रुमण्वता सुविप्रकृष्टं नीतो वने मृगयाव्याजेनोदयनः । प्रियवयस्यस्तस्य वसन्तकोऽपि नराधिपमनुजगाम । इतश्च यौगन्धरायणेन तैश्च तैश्च व्याजैः कृतककार्यैः शिविरस्थिताः सैनिकाश्चेट्यश्च सुदूरं प्रेषिताः । तदनन्तरं पूर्वमेवानीतः शवः कस्याश्चिदनाथायाः स्त्रियः वासवदत्तायाः कक्षे निहितः । पुरुषस्यैकस्य शवमपि स्वकक्षे सन्निधाय स संररक्ष वासवदत्तां महादेवीमेकस्मिन् सुदूरस्थिते निकुञ्जे सुनिभृतं च तेन प्रक्षिप्तमेकं तैलादिज्वलनद्रव्यक्लिन्नं ज्वलदलातकं शिविरस्यो

परि। वस्त्रकाष्ठादिनिर्मितं तच्छिविरं सत्वरमेव वह्निपरिगतं समभूत्। गगनचुम्बिभिर्ज्वालाजालैः समावृताः दिशां प्रान्तभागाः समजायन्त। विरहाग्निदह्यमानहृदयया वासवदत्तया प्रदत्तेन सन्तापेन च वर्धमानेनेव रागेणारुणीभूतमिव गगनं समदृश्यत। शिविरं च ज्वलनज्वालापरिवेष्टितं चटचटायन्तमवलोक्य कतिपयक्षणपर्यन्तं स्तब्धीभूतचित्तो यौगन्धरायणः किमपि मनसा सन्धार्य प्रतस्थे मगधसीमानं प्रति वासवदत्तया सह।

सायसमयोऽपि व्यतीतः। पश्चिमदिशि क्षितिजवर्णरेखा शनैः शनैः तिरोधातुमारेभे। सुदूरगगनप्रान्तेभ्यश्च पक्षिणो निवर्तन्तः स्वकुलायान् संप्राप्य शिशुभ्य आहारं प्रायच्छन्। ग्रामगोष्ठेषु परावर्तमानानां धेनूनां धूलिभिः व्योम धूसरितं बभूव। रुमण्वता सह मृगयाव्यसनिना वत्सेशेन शिविरं परावर्तमानेन दूरादेव श्रुतः कोऽपि करुणार्द्रहृदयविनिर्गतः करुणक्रन्दनध्वनिः। सूर्यास्तसमयपूर्वमेव सकले सैनिकाः सर्वे च सेवकाः यौगन्धरायणादिष्टकार्याणि सम्पाद्य तत्रागत्य प्रलयकालज्वालाजालपरिगतं शिविरमालोक्य किंकर्तव्यताविमूढाः सन्तोऽतिष्ठन् परिवृत्य तं शिविरम्। ज्वलनशीलद्रव्यविनिर्मितस्य शिविरस्याग्निनिर्वापणस्य सम्भावनाऽप्यसम्भवेति विचारयत्सु तेषु स्वयमेव वह्निदेवः प्रशान्ततां गतः। विचेतुमारेभे च ते तत्र कस्यापि प्राणानामपहरणं कृतमनलेन न वेति। सहसैकस्मिन् स्थाने दृष्टस्तैरेको महिलाशवः सुविदग्धः कज्जलाभः। निश्चयेनेयमस्मत्स्वामिनी नीता दिवं वह्निदेवेनेति विलपन्तस्तेऽन्यत्रापश्यन् कञ्चन पुरुषशवम्। निस्सन्देहोऽयं शवो यौगन्धरायणस्यैव महामन्त्रिणो वर्तते सर्वान्निवास्माननाथान् कृत्वा दिवं गतस्य।

दहनावशिष्टशिविरस्थानाद् द्वावेव तौ शवौ निष्कास्य कज्जलीभूतावपरिचीयमानौ परितो लुठतां तेषां करुणक्रन्दनध्वनिः सुविप्रकृष्टं सर्वासु दिक्षु प्रससार। हा महादेवि वत्सेशहृदयप्राणवल्लभे! कथं वयं जीवनं धारयामः? कथं कृत्वा वा मुखमस्माभिः दर्शयितुं शक्यते वत्सराजसमक्षम्? कथं वा जीवि-

ष्यति देवो वत्सराजो नाकं समारूढायां भवत्याम् ? हा कूटनीतिप्रयोगकुशल ! कार्यसाधक ! राजविद्याप्रणयिन् ! वत्सदेशप्रजाहृदयाह्लादक ! यौगन्धरायण ! महामन्त्रिन् ! कुत्र गतस्त्वमस्माननाथान् विहाय ? महाराजोऽपि भवत ईदृशीमवस्थामवलोक्य किं विधास्यनीति न जानीमः। निश्चयेन तस्य प्राणधारणं दुष्करमेव। किं वा वयं करिष्यामः जीवलोके ? वरमस्माकमपि स्वामिनीं वासवदत्तां महामन्त्रिणं यौगन्धरायणं चानुसरणम्। हा देवताः ! किमिदं भवतीभिः कृतमप्रत्याशितम्। निश्चयेन पापानामेवानेकजन्मसञ्चितानां फलमस्माकम्।

सेवकानामिमानि करुणक्रन्दनानि दूरादेवाकर्ण्य परमानिष्टमाशङ्कमानो बहिरुच्छलन्तं हृदयं कथमपि संस्तभ्योदयनस्त्वरितगत्या घोटकं वाहयन् प्राप्तो लावणकशिविरस्य नं क्षणेनैव। अग्निसाद्भूतं च तं विलोक्यैव शिविरं न शशाक क्षणमपि स्थातुं घोटके। निगीर्णाः प्राणाः पावकेन वासवदत्तायाः हृदयप्राणवल्लभायाः यौगन्धरायणस्य महामन्त्रिणश्च प्राणेभ्योऽपि प्रियस्येति विज्ञायैव स परिगतः कयापि हृदयोन्मथिन्या सर्वस्वहारिण्याऽनिर्वचनीयया व्यथया। उन्मत्ततां गतेन तेन सकलान्याभरणानि दूरतो विक्षिप्तानि तत्क्षणं स्तम्भितेनेव चित्रलिखितेनेव च समजायत। तदनन्तरं च तेन वस्त्राण्याकृष्य खण्डशः कृतानि केशाश्चापि बलेन लुञ्चिताः। हा वासवदत्ते ! कामदेवरतिरिव रतिप्रदायिनि ! हा यौगन्धरायण ! वत्सदेशरक्षक ! कथमहं द्वाभ्यामेव युवाभ्यां विनाऽस्मिन् जगत्यरण्यसदृशे प्राणान् धारयितुं क्षमः। अर्पयामि तावदहमपि स्वात्मानं तस्यै एवानलदेवतायै यो युवयोः प्राणाभिलाषी बभूव। तारस्वरेण क्रन्दमानेन भूम्यां लुठता रजोविभूषितसर्वगात्रेण तेन नासादिता कथमपि शान्तिः। लावणकग्रामस्य विभिन्नप्रदेशान् तर्जन्याङ्गुल्या सङ्केतयन् विललाप—

"हा वासवदत्ते ! मदङ्कप्रणयिनि ! अस्मिन्नेव स्थले तवाङ्के शिरो निधायाहं वीणां घोषवतीं वादयन् मन्मुखासक्तैकाग्रावलोकनेन भवत्या प्रसादितः। अत्र त्वया परिहसितं विविधैः परिहासवचनैः, अत्र त्वया विलसितं नानाक्रीडानिर्भरैर्विलासैः, अत्र च त्वया शयितं रतिविलासानन्दकरम्।"

विविधं च करुणक्रन्दनसंलग्नचित्तशरीरं तमुदयनं कथमपि सान्त्वयितुं न क्षमाः बभूवुः रुमण्वद्वसन्तकादयः सचिवाः सखायश्च । मूर्छैव स्वाङ्के निधाय तं विलपन्तं प्राशामयत् ।

वत्सराजस्य करुणदशामवलोक्य कथमपि महद्भिः प्रयासैः मनो वशीकृत्य रुमण्वता नोद्घाटिता पद्मावतीविषयिका स्वकीया योजना । शीतलोपचारैश्च सचेतनं विधाय तं ते नीतवन्तः प्रसभमेव शिविराविप्रकृष्टवर्तिनि सुरभितकुसुम-विभूषिते तरुषण्डमध्ये पुनरपि पुनो विलुण्ठन्तं कदुष्णभस्मनि दहनावशिष्टे । शयनादिकं च विरचय्य गृहीतस्वल्पाहारं स्वापयामासुश्च । उदयनोऽपि रुदन-क्रन्दन-लुण्ठन-वक्षस्ताडन-पतनादिपरिश्रान्तो निद्रया परमसुखदायिन्याऽङ्के गृहीतः सुप्तश्च । रुमण्वदादयोऽपि सकलदिवसं मृगयादिव्यापारपरिश्रान्ताः शीघ्रमेव निद्रावशंगताः बभूवुः ।

निशीथे सुदूरवर्तिनि प्रान्तरभागे सुमत्थितो ध्वनिः केकेव मयूरशतषण्डस्य । मध्ये मध्ये च झिल्लीझङ्कारविमिश्रितं प्रियविरहविह्वलचक्रवाककरुणविलपनमपि सर्वतः प्रसरितम् । सहसैवोदयनो निद्रोत्थितः शयनं परित्यज्येतश्चेतश्चावलोक-यितुं प्रवृत्तः । कुत्र सा वासवदत्ता यस्याः प्रगाढालिङ्नपाशे निबद्धस्य मम निष्प्रयोजनं निरर्थकं वा जल्पतः क्षणयामेव यामिनी व्यत्येति । मनसः रञ्जनी कुत्र सा मे प्रियेति भावयता तेनावलोकितो विरहिजनसन्तापजनकः शीतरश्मि-रपि चन्द्रो मध्याकाशे । अनायसेनैवाविचारयतोऽपि तस्य चरणौ प्रचलितौ यमुनातीरं प्रति ।

प्रभामत्तश्चन्द्रश्चन्द्रिकामेव सकलजगति प्रसारयन् मनोरञ्जन्या रजन्या-लिङ्गितः प्रहसन्निव वियोगिनां हृदयानि क्रकचविदारणपीडानिपीडितानि कुर्वन्ना-सीत् । ज्योत्स्नास्नातं च सर्वं जगद् रजतद्रवालिम्पितमिव समदृश्यत । चन्द्रिका-स्पर्शेण धवलीभूताभिर्लहरीभिः द्रवीभूतमिव रजतं प्रवाहयन्ती कालिन्दी कृष्ण-स्पर्शजनितं कृष्णभावमपहाय मन्दाकिनीरूपमभिव्यञ्जयति स्म । समुच्छलन्नील-

जलभावेन क्वचिच्च लहरीषु सुगौररूपशोभमानवदनमिव कस्याश्चित् कामिन्याः कृष्णकुन्तलराशिपरिवृतं प्रतीयाय ।

क्षुपलतातरुगहनषण्डमध्ये कथमपि मार्गमन्वेषमाणः स कारुण्यमूर्तिरुदयनः सम्प्राप कालिन्दीतीरम् । कुत्र मे प्रिया भविष्यतीति चिन्तयन्नेव कदाचिद् व्योम्नि विहसितनक्षत्रसमूहमध्ये, कदाचिद् रजनिरमणचन्द्रिकायाम्, कदाचित् क्षुपलतानिकुञ्जेषु, कदाचित् कदम्बतरुतले, कदाचित् कालिन्दीसैकतप्रदेशे, कदाचिच्च मन्दपवनविलोलितजललहरीषु दृष्टिं व्यापारयन्नुष्णं च निःश्वस्य विक्षिप्तहृदयः प्रस्तरफलके सरित्तीरवर्तिन्येकस्मिन् निषसाद ।

"वासवदत्ते ! हृदयसर्वस्वभूते ! प्राणेश्वरि ! मनोरञ्जनभूते ! कुत्र गता त्वम् ? किं न कथयिष्यसि निभृत पृष्ठतः समागत्य नयने करकिसलयाभ्यां पिधाय काहमिति ? अहमपि च ते करौ कराभ्यामागृह्य त्वां प्रसभादाकृष्य वक्षसि गाढालिङ्गनसुखमनुभवन् निमीलितनयनसुरूपं प्रस्फुरिताधरोष्ठं लज्जावनमितं वदनमुन्नमय्य कथं वा कपोलसंस्पर्शजनितरोमाञ्चितो भविष्यामि । किं त्वं नयननिमीलनक्रीडानिर्भरा सती पिहिततनुः वर्तते कदम्बपृष्ठतः ? आयाहि आयाहि रे वन्दनीये ! वासवि ! मे रञ्जने वासवदत्ते ! न त्वया विना क्षणमपि स्थातुं क्षमः ।

निश्चयेन कालिन्दीनीलसलिलपिहितवदना त्वं कुञ्चितकुन्तललहरीभिराच्छादिता पवनविलोलिततरङ्गाङ्गुलिभिरामन्त्रयति मां जलक्रीडाव्यसनिनी । तिष्ठ तिष्ठ आगच्छामि त्वामङ्के निधाय कण्ठालिङ्गनार्पितभुजवल्लरीं वक्षसि कृत्वा विविधजलविहारविलसितान्युपभोक्तुम् । प्रतिज्ञातं त्वयानेकशोऽनेकजन्मजन्मान्तरान्वेषणतत्परस्य कथमप्यस्मिन् जन्मनि समधिगतत्वत्प्रियरूपस्य मे पुण्यसलिलप्रवाहिणीं सकलकल्मषापहारिणीं स्वर्गकृतावतरणां स्वर्गसोपानां मन्दाकिनीरूपां कालिन्दीं साक्षीकृत्य न सक्षमाहं त्वया विना प्राणान् धारयितुम् । त्वमेव मे गतिः,

त्वमेव मे प्रेयानिति । तत्कथमेकाकिन्येव स्वर्गसमसुखान्युपभोक्तुं प्रथममेव प्रणष्टा । प्रतीक्षस्व प्रतीक्षस्व । मयैव सह तत्र रम्याणि रमयिष्यसि ।"

इत्येवंप्रायैः वचनैः सुचिरं विलप्योन्मत्तक इवोदयनो यदैव संदधाति स्वकीयौ चरणौ सुशीतले तटसन्निहितकालिन्दीनीरे, तदैव रुमण्वता वसन्तकानुगम्यमानेन गृहीत्वा शुष्कसैकतप्रदेशमानीतः । कथमपि समाश्वास्य निवेदितं रुमण्वता—

"देव ! अतिभीतिप्रदेन, हृदयविद्रावकेणासम्भावनीयेन च वृत्तान्तेन शोकविगलितान्तःकरणाः सन्तो न जानीमः किं कर्तव्यमिति । तथापि नास्त्यत्र कश्चिदन्यो मार्गः सम्भवति । धैर्येण मनोऽवलम्ब्य व्यथा सहनीयैव । भवानेव यदि धैर्यविच्युतो भूत्वैवं प्राणपरित्यागसमुत्सुको भविष्यति, का गतिर्भविष्यत्यन्येषामस्मत्सदृशानां भवन्तमेवाश्रित्य स्थितानाम् । सर्व एव भवत्सेवकाः भवन्तमनुसरिष्यन्ति । इयमेव गतिर्भविष्यति सर्वेषामेव प्रजाजनानाम् । एवं चास्य वत्सराज्यस्य लोकविश्रुतपाण्डववंशस्य च नावशिष्यते नामापि जगत्याम् । प्रजानां पालको रक्षकश्च भवान् । लोकाराधनमेव कुलव्रतं भवति भवत्सदृशानामुच्चकुलावतंसानां वसुधाधिपानाम् । प्रजानां रक्षणाय शत्रूणां च विनाशाय सहनीयमेव भवतेदं दुःखं महादेवीविरहजन्यं महामात्याभावेन च प्रवृद्धिं गतम् ।

अपि च, शिविरदाहदहनकज्जलीभूतौ द्वौ शवौ यौ दृष्टौ, तौ महादेव्याः महामात्यस्य चैव वर्तेते, इति न निश्चयेन कथयितुं शक्यते । न केनापि दृष्टौ तौ वह्निना दाह्यमानौ । अन्ययोः कयोश्चिदपि जनयोस्तत्र ज्वलनमपि सम्भवति । दहनभयेन त्रपया च तौ कुत्रचिद् गतावित्यपि सम्भावना । अथवा कूटनीतिप्रयोगोऽप्यत्र महामात्येन कृतो भवेत् ।"

एवं च पुनः पुनरपि रुमण्वता वसन्तकेन च कदाचिदश्रुभरनयनसगद्गदवचनैः कदाचिदनुनयवाक्यैः कदाचिच्च लोकसेवापरिचायकैः दृढविश्वाससम्भृतै-

रुपदेशैः करयुगलबद्धाञ्जलिचरणपतनादिसहितैः समाश्वासितः स प्रजानामनुरञ्जने चिरादनुरक्त उदयनः । प्रजानामेव हितकामुकेन तेन कथमपि प्राणानां तत्क्षणं रक्षणमेव समुचितमवलोकितम् । गरीयसीं वासवदत्तामनुसर्तुं प्रवृत्तान् निःश्वासैः सहोद्गन्तुमुद्यतान् प्राणान् स कथमपि रुरोध । प्रजारञ्जनं पालनं च राजधर्मो वर्तते । न च राजानः स्वसुखभोगाय जीवन्ते । तेषां मनः, प्राणाः, शरीरं, बुद्धिः, क्रियाश्च सकलाः प्रजानां कल्याणायैव भवन्ति ।

अपि च, समवलोकितोदयनेन काऽप्यतिक्षीणाशारेखा दीप्यन्ती क्वचिदप्यतिदूरवर्तिनी क्षितिजे । सम्भाव्यते यद् यौगन्धरायणेन रक्षिता भवेन्मम प्रिया । अतिकूटनीतिनिपुणः स स्वामिभक्तो मे मन्त्री । सर्वदा वत्सदेशस्य मम च हितकामनायामेव तस्य मनोबुद्धी प्रवर्तेते । वासवदत्तायां विषयभोगेषु च प्रबलरूपेणासक्तं मां विचार्य अन्यत्किमप्यभ्युदयजनकलक्ष्यं वा मनसि कृत्वा तेन मे प्रिया क्वचिद् रक्षिता भवेत् । स्वयं च तस्या रक्षणे तत्परो भवेत् । अन्यथा कथं सम्भवति सति तस्मिन् तादृशे बुद्धिमति यौगन्धरायणे तस्यां च बुद्धिशालिन्यां वासवदत्तायां शिविरेऽत्र एतादृशः सर्वग्रासकोऽग्निदाहस्तयोश्चात्र भस्मीभवनम् ।

एवं विविधं कल्पयन् भविष्यन्मिलनाशापरिगतचित्तः स उदयनः रुमण्वद्वसन्तकादिभिः सुसचिवैः परिवृतः सेनया सह कौशम्बीमेव प्रतिनिवृत्तः ।

इतश्च यौगन्धरायणो दधार कस्यचिदपि व्रतपरायणस्य स्वीकृतपरिव्राजकनियमस्य ब्राह्मणस्य वेषम् । सुशोभितानि तेन विविधाङ्गानि–ललाटः कुङ्कुमतिलकेन, ग्रीवा रुद्राक्षमालया, वक्षो यज्ञोपवीतेन, बाहुमूले पृष्ठमुदरं च चन्दनस्थासकैरिति । दक्षिणकरे पलाशदण्डः सव्ये च अलाबुविरचितः कमण्डलुः शुशुभे । शिरसि दीर्घबभ्रुजटाः धारयन्तं कृत्रिमश्मश्रुभिश्चाच्छादितवदनं तं न कोऽपि परिचेतुं शक्नोति । सरलब्राह्मणीवेषधारिण्या वासवदत्तयाऽनुगम्यमानः स प्रस्थितो मगधदेशस्य सीमानं प्रति ।

अधुना सा महादेवी वासवदत्ताऽऽसीदावन्तिकानाम्नी ब्राह्मणी, यस्याः पतिः प्रव्रजितः क्वचिदपि विदेशेषु कार्यवशेन। अङ्गीकृतपरिव्राजकव्रतस्तु स ब्राह्मणो न शशाक लावण्यवतीं नवयौवनभारसम्भृतां स्वदुहितरं स्वगृहे रक्षितुम्। राजरक्षितव्याश्च सर्वाः प्रजा इति स मगधराजधानीमेव राजगृहाभिधेयां गच्छति। का शक्तिः कस्यापि रक्षितुं चपलयौवनजलौघसम्भृतां सरितमिव युवतीं रक्षितुम्।

कतिपयैरेवाहोभिः प्रचलन्तौ तावासादयामासतुः राजगृहस्य बाह्योद्यान-प्रदेशान्। नगरात् स्वल्पान्तरालवर्तिन्यां भूमौ ताभ्यामवलोकित तपस्विजनयोग्यं तपोवनमेकम्। सुदूराध्वपरिचलनश्रमपरिश्रान्तौ तौ प्रवेशोत्सुकौ बभूवतुस्तत्र विश्रामकाम्यया। कांश्चित् क्षणान् विश्रम्य, सलिलमाचम्य, किञ्चिदाहारजातं परिभुज्य विगतश्रमावसादौ तौ नगरप्रवेशं करिष्यत इति। परमाश्चर्यक्षोभा-भ्यामेव तयोस्तत्र स्वागतं कृतम्।

महानासीत्तत्र तपोवने कस्यचिन्महत्तरजनस्य सेवकानां कलकलः। द्वारि च प्रभूतसंख्यकैः सैनिकैरास्थीयत। निवारितमासीच्च तैः कस्यचिदपि पथिकस्य प्रवेशस्तस्मिन् तपोवने। अनेके सेवकास्तपोवनं परितः सम्भ्रमन्त आसन्। अपसरत भो! अपसरत! इत्युद्घोषमाणैर्दण्डहस्तैस्तैः सुदूरं चोत्सार्यमाणाः विश्रामोत्सुकाः पथिकजनाः अतिव्यथितमनसो विप्रकृष्टमेव स्थिताः। अनुभव-न्त्येवापमान सामान्यजनाः विशिष्टपदभाग्भिः सौभाग्यशालिभिः।

आश्चर्येण, क्षोभेण अपमानेन च परिखिन्नचित्तेनापि कार्यसाधनसंलग्नमनसा यौगन्धरायणेन कथमपि साहसं कृत्वा समीपमागत्य सविनयं पृष्टः कोऽपि सेवकः—

"भट्टवर! कथमत्रैतादृशो हलचलः? कस्माच्चापसार्यन्ते वराका एते पथिकाः विश्रामोन्मुखाः शरणमन्यत्रालभमानाः?"

आसीत्सोऽपि सेवकः कश्चिदुच्चकुलावतंसो भाग्यक्रमेण भृत्यभावं प्रपन्नश्च । परिव्राजकवेषं ब्राह्मणरूपधरं तं स सविनयमुदतरत्—

"ब्रह्मन् ! दूरादेवागतो भवान प्रतीयते । मगधराजस्य प्रद्योतस्य जननी स्थिता चित्रकूटवर्तिनि तपोवने वानप्रस्थाश्रममङ्गीकृत्य । महाराजस्य सुता राजकुमा.ी पद्मावती गतासीत् तत्र मातामहीदर्शनाय । निवर्तमाना सा पितुः राजधानीमभिलषत्यत्रैव नगरबाह्यप्रदेशस्थितेऽस्मिन् तपोवने रजनीमेतां व्यत्येतुं प्राकृतिकरमणीयताकृष्टहृदया । प्रभातवेलायामेव सा प्रस्थास्यति राजभवनाय ।"

एवंविधवार्तालापे संलग्न एव यौगन्धरायणे तपोवनाद् बहिरायातेनैकेनान्येन सेवकेनोद्घोषितं तारस्वरेण—

"भो भोः तपस्विनः ! परिव्राजकाः ! सन्यासिनः ! आश्रमवासिनोऽन्ये च याचकगणाः ! मगधदेशराजकन्या पद्मावती गतासीन्मातामहीदर्शनाय चित्रकूटवर्तिनं तपोवनम् । परावर्तमाना स्वगृहं सा विश्राम्यत्यत्रैव तपोवने रजन्यां त्वद्य । याचकानां कामना पूरणीयेति व्रतं तयाऽङ्गीकृतम् । निवेदयन्तु भवन्तः स्वकीया अभिलाषाः राजकन्यासेवायाम् । यथाशक्ति पूरयिष्यति सा परमोदारस्वभावा स्वामिन्यस्माकं भवतां कामनाः ।"

घोषणामेतामाकर्ण्य मनसि बभूव यौगन्धरायणस्य—'विधिः साधयतीव मे कार्यमत्रैव । समर्पणीया महादेवी वासवदत्ता अत्रैवास्याः राजकन्याया आश्रये निक्षेपरूपेण । यथायोग्यं च विधास्ये भविष्यति काले विचार्य । इयमपि परीक्षिष्यते पद्मावत्याः रूपगुणशीलादिकानि ।' विचारेणैतेन सहमतया वासवदत्तयाऽवगुण्ठनवत्या चानुमतश्चानुगतः सन्मतिशाली स महामन्त्री न्यवेदयत् तं सेवकम्—

"याचकोऽहम् याचकोऽहम् । नयत मां राजकन्यासमीपम् ।"

सेवकमनुगच्छन् यौगन्धरायणो ददर्श तां रूपेण शीलेन च प्रथितां रमणीरत्नरूपां मगधराजवंशविभूषणां राजकन्याम् । ननु विधात्रा प्रकृतेः सकलरमणीयोज्ज्वलद्रव्यसारशकलान् संगृह्यैव सा निर्मितासीत् । रूपेणाकृत्या चैव साऽन्तःकरणोदारस्वच्छतामभिव्यनक्ति । वासवदत्तायाः योग्यैव भगिनी भविष्यतीयं पद्मावतीति विचिन्त्य न्यवेदयद् यौगन्धरायणः करयुगलं संयोज्य—

"राजकन्ये ! सुतेयं ममाऽऽवन्तिकानाम्नी । प्रवासं गतोऽस्याः भर्ता प्रयोजनवशात् अहमपि परिव्राजकव्रतमुपपन्नो ब्राह्मणः सदैव विश्वंभरायाः विभिन्नेषु प्रदेशेषु भ्रमामि । न च रक्षितुं पारयामि एनां रूपेणासाधारणेन नवयौवनेन च समलङ्कृताम् । रक्षणीयेयं भवत्या न निवर्तते यावन्मे जामाता । इत्येव मे याचना मनसश्चाभिलाषा ।"

अङ्गीचकार च सा पद्मावती ब्राह्मणपरिव्राजकस्य प्रार्थनामतिविनयसम्पन्नया प्रभावशालिन्या च गिरा प्रस्तूयमानाम् । आवन्तिकाया अलौकिकसौन्दर्येण महोच्चकुलयोग्ययाऽऽकृत्या च सा चमत्कृता बभूव । स्वकीयं मनोरथं च सफलीकृत्य अतितरां प्रहृष्टो यौगन्धरायणोऽपि पद्मावत्या विसृष्टो गतः किञ्चिदप्यभीष्टस्थानं स्वयोजनापूरणाभिलाषी । अन्यस्मिन्नेव दिवसे पद्मावत्यपि प्राप्ता स्वराजभवनं वासवदत्तया सह ।

आवन्तिकाया रूपेण, सौकुमार्येण, स्वभावेन, शिष्टसमुज्ज्वलव्यवहारेण चमत्कृता पद्मावती न तां मेने साधारणकुलोत्पन्नाम् । निश्चयेनेयं कस्मिंश्चिदप्यसाधारणे गौरवशालिनि ब्राह्मणवंशे समुत्पन्ना साधारणवंशे च विवाहिता कामपि महतीं विपदं प्राप्ता दिनानि गमयति इत्येवं मन्यमाना पद्मावती स्निह्यत्यतिशयरूपेण समादरं च व्यवहरति ।

पद्मावती समुचितावसरेषु प्रायतत विज्ञातुं यथार्थपरिचयमावन्तिकाया । परमेतादृशेषु प्रश्नेषु सत्सु सा वासवदत्ता अश्रुभिरार्द्रे नयने पद्मावतीवदने संयोज्य

एकाग्रदृष्ट्या तन्मुखमवलोकयन्त्येवासीत् । न सा कथमपि स्वकीयान्तःकरण-भावनाः प्रकटयन्ती बभाषे वचनमेकमपि । आवन्तिकायाः गम्भीरस्वभावेन न साहसो बभूव पद्मावत्याः पुनरनुरोधं कर्तुम् । पद्मावत्याः जननी मगधराज-कुलमहादेव्यप्यावन्तिकावेषधारिण्याः वासवदत्तायाः निर्मलसौन्दर्येण शिष्टस्वभा-वेन विनम्रव्यवहारेण च समुपजातस्नेहा स्वसुतामिव तां मेने ।

प्रियतमविरहविह्वला सत्यपि वासवदत्ता हिमनिपीडितकमलिनीव म्लानव-दना मलिनवस्त्राण्येवावधारयन्ती पद्मावत्याः कन्यान्तःपुरे कथमपि समयं यापयन्ती तिष्ठति पुनरपि प्रियमिलनवेलाप्रतीक्षणपरा । प्रायशः सा अन्तःपुर-वाटिकायामेव पुष्पाण्यवचिनोति स्रजश्च ग्रथ्नाति । पद्मावत्या पुनः पुनरपि प्रसाद्यमाना न कथमपि हृदयान्तर्निहितवेदनां प्रकटयति । केवलं गहनपीडास-म्मिश्रिता स्मितरेखा तस्या ओष्ठयोर्विलसति ।

एकस्मिन् समये कन्दुकक्रीडया मनो विनोदयति स्म पद्मावती सखीभिः सह कन्यान्तःपुरप्राङ्गणे । वासवदत्ताऽपि ग्रथ्नाति जातियूथिकामालतीमल्लिकाकु-न्दसिन्दुवारचम्पाचम्पकादिसुरभितविकसितनवप्रसूतप्रसूनानां स्रजः । सहसैव तीव्रगत्या प्रचलितेन कन्दुकेन कर्णमूले प्रहता सा करुणमाक्रन्द्य भूमिपृष्ठे निप-तिता । क्रीडां झटित्येव परित्यज्य समायाता त्वरितगत्या पद्मावती तत्रैव ससखी । वासवदत्तामुत्थाप्य शिरस्तस्याः स्वाङ्के निधाय भूमावेव स्थिता सा । स्वल्पेनैव समयेन न्यूनीभूतायां वेदनायां समुपगतचेतना समुत्थिता वासवदत्ता । तदनन्तरं तासां पद्मावतीसखीनां प्रावर्तन्त मिथो जल्पतानि अब्रवीच्चैका—

"समागतोऽस्माकं मगधेशस्य महाराजस्य सेवायामुज्जयिनीतः सन्देशहर एकः । अवन्त्यधिपश्चण्डप्रद्योतमहासेनोऽभिलषति मगधराजकन्यां पद्मावती

स्वपुत्रवधूरूपेण ज्येष्ठपुत्राय पालकाय । परन्तु न निश्चयं कर्तुं पारयति महाराजः किं करणीयमस्मिन् विषये ।"

पद्मावतीविवाहप्रसङ्गे जनकस्य सहोदरस्य च नामग्रहणं निशम्यौत्सुक्य-भावभरितहृदया वासवदत्ता समुन्नतमुखी बभूव । परं कथमपि संस्तभ्याऽऽत्मानं नोच्चार्य चैकमपि वचनं तूष्णीं स्थितैव तासां जल्पितेषु ध्यानं दधौ । द्वितीया सखी प्रोवाच—

"अभिलषति स्मास्माकं स्वामी मगधराजः परिणयोऽस्याः प्रियसख्याः राजकन्याया उदयनेन वत्साधीशेन सह । परमानीता यदा तेनाऽऽवन्तिका वास-वदत्ता कौशाम्बीराजप्रासादे महादेवीपदाधिष्ठिना च कृता, परित्यक्ता साऽभि-लाषा तेन । वासवदत्तासक्तचित्ताय वत्सेशायोदयनाय सुतायाः पाणिं ग्राहयित्वा नोत्सहेऽहं कथमपि तां सपत्नीजन्यदुःखदुखितामवलोकयितुमिति । वासवदत्ताप्रकरणानन्तरमपि वत्सदेशागतान् सन्देशहरान् वत्सेशेन सह प्रियसखीसम्बन्धसमुत्सुकान् स निवर्तयामास प्रस्तुतप्रस्तावमसहमानः ।"

तदैव तृतीया सखी पद्मावतीमुखमवलोकयन्ती जगाद—

"परमस्माकं प्रियसखी तु वत्सेशमेवाभिलषति तद्रूपगुणानुरागिणी, परं नारीसुलभलज्जया न किमपि कथयति ।"

श्रुत्वैतद् वचनं तस्या उषःसमयारुणिमशोभामपि लज्जयन्तौ पद्मावतीक-पोलौ शोणितोत्पलपूर्णाविव सञ्जातौ । मुखमवनमय्य सा चक्षुषी भूमौ निधा-याङ्गुलीभिरुत्तरीयप्रान्तभागं निपीडयितुमारेभे । पद्मावत्याः हृदयस्य भावनां परिलक्ष्य वासवदत्तायाः हृदयमप्यनिर्वचनीयया पीडया सम्भृतम् ।

एतादृशेषु रहस्यालापेषु संप्रवृद्धेषु समायाता त्वरितगत्या धावन्ती सख्येका,

तत्र स्थित्वा च पद्मावतीचरणसमीपे उच्चैः निःश्वसितुमारेभे श्रमपरिश्रान्ता। ससम्भ्रान्तं च सर्वाभिरपि समभूयत। राजकन्यया साग्रहं पृष्टा सा किञ्चिद् विहस्य उच्छ्वसितेन सह बभाषे—

"स्वामिनि ! श्रुतं मया कर्णपरम्परया हृदयविद्रावणोऽयं समाचारः। वनविहाराय गत आसीदुदयनो वत्सेशो लावणकग्रामे। प्रविष्टे च तस्मिन्नेकस्मिन् दिवसे मृगयायै गहनारण्ये वह्निज्वालाभिः परिवृतोऽभूत् तत्र लावणकग्रामस्थितं शिविरम्। सायं समये परावर्तमानेनोदयनेनावलोकितं वह्निदेवेन सर्वतोऽप्यालीढं तच्छिविरम्। करुणक्रन्दनपराणां सेवकसेविकानां प्रवहदश्रुसिक्तकपोलानां साहाय्येन सम्प्राप्तौ तत्र द्वौ मृतकशरीरौ वह्निना दग्धौ ! नियतरूपेण महादेवी वासवदत्ता महामन्त्री यौगन्धरायणश्च वह्निनाऽऽस्वादिताविति सोढुमशक्येन क्रकचहृदयविदारणसदृशेन व्यथाभरेण व्यथित उदयनस्तत्परोऽभूत् तस्मा एव वह्नये प्राणानर्पयितुम्। कः सहृदयः क्षमेत प्राणान् धारयितुं जीवितादप्यधिकप्रियजनविरहे। परं रुमण्वदादिभिः मन्त्रिभिः परिजनैश्च कथमपि बलान्निरुद्धः समाश्वासितश्च स कौशाम्बीं नीतः।"

निशम्यैतां वार्तां वासवदत्ता नयनसलिलानि प्रवाहयन्ती दीर्घमुष्णं च निःश्वसितवती। किमर्थं त्वया रुद्यत इति पृष्टा च पद्मावत्या सोदतरत्—

"प्रवासं गतस्य प्राणनाथस्य स्मरणमेवात्र कारणम्।"

लावणकग्रामस्य प्रलयदाहसमाचारानाकर्ण्य विक्षोभ इव सञ्जातः पद्मावत्याः सखीनां मध्ये। जल्पनाश्च तत्र विविधाः समुदभवन्। काचनाकथयत्—

"निश्चयेन पूरिता भविष्यति मनोकामनाऽस्माकं प्रियसख्या इदानीम्। वासवदत्ताऽभावे महाराजो मगधेशः स्वीकरिष्यति राजसुतायाः पाणिग्रहणमुदयनेन वत्सेशेन सह।"

जल्पनास्वेतादृशीषु सतीषु काचिद् वेगेन प्रधावन्ती समागतैकान्या सखी पद्मावत्याः समुच्छ्वसन्ती च प्रोवाच सगद्गदम्—

"पुरस्करणीयाऽहं राजकन्यया मनोऽभिलषितेन प्रभूतेन पुरस्कारेण, या समागतास्मि तद्धृदयकमलविकसितकरं समाचारमेतं मनसि निधाय।"

कीदृशः समाचारः ? कथं वा स प्रियसखीं प्रसादयिष्यति, कथमवगतं त्वया ? केन वा त्वं प्रेषिता ? इति प्रश्नवर्षया सम्भ्रमितेव सा पुनः पुनरनुरुध्यमाना सर्वाभिरेव सखीभिः साग्रहं श्रावयामास—

"कौशाम्ब्याः समागतानां दूतानां प्रस्तावमङ्गीकृत्य सहमत एव वर्तते महाराजः प्रियसखीं पद्मावतीं वत्सेशायोदयनाय प्रदातुम्।"

निशम्यैतामेव जल्पनां तस्याः परिहासपेशलास्ताः सर्वा एव सख्यः निषेचयितुमारभन् पद्मावतीं परिहासवचनैः। विविधं च तां चञ्चद्भ्रमितनयनां चक्रिरे। अन्तःकरणे मनसि च प्रफुल्लिता सा बाह्यकोपं प्रदर्शयन्ती तर्जयन्ती च प्रियसखीः बभूवारक्तमुखी सान्ध्यक्षितिजशोभेव। कञ्चित् कालं यावत् हासपरिहासानन्तरं गतवती सा स्वकन्यान्तःपुरकक्षमेवावन्तिकया सह।

वत्सदेशमहादेवीं वासवदत्तां पद्मावत्याः संरक्षणे निधाय यौगन्धरायणो निवृत्तः कौशाम्बीमेव चिन्ताभारसमाकुलः। किं वा कथयिष्यति स्वामी वत्सेशस्तमवलोक्य वासवदत्ताविरहानलदग्धीभूतहृदयः। यौगन्धरायणदर्शनबद्धाशेनोदयनेन पृष्टेन यौगन्धरायणेन नोद्घाटिता लेशमात्रमपि स्वकीया योजना नीतिं रक्षयता। कथितं च केवलमेतदेव—

'गतोऽहं किञ्चिदपि कार्यमवलम्ब्यैकस्मिन् स्थाने। न च शक्यं वर्णयितुं तत्कार्यम्। मर्षयतु देवो माम्। सन्निवृत्तेन मया श्रुतं दृष्टं च लावणकग्रामाग्नि-

काण्डम् । कथमहं दर्शयितुं शक्नोमि मुखमपीति लज्जया चिरेणैवात्रागमनसामर्थ्य-वानासम् ।"

यौगन्धरायणसंकथनेषु कृत्रिमस्वरतामवगच्छन्नपि न कथञ्चित् किमपि कथयितुं शशाक उदयनः । जानाति स्म स नरपतिर्यद् राजभक्तो देशभक्तश्चायं नीतिनिपुणो मन्त्री नोद्घाटयिष्यति स्वकीयां योजनां प्राणपणेनापि । एतादृशाः मन्त्रिणः सेवकाश्चैव राज्यस्य स्वामिनो वाभिवर्धनहेतवो भवन्ति । यद् भवति तदेव भवतु । विधिरेव बलवानत्र । इति विचारयन् स तूष्णीमेवावतस्थौ । यौगन्धरायणोऽपि समयानुकूलतां प्रतीक्षन् तस्थौ ।

व्यतीतेषु च केषुचिद् दिवसेषु विज्ञाय च गुप्तचरैः राजगृहगतं सकलं वृत्तान्तं रुमण्वता वसन्तकेन च सह मन्त्रणां विधाय रहसि निवेदितो वत्सराजो यौगन्धरायणेन —

"देव ! महादेव्याः वासवदत्ताया अभावे शून्यमिव प्रतिभाति राजप्रासादोऽयम् । प्रजाजनानां हृदयान्यपि वेदनाभारसम्भृतानि नितरामौदास्यमेवाभिव्यञ्जयन्ति । आनन्दनोत्सवा अपि सर्वे सगलग्रहं निस्सारिता एव प्रतीयन्ते । न कुत्रापि कापि मनोरञ्जनवार्ता समवलोक्यतेऽनुभूयते श्रूयते वा । भवता न केवलं स्वकीया हृदयवेदनैवानुभूतव्या, प्रजारञ्जनव्रतं चापि पालनीयम् । लोकरञ्जनायैव प्रजापालकानां नरपतीनां जीवनानि भवन्ति । लोकहेतोरेव ते खिद्यन्ते श्वसन्ति च । अनिवार्यमेवेदानीं कस्याश्चिद् वत्सदेशगौरवानुरूपायाः महादेव्याः समागमनमस्मिन् राजप्रासादे । भवतो मनोविनोदाय प्रजाजनानां च रञ्जनाय कर्तव्यमिदमापतितमेव । नार्हाः भवन्ति महात्मानः स्ववेदनासु कार्याणि विस्मृत्य स्वकर्तव्यान्युपेक्षितुम् । प्रजावत्सलेन महाराजेन लोकरञ्जनाय द्वितीयाय विवाहाय सहमतिः प्रदातव्यैव ।"

यौगन्धरायणस्यैतां मन्त्रणां निशम्यापि हितकारिणीं मौनमेवावलम्बे वत्सराजः। परं स महामन्त्री पुनरपि बभाषे—

"देव ! समागतोऽत्र दूतो मगधेभ्यः सन्देशेन समुत्सुको भवति मगधेशः पद्मावत्याः प्रियसुतायाः पाणिं ग्राहयितुं वत्सराजाय। परमरूपशीलादिगुणसम्पन्ना सा पद्मावती सर्वथा वत्सदेशगौरवानुरूपा। रञ्जयिष्यति सा निस्सन्देहं भवतो हृदयचितानुवर्तिनी सती। मगधेशोऽपि शौर्येण, प्रतापेन, समृद्ध्या चापि प्रथित एव न केवलमस्मिन् भरतखण्डे, अपितु सकलभूमण्डले। तेन सह वैवाहिकोऽयं सम्बन्धोऽस्माकमपि राजनीतिकशक्तिं वर्धयिष्यति। प्रबलशत्रुभयरहिताः सन्तो वयं दिग्विजयं कृत्वा चक्रवर्तिपदभाजनं भवन्तं करिष्यामः। प्रथित एव चायं प्रवादो ज्योतिर्विदां यत् पद्मावतीं यो नरपतिः परिणेष्यति स चक्रवर्तिपदभागी भविष्यति। गतोऽवसरः पुनर्नोपसरति। सर्वथा खल्वाटशिरा अयं कालः।

यौगन्धरायणस्य नीतिगर्भितं समयोपयोगि प्रजाहितकरं राज्यशक्तिवर्धनकरमपि वचनं नातिप्रीतिकरमभूदुदयनस्य। निषेद्धुमना अपि न शशाक स किञ्चिदपि कथयितुम्। मौनमेवालम्ब्य तस्थौ स। परं यौगन्धरायणेनोदयनस्य मौनमेव स्वीकृतिं मत्वा प्रेषिताः दूताः मगधान् प्रति पद्मावत्याः परिणयाय वत्सेशेन सह। वत्सराजमुदयनं जामातृरूपेण पूर्वमेवाकांक्षमाणः, परन्तु सुतायाः सपत्नीजन्यपीडापरिहरणपरः मगधेशोऽनेन प्रस्तावेन तत्क्षणमेव सहमतो बभूव। लावाणकग्रामाग्निदाहे दग्धा वराकी वासवदत्ताऽवन्तिराजकन्येति विज्ञाय तेनोदयनाय सुतायाः पाणिसमर्पणं स्वीकृतम्। विवाहसंस्कारतिथिरपि संशोधिता सांवत्सरिकैः।

राजकीयवैभवानुरूपं यौगन्धरायणेन सकला एव सज्जा प्रारब्धा। वत्सेशः प्रजानामेव मनोरञ्जनाय द्वितीयविवाहमङ्गीकरोतीति हर्षनिर्भराः नागरिकाः

प्रमोदोत्सवनिर्भरहृदयाः सञ्जाताः। सकला एव नगरी नववधूरिव शोभास्पदतां प्रपेदे। याचकानां काप्यभिलाषाऽसफला नासीत् तदानीम्। राजमार्गेषु वीथिषु च नृत्यद्भिः पौरैरद्भुतमेव आनन्दानां प्रसरणं विस्तीर्णम्। सर्वत एव वासन्तिकी सुरचना समदृश्यत।

मनसि हृदयेऽन्तःकरणे चातिशयेन व्यग्रतामनुभवन्नुदयनो न निशि न दिवसे न प्रातर्रि न सायंसमये न निशीथे न मध्याह्ने कामपि शान्तिमधिजगाम। पुटपाकाग्निदह्यमानहृदयः स वासवदत्तानिमग्नचित्तस्तया सह सततमनुभूतान् विलासान् स्मरन् नितरामतप्यत। परं कथं प्रकटयतु स स्वकीयां वेदनां कस्य चाग्रतः। न भवति लोकरञ्जनव्रतपालनपराणां महीपतीनां स्वकीयं व्यक्तिगतं सुखम्। लोककल्याणायैव ते जीवन्ति श्वसन्ति, सामाजिकनियमांश्च पालयन्ति। अतिदृढलौहशृङ्खलानिबद्धचरणो गज इवानिच्छन्नपि स सकलानेव मन्त्रिभिः परिजनैश्च प्रेषितान् सविनयानपि कठोरानादेशान् पालयामास।

सांवत्सरिकैः सशोधिते शुभमुहूर्ते प्रतस्थे तस्य राज्ञो वरयात्रा मगधदेशराजधानीं राजगृहं प्रति। परं न कोऽपि शृणोत्युदयनस्य हृदयसन्निहितां वेदनाम्। सर्वे वत्सराजमेव पश्यन्ति नोदयनम्। पटहमृदङ्गनिस्साणढक्काभेरीप्रभृतिवाद्यानां तुमुलघोषाणां धरित्रीगगनाच्छादनकराणां मध्ये केन श्रूयन्ते हृदयगतयोऽप्युदयनस्य तस्य वराकस्य। समारोपितश्च स सकलावयवालङ्कारालंकृते हस्तिनि बलादेव। राज्यस्य मन्त्रिणः, सेनापतयः, मुख्याधिकारिणः, सम्भ्रान्ताश्च नागरिकाः बभूवुस्तस्य महत्या सेनयानुगतस्य वरयात्रिणः। राजगृहं प्रति गच्छद्भिः करिघोटकरथपदातिपंक्तिभिः समुत्क्षिप्तानां धूलीनां समूहैराच्छादितं बभूव सकलमेव गगनम्। शिविरानन्तरं शिविरमिति सोदयनस्य वरयात्रा कतिपयैरेव दिवसैः सम्प्राप्ता तं समुद्दिश्यस्थानं वधूनगरम्।

वत्सराजस्य यशःसुरभिः ध्वजिनीध्वजेव प्रथममेव राजगृहलोकहृदयगतमवर्तत। वीणावादनेनैव यो व्यालानपि वशं नयति, अपहृता येन चण्डकर्मणोऽपि चण्ड-

महासेनस्य परमगुणशालिनी लावण्यमयी दुहिता, सततं रक्षन्ति यं यौगन्धरायणादयो दण्डनीतिनिपुणाः सुसचिवाः, समागच्छति सोऽस्माकं प्रजानामीशस्य मगधेशस्य जामातृरूपेण इति समाचारेण विक्षोभितं झञ्झावातेन प्रशान्तसागर इव सकलं राजगृहम् । वरयात्रानायकदर्शनाय समुत्सुकैः नागरिकाणां समूहैः सम्भरितास्तस्य नगरस्य राजमार्गाः विपणयो वीथयश्च । राजमार्गस्योभयतः स्थितानां गगनचुम्बिशिखराणां हर्म्याणां वलभीषु, छदेषु च समागतानां विविधालापपराणां वरप्रशंसनसंलग्नरसनानां युवतीनां समुज्ज्वललावण्यैः वदनैः विकसितकमलपूर्णं सरोवरमिव सा नगरी शुशुभे । वरयात्रास्वागताय स्थाने-स्थाने सुमनोहरकिसलयकुसुमालङ्कृतानि तोरणयुतानि द्वाराणि निर्मितान्यासन् ।

युवतीनां करकिसलयप्रक्षेपितानां कुङ्कुमसंलिप्तलाजाकुसुमानां वर्षणैः स्वकीयं धन्यमनुभवत उदयनस्य वरयात्रा शनैःशनैः समायाता राजकीयातिथिशालाद्वारं, यत्र मगधराजः मगधेशः स्वयमेव प्रमुखपौरैः सह जामातुः स्वागताय स्थित आसीत् । करिपृष्ठादवतीर्य प्रणमन्तं विनयावनतमुदयनं स तत्क्षणादेव स्वालिङ्गनगतं चकार ।

ज्योतिर्विद्भिः संशोधितो निशीथसमयः पाणिग्रहणसंस्कारे सप्तपदीविधानस्य । विशिष्टान्तरङ्गभूतैर्वयस्यैः सह समलङ्कृतमुदयनेन विवाहमण्डपम् । इतश्च मगधराजप्रासादान्तर्गते कन्यान्यःपुरे प्रसृतं महद्धलचलम् । विशेषेण सुसज्जिता प्रसाधिता विभूषिता च पद्मावती स्नेहसम्भृताभिर्वयस्याभिः विवाहवेदिसमारोहणाय ।परन्तु वासवदत्त सुविरचितप्रसाधनैर्विभूषणैश्चातिशयेन सा सौन्दर्यवती बभूव । स्वर्गीयाप्सरसामपि सौन्दर्यं लज्जास्पदतामानयन्ती सखीभिः समालम्बिता लज्जाऽरुणिमकपोलावनतवदना सा मन्दं-मन्दं पदविन्यासं बद्धभूमिषु सन्दधती सम्प्राप्ता विवाहसंस्कारसज्जासुशोभितं मण्डपम् । पूर्वमेव समुपस्थितेन जनकेन स्वयमेवावलम्ब्य सा समुपस्थापिता वेद्याम् । होमकुण्डे प्रज्ज्वलितं वह्निदेवं साक्षीकृत्य पुरोहितोच्चारितवेदमन्त्रध्वनिपुरस्सरं संग्राहितो मगधेशेन पद्मावत्याः दक्षिण-

पाणिरुदयनस्य वामपाणौ। बध्वा उत्तरीयस्य च प्रान्तभागं वरस्योत्तरीयस्य प्रान्तभागे संग्रथितः । सप्तपदीपद्धत्या वह्निप्रदक्षिणया बभूवार्द्धांगिनी सा पद्मावती वत्सेशस्योदयनस्य ।

वह्निप्रदक्षिणार्थं विवाहवेद्यां स्थितौ वत्सराजो मगधेशसमर्पितं पद्मावत्याः करकिसलयं गृह्णन् न किमपि सुखं ह्यनिर्वचनीयानुभवं वानुबभूव वासवदत्तासमास्थितहृदयः। परं तत्र करतलकरपृष्ठयोर्विरचितां पत्रावलिरचनामवलोक्य संस्तम्भितश्चमत्कृतश्चाभूत् । हृदयगतिस्तस्यातितरां प्रववृधे । का शक्ता वासवदत्तां विहाय रचनामेतादृशीमतिकलापूर्णां विरचयितुम् ? परं किं करोतु स । विवाहसम्भारसम्भ्रमेऽग्निप्रदक्षिणायां तेन गन्तव्यमेव । तस्यामेव क्रियायामवलोकिता वत्सराजेनैका रमणी सरलश्वेतपरिधाना नैपथ्येनातिदीर्घेण सकलमेव मुखं प्रच्छादयन्ती पद्मावत्याः पृष्ठतः स्थिता । नन्वियं तन्वी देहवल्लरी वासवदत्ताया एव । कम्पः स्वेदोद्गमश्च नितरां समजायत तस्योदयनस्य वपुषि । समुद्गच्छन्तं मोहं कथमपि निरुध्य संस्तभ्य चात्मानं तादृशीषु परिस्थितिषु कथमपि प्रतिकर्तुमशक्येन तेन निर्वाहिताः सकला एव वैवाहिकक्रियाः विधयश्च शरीरेणैव न तु मनसा । तदनन्तरं वसन्तकेन सह स मगधराजान्तःपुरमेव प्रविश्य तत्रैव सुप्तः ।

समयोऽयं सुप्रभातस्य । मन्दालोकेन प्रसरितं सर्वासु दिक्षु । परं न समुद्गतवदन आसीद् भगवान् भास्करोऽधुनापि प्राचीदिगन्तरिक्षे न कथमपि निद्रयोपकृता वासवदत्ता । महत्या चिन्तया, आवेगेन, क्षोभेण पीडया च हृदि व्यथमाना सा पतिव्रता पतिमङ्गलाभ्युदयाकांक्षिणी स्वयमेव स्वकं प्राणाधिकभर्तारं समर्पयामास कस्यैचित् सपत्न्यै । ब्राह्मवेलायामेव शयनादुत्थाय तूष्णीं सा समायातान्तःपुरवाटिकायाम् । सुरभितविकसितमालतीसुमान्यवचित्य स्थिता सैकस्यां शिलायां स्रजश्च ग्रथनातुमारेभे ।

प्रियसहचरमिलनसुखस्वप्नेष्वेव व्यतीयाय रजनी पद्मावत्याः । प्रातरेव सा

मधुरस्वप्नमधुमृन्निद्राऽवसिता सुदूरसमुत्थापितताम्रचूडकोलाहलैः। पार्श्ववर्तिनि शयने प्रियसखीमावन्तिकामपश्यन्ती तामेव मृग्यमाणा सा गता तमेवोपवनम्, ग्रथ्नाति सा वराकी प्रियविरहविदग्धा आवन्तिका यत्र पुष्पस्रजः सकम्पाभिरङ्गुलीभिः। आर्द्रनयनाभ्यां च समुद्गिरन्त्यश्रूणि कपोलौ प्राप्याऽऽवन्तिकायाः स्तनावरणं क्लेदयन्ति। प्रव्रजितं भर्तारमेवेयं स्मरतीति पद्मावत्याः हृदयमभूद विगलितं करुणया वेदनया। समुपविष्टा सा आवन्तिकाया एवैकपार्श्वे शिलायाम्। पद्मावतीं पार्श्वस्थितामवलोक्य अश्रूणि प्रमृज्य वस्त्रप्रान्तेन स्मितविभूषितावौष्ठौ विधाय सा पप्रच्छ पद्मावतीम्—

"राजपुत्रि ! अपि प्रियस्ते भर्ता ?" सलज्जसरसया पद्मावत्या कपोलावरुणीकृत्य मुखमवनमय्यैवोत्तरितम्।

प्रातरेव उदयनोऽपि निद्रया परित्याजितः शयनमत्यजत्। कदाचिद्धिममथितम्लानपद्मवदनां जलदाच्छादितशशिनमिव वासवदत्तां, कदाचिच्च नवप्रफुल्लितसुरभितकुमुदमुखीं ज्योत्स्नावदातपूर्णिमाचन्द्रमसमिव पद्मावतीं स्वप्नेषु पश्यत एव तस्य निशाऽवसानतां प्राप्ता। पाणिग्रहणसंस्कारसमयिनी कदाचित् पद्मावतीकरतलविरचितपत्रावली कदाचिच्च पद्मावतीपृष्ठवर्तिन्याः कामिन्याश्च देहयष्टिः तन्वी नरीनृत्यते स्म वारंवारं कल्पनायामेव तत्समक्षम्। न शशाक स मनसो व्याकुलतां निरोद्धुम्। प्रतिक्षणं वर्धमानैव सा बभूव। बसन्तकमुत्थाप्य प्रचलितं तेन कन्यान्तःपुरप्रमदवनमेव।

शशिकौमुदीकोमलायां निशायां क्षणदायामवलोकितान् स्वप्नगतवृत्तान्तान् वसन्तकाय श्रावयन्नुदयनः समागतस्तमेवोद्देशं यत्र पद्मावतीवासवदत्ते निमग्ने स्तः रहस्यालापेषु। उदयनवसन्तकयोः पदध्वनिं निशम्य तत्र नयने समुन्नमय्य किञ्चिदारक्तकपोलया त्रपावनतवदनया पद्मावत्या कथितमतिमन्दस्वरेण वासवदत्तायाः कर्णे कपोलेन कपोलं गाढं सन्निवेश्य—

"आर्ये ! इत एवागच्छत्यार्यपुत्रो वसन्तकेन सह प्रियवयस्येन। यदि चावलोकयति मामत्र प्रभातवेलायामेव रहस्यालापनिमग्नाम् अतिलज्जाकरं भवत्येतत्। तदावां तिष्ठावस्तत्रावश्यायार्द्रकिसलयसुरभितकुसुमवल्लरीवेष्टिते कुञ्जमण्डपे विस्तारितायां चन्द्रकान्तशिलायाम्।"

वसन्तकेन सह जल्पन् उदयन् आगतस्तमेवोद्देशं, यत्र ग्रथ्नाति स्म वासवदत्ता सुमस्रजम्। क्वचिद् वत्सराजो मां नावलोकयेदिति सम्भ्रमेण परित्यक्ता सा मालतीमालिका तया तत्रैव। मालिकामवलोक्यैवातिचमत्कृतोऽसौ वत्सराजः पातुमारेभे तामुत्थाप्य करयोरेकासक्तनयनाभ्याम्। को ग्रथ्नातुं शक्नोतीदृशीं सुघटितां नयनप्रहर्षप्रदायिनीं मालिकाम्? मालतीपुष्पाणि स्वयमेव वाटिकास्ववचित्य स्रग्गुम्फनं तस्या एव व्यसनम्। न कोऽपि समर्था रमण्यस्मिन् लोके तादृशं रमणीयं कर्म विदधातुम्। निश्चयेन तस्यः शरीरस्य स्पर्शेण सुरभिताऽपि चेयं परिलक्ष्यते। इति स वराक उदयनः कदाचिन्नासिकया घ्रात्वा, कदाचित् कपोलयोः, नयनयोः ललाटे वा संस्पृश्य, कदाचिच्चाधरेण चुम्बनं कृत्वा तां वक्षसि च कृत्वा निश्चलमेव स्थितोऽभूत् कतिपयक्षणपर्यन्तम्। तदनन्तरं हा वासवदत्तेति मन्दमुच्चार्य स्थितस्तत्रैव प्रियाविमुक्तशिलातले। प्रियतमस्यैतादृशीमनिर्वचनीयोत्कण्ठानिर्भरां दशामवलोकयन्त्याः वासवदत्तायाः किमपि प्रतिकर्तुमसमर्थायाः नयनाभ्यामश्रुवर्षैव प्रावहत्। वसन्तकोऽपि वयस्यस्येमां हृदयविदारिणीमवस्थां दृष्ट्वा समीपमागत्य मनोविनोदनाय पप्रच्छ। अभवंश्च तयोरेवंविधा आलापाः—

विदूषकः—"मित्र! का ते प्रियतरा, पूर्वं वासवदत्ता, अस्मिन् काले पद्मावती वा?"

उदयनः—"वसन्तक! को लाभ इदानीमीदृशीभिर्वार्ताभिः। व्यतीतमेव विधिविलसितम्।"

विदूषकः—(साग्रहम्) "वयस्य ! न भेतव्यं त्वया स्वमनोभावप्रकटनात् । नास्त्यस्मिन् भूतले स्वर्गगता वासवदत्ता । दूरस्थिता च पद्मावती स्वान्तःपुरकक्षे ।''

उदयनः—(दीर्घमुष्णं च निःश्वस्य) "वसन्तक ! न विद्यते मे सामर्थ्यमत्र विषये किञ्चिदपि प्र टयितुम् । तथापि कथयाम्येव । रूपेण, वंशेन, आकृत्या, प्रकृत्या, औदार्येण, अन्यैश्च रमणीयैः रमणी-सहजगुणैः प्रिया मे पद्मावती, तथापि न बध्नाति मे कथमपि चित्तं वासवदत्तानिमग्नं सततमेव तां चिन्तयतः ।"

उदयनवसन्तकयोः निःशङ्कभावेन तत्रोपविष्टयोर्वार्तालापं शृण्वत्यावेवास्तां पद्मावतीवासवदत्ते । वसन्तकेन पृष्टोऽयं प्रियतमः किं कथयिष्यति इत्यौत्सुक्येन तयोर्हृदयगतिः ववृधे । प्राणाधिकप्रियस्येमां श्रोत्रमनःप्राणाभिषिञ्चनकरीं पीयूष-प्रवाहिणीं वाणीं निशम्यैव विगलितः सकलव्यथाभारो हृदयस्य वासवदत्तायाः । औदार्यातिशयप्रसादितहृदया पद्मावती पूर्वतोऽप्यधिकं तं प्रियतममादरभरितानु-रागेणावलोकयामास, स्मरति यः स्वर्गगताया अपि वासवदत्तायाः गुणानाम् ।

स्वल्पसमयावधिं यावत् तत्रैव वासवदत्तोपभुक्तशिलायां वसन्तकेन सहालप्य गतो वत्सराजः । नयनागोचरतां च गतयोस्तयोस्ते पद्मावतीवासवदत्ते वत्सराजहृदयसर्वस्वभूते पुनरप्यागत्य स्थिते तत्रैव शिलायाम् । पुनरपि चालपितुं प्रवृत्ते ते—

वासवदत्ता—"राजपुत्रि ! कथयतु भवती । अपि प्रियस्ते वत्सराजः ?"

पद्मावती—"आवन्तिके ! आर्ये ! किमहं कथयामि, प्रियो मे भर्ता न वा ? परमेतदेव कथयितुं पारयामि, नाहं तं विना कथमपि जीवितुमप्युत्सहे । हृदयं त्वेव जानाति मे स्नेहम् ।"

वासवदत्ता—"अहो ! तथा प्रियस्ते भर्ता सञ्जातः ?"

पद्मावती—"आर्ये ! आवन्तिके ! पृच्छामि त्वामेव हृदयगतं प्रश्नमेकम् । यथाहं स्निह्यामि समर्पितसकलान्तःकरणा तस्मै वत्सेशाय प्रियदर्शनाय, तथैव स्नेहोऽपि भवेद् आर्यायाः वासवदत्तायाः ?"

वासवदत्ता—"ततोऽप्यधिकम् ।"

पद्मावती—"कथं त्वया ज्ञायते ?"

वासवदत्ता—(कथमपि हृदयं संस्तभ्य समुच्छलन्तम्) "राजपुत्रि ! न ज्ञायते मया यथार्थतः । केवलमनुमानेनैव ते कथयामि । यद्यार्या वासवदत्ताऽवन्तिदेशराजकन्या नाभविष्यत् प्रेमरस-निमग्ना तथा तस्मिन् वत्सराजे, न सा मातरं, पितरं, भ्रातरौ, सम्बन्धिनो, देशं, कुलगौरवं चापि समुपेक्ष्य समागमिष्यत् तेन स्नेहभाजनेन सह ।"

पद्मावतीमौदास्यभावपरिगतचित्तामनुभूय सा पुनरपि बभाषे—

"राजकन्ये ! श्रुतं मया सङ्गीतविद्यायाः महानाचार्यो वत्सराजः । वीणां शिक्षयन्त्यैव वासवदत्तया तस्मिन्ननुरक्तम् । शिक्षितव्यं त्वयाऽपि वीणावादनं तस्मादाचार्यात् ।" निवेदयिष्याम्येव तं वासवदत्तानिहितनिमग्नमनसं वत्सराज-मिति कथयत्येव पद्मावती निर्गता सहसा प्रमदवनोद्देशात् । वासवदत्ताऽपि किमपि विचारयन्ती दूयमानहृदया म्लानवदना अनुगतवती तामेव ।

समागतमेव सायंसमयेनासीत् । अस्तगिरिशिखरसंनिविष्टकरं भगवन्तं भास्करमवलोक्य संग्रहीतुमारब्धानि सर्वाणि कार्याणि लोकैः लोकेऽस्मिन् । भविष्यत्प्रियविरहविह्वलहृदयचक्रवाकाणां युगलानि सान्ध्यरागमनुरागमिव प्रियाणां पातुमारभन् । प्रव्रजन्त रमणमवलोक्य सञ्जातवैराग्याभिः पद्मिनीभिः

सङ्कुचन्तीभिर्मुद्रितुमारेभे । पाताललोकं गन्तुं प्रवृत्तस्य सहस्ररश्मेररुणरश्मयोऽधुनाऽपि अरुणप्रकाशेन संरञ्जयन्ति स्म तदानीमपि सकलं लोकसमूहम् । शिशुदर्शनसमुत्सुकानामादिवसं भोजनद्रव्यगवेषणनिरतानां कमलिनीप्राणवल्लभं पाताललोकप्रवेशोद्यतमालोक्य नीडान् प्रति निवर्तमानानां वयसां विरावैर्विक्रन्दितमिव सकलेन जगता घनीभूतान्धकारागमनभयात् ।

एतादृशे समये पद्मिनिकाभिधेया चेट्येका त्वरितगत्या धावन्ती कन्यान्तःपुरस्योद्यानं संघट्टनां प्राप्ता वत्सराजसमीपादागच्छता वसन्तकेन । कुत्र त्वया गम्यते एतादृशेन वैनतेयमपि तिरस्कुर्वता वेगेन यन्मार्गगता अपि जनाः न विलोकयन्त इति कथयित्वा बलान्निरुद्धा पृष्टा च सा अवादीत्—

"महत्या वेदनया शिरसि निपीडिता राजकन्या पद्मावती अन्तःपुरहर्म्यशिखरे समुद्रगृहरूपेण प्रख्याते कक्ष एकाकिन्येव शयनतलमध्यास्ते । आर्या आवन्तिका समागत्य कोमलकरकिसलयाङ्गुलीभिरङ्कगतं तस्याः ललाटं परामृशन्ती मधुरकथालापैः मनो विनोदयन्ती शिरोरुजमपनेष्यतीति, सन्देशं गृहीत्वागम्यते मयेति कथयित्वा झटिति वसन्तकमेकतः कृत्वा पलायिता सा पद्मिनिका ।

वत्सराज एव समर्थोऽस्याः नवपरिणीतायाः राजकन्यायाः शिरोवेदनामवसानतां नेतुमिति विचारयन् वसन्तको गतः पुनरप्युदयनस्यान्तिकमेव । कुत्र मे प्रिया शिरोरुजाऽभिभूयमानेति हृदयसंनिविष्टया पीडयोत्कण्ठया च सम्भरितसकलमनोगात्रोऽनुससार मार्गं निर्दिश्यमानं वसन्तकं सम्प्राप्तश्च कतिपयैरेव क्षणैः प्रासादोपरिभूमिकविरचितं समुद्रगृहकम् । द्वारमुद्घाट्यान्तःप्रविश्य च तेनावलोकितं न विद्यते काऽपि व्यक्तिस्तत्र । केवलमेक एव प्रदीपः दीपकाधारे निहितः कज्जलमुद्गिरन्नन्तःस्थितमन्धकारं स्वातिमन्दज्वालयापनेतुं प्रयतते ।

नियतं गतैव सा शिरोवेदनानिपीडिता मे नवविवाहिता प्रिया स्वमातुः सखीनां वाऽन्तिकम्। शयनमेव केवलं शुभ्रप्रच्छादनाच्छादितमासीत् तत्र पल्यङ्के। गता पद्मावतीति चिन्तयन् स संस्तम्भित इव तस्थौ। परिहसता वसन्तकेन निवेदितम्—

"वयस्य ! किं विचार्यते भवता ? मनसोऽभिलाषा ते मनस्येव विलीयते। भवतः प्रिया तु गता, परन्तु स्वकीया शिरोवेदना भवते समर्प्यैव गता। इदानीमपि चिन्ताभारं भवान् परित्यज्य गच्छतु स्वस्थानमेव।"

अन्यमनस्कीभूतेनोदयनेन कथितम्—"वयस्य ! मा परिहस। न समागताऽधुनाऽपि पद्मावती समुद्रगृहकेऽस्मिन्। नावलोक्यते त्वयेदमास्तरणं सलवटविरहितमनुपभुक्तपूर्वमेव। आगमिष्यति स ऽत्रैव। प्रतिपालयन्नेव तामत्र स्थास्यामि। यावन्न सा आयाति कथा कामपि मनसः रञ्जनीं कथय। शयनस्थित एवाहं तामाकर्णयन् मनसो रञ्जनं करोमि।" इत्युक्त्वा प्रच्छदपटेनान्येन सकलवपुरावृत्य शयनशयितोऽभूदुदयनः। वसन्तकेन च कथा कथयितुमारब्धा—

"अस्त्युज्जयिनी नाम्न्यैका नगरी सकलभुवनतिलकभूता। तत्रत्यानां रमणीनां रूपेणालोकितं भवति युवजनहृदयवृन्दम्।" उज्जयिनीनामाकर्णनेनैव व्यथमानहृदयो नितरामतप्यतोदयनोऽवदच्च वसन्तकम्—

"वयस्य ! मा मां व्यथयैतादृशीभिः कथाभिः। उज्जयिनामग्रहणमेव स्मारयति मां वासवदत्तायाः। अन्यां कामपि कथां कथय।" विदूषकः पुनरपि वर्णयितुमारेभे—

"अस्त्येकं ब्रह्मदत्तं नाम नगरम्। तत्रैको राजा कम्पिल्लो नाम प्रजानामनुशासनं कुर्वन् निवसति।"

श्रुत्वैतत् किञ्चिदुन्नमितशरीरपूर्वार्द्धेनैवोदयनेन निरोधितः स वसन्तकः।

अतिमूर्ख एव प्रतिभासि[ ]त्वम् । एवं कथा—''कम्पिल्लं नाम नगरं, तत्र ब्रह्मदत्तो नाम राजा प्रतिवसति ।"

एवं निरोधितो वसन्तकः कृत्रिमरोषं प्रदर्शयन्नाह—"न भवता काऽपि कथा श्रोतव्या प्रतीयते नापरिणीतपद्मावतीपरिगतचित्तेन । तामेव चिन्तयन् संस्मरन् प्रतीक्षस्व । गच्छाम्यहं स्वकीयमेव विश्रामस्थानम् । अन्धकाराच्छन्नमेव सकलप्रासादादिकं परिलक्ष्यते । क्वचित्क्वचिदेव तमसावृते व्योम्नि नक्षत्राणीव दीपकवृन्दानि अन्धकारं विद्रावयितुं प्रयतन्ते न च पारयन्ति । निद्रया निपीडितो न शक्नोम्यत्र प्रियाप्रतीक्षणपरस्य भवतोऽन्तिकं स्थातुम् ।" गते च तस्मिन् वसन्तके उदयनोऽपि पद्मावतीशिरोवेदनाभरेणैवोत्पीडितः प्रच्छदपटेनावृतसर्वगात्रो निद्रया स्वाङ्के विश्रामितः ।

आवन्तिकामेव परितो मृगयमाणा, पृच्छन्ती च प्रत्येकं मार्गवर्तिनं जनं कुत्र सा वर्तते, सम्प्राप पद्मिनिकाऽन्तःपुरोद्यानम् । तत्र तया दृष्टा सा वराकी औदासीन्यभावमावहन्ती मूर्तिमती करुणभावरूपा तुषारपरिमृदितमृणालीव द्वाभ्यामेव चक्षुर्भ्यां प्रवहत्या वाष्पजलधारया कपोलमार्गेण वक्षसि निपतत्या क्लेदयन्ती सकलानि गात्राणि संधारितवसनैः सह मालतीकुसुमस्रजमेकां ग्रथमाना । समीपमुपगम्य कथितं तया—

"आर्ये ! आवन्तिके ! कथं भवत्याऽस्मिन् समयेऽपि औदासीन्येन स्थीयते । राजसुतायाः परिणयप्रसङ्गेनातितरां प्रसादभावं प्रकटयति प्रकृतिरपि रमणीया सुरभितप्रफुल्लितकुसुमव्याजेन । औदासीन्यं हृदयान्तःपीडनकरं दुःखं वा परित्यज्यागम्यतां मया सह । मगधराजकन्या वत्सदेशमहादेवी पद्मावती नितरामसहनीयां शिरोवेदनामनुभवन्ती स्मरति भवत्या एव, मधुरकथावार्ताभिरार्याऽऽवन्तिकापनेष्यति ते रुजमिति ।"

पद्मिनिकाया एतादृशं कथनमाकर्ण्य झटित्येव सोत्थाय प्राचलत् तया सह

समुद्रगृहं प्रति। अर्धगुम्फिता मालतीकुसुममालाऽधुनापि करावलम्बितैवासीत्। कक्षद्वारमुपगम्य, गम्यतां भवती मगधराजकुमारीम्, अहं तु महादेव्या आदेशं परिपाल्य त्वरितं निवर्तिष्ये" इति कथयन्ती सा पद्मिनिका प्रस्थितैव।

समुद्रगृहं प्रविष्टया वासवदत्तयाऽवलोकितं दीपमन्दालोके, स्वपिति पद्मावती समावृतसकलगात्रा प्रच्छदपटेन। अहो असावधानता पुरोभागिता चात्रत्यानां चेटीनाम्? एकाकिनीमेव स्वामिनीं शिरोवेदनया दूयमानां कथञ्चिदपि लब्धनिद्रां परित्यज्य गताः सर्वा एव। किं करणीयं भवेन्मया? किमहमुपपर्यङ्कमास्तीर्णे कुशासने स्थित्वा प्रतीक्षेयमस्याः जागरणम्? न हि न हि, एतेन तु स्नेहाल्पतैवाभिव्यज्यते। निःसंशयं प्राणसमेयं मे पद्मावती नार्हति तादृशं समुदाचारम्। नियतं शयनारूढया मया एव समालिङ्ग्यमानोपकरणीया। तत एव स्नेहसौख्यसदृशं भविष्यति।

इति विचार्य शयनस्यैकपार्श्वे शयाना भूत्वोदयनमेव पद्मावतीं मन्यमाना यदैव सा स्वकीयं दक्षिणकरं प्रसारयति तन्मस्तकनिविष्टं कर्तुम्, तदैव पार्श्वपरिवर्तनं कृतमुदयनेन। उत्स्वप्नायन् दक्षिणकरं प्रसारयन् वासवदत्तां प्रति सोऽवदत्—

"हा! वासवदत्ते! कुत्र त्वम्? आयाहि आयाहि वन्दने वन्दनीये।" पार्श्वपरिवर्तनेन प्रच्छदपटापगमनेन च समदृश्यत पूर्णिमाचन्द्र इव सौन्दर्यतेजोदीप्यमानं तन्मुखम्।

"अहो आर्यपुत्र एवायमिति, किं कृतं मया" इति सम्भ्रान्ता वासवदत्ता समुच्छलितहृदया झटित्येवोत्थिता। करुणं च पश्यन्त्या तया मनसि निश्चितम्—

"नियतमयं निद्रापरवश एव उत्स्वप्नायते। न च मामत्र वर्तमानां जानाति। यदि कञ्चित्कालं शयनसमीपमास्तीर्णे कुशासनेऽस्मिन् स्थित्वा-

ऽवलोक्य स्वामिमुखं नयने तर्पयामि, समीचीनमेवेदं भविष्यति ।" विचारयन्त्येव सा समुपविष्टा तस्मिन् कुशासने, निदधौ च स्वकोमलभुजौ पल्यङ्कस्य काष्ठपट्टिकायाम् । पातुमारेभे च नयनाभ्यामेवोदयनस्य वदनपीयूषरसम् ।

केचन क्षणा व्यतीताः । पुनरप्युत्स्वप्नायतोदयनेन कथितम्—

"हा ! वासवदत्ते ! कुत्र त्वमसि ? कुत्र निलीनाऽसि ? किं कुपिताऽसि ? किमपराद्धं मया ? क्षमस्व माम् । प्रतिवचनं देहि । आयाहि रे मदन्तिकं वन्दने वन्दनीये ! प्रसीद प्रसीद ।" इति कथयत एव अग्रे प्रसारितस्तस्य दक्षिणः करः प्राप्तवान् कोमलकरकिसलयं वासवदत्तायाः दृढं च सा गृहीता ।

उदयनकरस्पर्शस्यानुभूत्याऽतितरां कम्पिता रोमाञ्चिता स्वेदार्द्रा समुच्छलदश्रुक्लिन्ननयना दीर्घमुष्णं च श्वसन्ती वासवदत्ता कथमपि रुरोध चेतनालोपिनीं मूर्छाम् । संयम्य च स्वात्मानं सा हस्तमुन्मोच्य, न कोऽपि मामस्यामवस्थायामवलोकयेदिति भयात् सत्वरमेव समुद्रगृहाद् बहिरायाता । परं तस्याः कराङ्गुलिप्रणयिनी मालतीमाला तस्मिन् सम्भ्रमे तत्रैव पतिता ।

घटनयाऽनया तत्क्षणमेव विनष्टनिद्रो बभूवोदयनः । अवलोकिता काऽपि त्वरितं निर्गच्छन्ती छायेवाकृतिस्तेन । वासवदत्ताकरस्पर्शमवाप्य कम्पनं प्राप्तः रोमाञ्चितः स शयनादुत्थाय, वासवदत्ते ! वासवदत्तेति व्याहरन् आह्वयंश्च बहिरायातुं प्रायतत तस्मात् समुद्रगृहात् । परं संघट्टितो मस्तके द्वारतोरणेन निद्रापिहितनयनः । तस्मिन्नेव सम्भ्रमेऽतिविप्रकृष्टं निर्गता वासवदत्ता नयनागोचरतां प्राप्ता ।

एतस्मिन्नेव समये सन्निवृत्तो वसन्तकः । एकस्मिन् करे मालतीमालिकां गृह्णन् अन्येन च करेण ललाटस्पर्शं कुर्वन्नवलोकितस्तेनोदयनः । किं वा करोत्ययमिति विस्मयाभिभूतेन तेन पृष्टम्—

"वयस्य ! का वार्ता ? नागता ते प्रियाऽद्यापि ? समागता च कुपिता वा ते व्यवहारेण निवृत्ता ? कथं भवतैषा मालतीमालिका सम्प्राप्ता, कथं चैनामेकेन पाणिना लम्बयन्नन्येन च पाणिना ललाटं परामृशन्नेवं द्वारि स्थित आस्ते भवान् ?"

वसन्तकस्य करं करे गृहीत्वा शयनमुपगम्य तं चास्तीर्णे समुपवेश्याऽऽसने स्वयं च शयनमधिरुह्य निवेद्य च सकलं वृत्तान्तं कथितमुदयनेन—

"वयस्य ! निःसंशयं जीवति मे प्रिया वासवदत्ता। कूटनीतिनिपुणोऽयं यौगन्धरायणः। सोऽपि जीवत्येव। काऽपि कूटयोजना संयोजिता तेन लावणकग्रामाग्निकपटेन मगधराजेन सह वैवाहिकसम्बन्धं योजयितुम्। पाणिग्रहणसंस्कारसमये समवलोकिता मया पद्मावतीकरतलकरपृष्ठविरचिता विशिष्टा [illegible]। न तादृशीं पत्ररचनां करोति काऽप्यन्या वासवदत्तां विहाय। पुनश्च [illegible] [illegible]वतीपृष्ठावलम्बिनी वदनं चातिदीर्घेणावगुण्ठनेनाच्छादयन्ती। तादृशी शरीराकृतिः नियतमेव सा वराकी मे प्रिया दधाति। प्रभाते प्रमदवने भ्रमता सम्प्राप्तैका मालतीमालिका मया कयापि संग्रथ्य निहिता तत्र। नूनं तद्गुम्फनं वासवदत्ताहस्तकौशलमेवाभिव्यनक्ति। अधुनैव सा समायाताऽस्मिन् समुद्रगृहे सुचिरं च स्थिता मन्मुखासक्तदृष्टिः। उत्स्वप्नायता मया गृहीतस्तस्याः पाणिः। परं बलादुन्मोच्यात्मानं पलायिता, केवलमियं कराङ्गुलिप्रणयिनी तस्याः मालिकाऽत्र पतिता मया गृहीता। निद्रया पिहितनयनोऽहं न शशाक तां निरोद्धुम्।

दीर्घमेतदुदन्तमाकर्ण्यान्तःविहसता स्मयमानेन कथितं वसन्तकेन—

"वयस्य ! कुत्र कथं वा जीवति महादेवी। निश्चयेन दग्धा सा लावणकग्रामदाहे। उत्स्वप्नायितमेव भवता। सततं महादेवीमेव चिन्तयन् तद्गतमानसो भवान् स्वप्नेऽपि तामेव पश्यति। परित्यजतु सकलमेव चिन्ताभारम्।

गतासूंश्च न चिन्तयन्ति मनस्विनः कर्तव्यकार्यव्यग्रमानसाः । निशीथसमय एवाधुना प्रतीयते । तद् गम्यतां स्वकीयं विश्रामगृहं, विश्रम्यतां च कञ्चित्कालम् । ह्य एवास्माभिः प्रस्थातव्यं कौशाम्ब्यै ।"

समायाता प्रस्थानवेला पद्मावत्याः पतिगृहगमनस्य । जनकेन विसर्जनीयैव दुहितेति सनातनो नियमः प्रकृतेः । दूरे हिता दुहिता भवति । कः शक्तः स्वकीयां प्राणेभ्योऽपि प्रियतरां सुतां यौवनाढ्यां स्वगृहे स्थातुम् ? आगमिष्यत्येको राजकुमारः कदाचित् । नेष्यत्येव स तां स्वकीयं स्थानम् । प्रदेयैव कन्या भवति । निक्षेप एव सा पितुः गृहे । परिगृहीतुः गृहे सम्प्रेष्यैव जनकः प्रत्यर्पितन्यास इव प्रकामविशदहृदयो भवति ।

सांवत्सरिकैः संशोधिते शुभमुहूर्ते मगधराजेन समारब्धः समारोहो दुहितुः पतिगृहप्रस्थानस्य । प्रस्थानकौतुकानि मङ्गलानि च निर्वर्तितानि परिजनैः । यौतुकरूपेण प्रदत्ताभिः विपुलाभिः सामग्रीभिः सम्भृताभिः शकटीभी राजराजस्यापि वैभवं तुच्छमेव प्रतिभाति स्म । संख्यातीतस्वर्णरत्नाभूषणानामालोकेन दिवसकरकरानामपि प्रभा मन्दिमानमापेदे । कौशाम्बीगमनाय प्रवृत्तैः मगधेशेनोपहृतैश्च जामात्रे हस्तिभिरश्वैः रथैः दासदासीनां समूहैश्च व्यापृतमेव सकलं राजप्रसादप्राङ्गणम् ।

सन्निहिताऽऽसीदावन्तिका पद्मावतीसंरक्षणे ब्राह्मणपरिव्राजकस्य न्यासरूपा । नायात्यद्यापि स ब्राह्मणः । किं करोतु वराकी पद्मावती पतिगृहप्रस्थानमङ्गलवेलायाम् । किमस्मिन्नवसरे कर्त्तव्यम् ? पतिगृहे नयनं पितृगृहे वा संरक्षणम् । बहुशः विचिन्त्य पतिगृहे नयनमेव श्रेय इति निश्चिकाय । वासवदत्तां परामर्श्य तया तथैव प्रबन्धो विहितः ।

एकत्रिताः समभूवन् सर्वे जनाः मगधेशः, महादेवी, मन्त्रिणः परिजनाः,

पौरजानपदवर्गश्च पद्मावतीं पतिगृहं प्रेषयितुं राजप्रासादप्राङ्गणे । तूर्यादिवाद्यनिर्घोषैः सह सम्मिश्रितानां हस्तिनां चीत्कारैः घोटकानां ह्रेषाभिः जनानां च कोलाहलध्वनिभिः व्याप्तान्यभूवन् न केवलं राजप्रासादभवनान्यपितु दिगन्तराण्यपि । समदृश्यत सखीभिरालम्बिता पदे-पदे प्रस्खलन्ती पितृगृहवियोगशोकभराक्रान्तचित्ता पतिमिलनसञ्जातौत्सुक्या नवपरिणये स्वस्तिवाचनिकाभिर्गीयमानमङ्गलाचरणा हर्म्यसोपानमार्गेणावतरन्ती वत्सेशेन सह पद्मावती । समागत्य चैव पितुश्चरणयोर्पतन्ती सा मगधेशेन प्रद्योतेनोत्थाप्य गाढमालिङ्गिता वक्षसि पुनः पुनश्च कपोलयोः ललाटदेशे च चुम्बिता । शिरसि च करेण परामृशन् विगलद्वाष्पगद्गदगिराऽवादीन्मगधराजः—

"पितुः भर्तुश्च द्वयोरपि कुलयोः सम्मानरक्षा विधेया ।"

कथमपि पृथग्भूता पितुराश्लेषाद् वत्सराजेन दत्तावलम्बाऽऽरुरोह सा करिणीं नानाविधप्रस्थानकौतुकालङ्कारैर्विभूषिताम् । वत्सेशोऽपि तामन्वारुरोह । प्रतिनिवर्तमाना बभूव सा वरयात्रा पुनरपि कौशाम्ब्यै । वाद्यानां प्रतिध्वनिषु न क्वचिदप्यश्रूयन्त क्रन्दनानि दुहितृवियोगविह्वलस्य मगधेशस्य पतिगृहप्रस्थानपरायाश्च तस्याः पद्मावत्याः ।

यौगन्धरायणेन रुमण्वता वसन्तकेन च नीयमाना सा वरयात्रा मगधदेशमतिक्रम्य विष्णुसूर्यकन्ययोः सङ्गममतिचक्राम । तथा प्रबन्धः कृतस्तेन यौगन्धरायणेन महामन्त्रिणा यथा लावणकग्रामे विश्रामोऽनिवार्योऽभवत् । लावणकग्रामसमीपवर्तिनीं भूमिं प्राप्य भगवन्तं भास्करं च अस्तगिरिमस्तकनिविष्टकरं चावलोक्य प्रकटिता स्वमनोगताऽभिलाषा वत्सेशेन—

"मन्त्रिप्रवर ! दिवं नीताऽत्रैव दैवहतकेन वह्निना सा मे प्रिया अवन्तिराजकन्या । विश्रमेयं कथमप्येकरात्रमपि तस्मिन्नेव स्थाने शिविरं परिकल्प्य ।

यौगन्धरायणादेशेन सेवकैः परिकल्पितेषु पटशिविरेषु तथैव प्रबन्धो विहितः ।

अन्यस्मिन्नहनि अध्यारूढे सवितरि मध्याकाशे रुमण्वता वसन्तकेन च सहोपविशन् पटमण्डपे कथावार्ताभिः मनः रञ्जयति स्म वत्सराजः। परं समलङ्कृतवामभागाऽपि पद्मावती न समर्था बभूवापनेतुं तस्यान्तःनिहितसुगुप्तव्यथां वासवदत्तानिमग्नचित्तस्य। एतस्मिन्नन्तरे द्वारपालेनागत्य सविनयं प्रणम्य निवेदितम्—

"देव ! समागताः दूताः चण्डमहासेनस्योज्जयिनीतः महाराजस्य मङ्गलाशंसनानि प्रकटयितुम्। यथाज्ञाऽऽपयति भवान् तथैव करणीयम्।"

कथं वासवदत्तास्वर्गगमनस्य मम च द्वितीयपरिणयस्य समाचारोऽप्युज्जयिनीं सम्प्राप्त इति चिन्तितेनापि दुःखितेनापि वत्सराजेनानुमतो द्वारपालः सादरमुज्जयिनीसन्देशहरानानयामास। त्रय एवासन् प्रतिनिधयश्चण्डमहासेनस्य--एकस्तु सेनापतिः सालङ्कायनः, द्वितीयोऽन्तःपुरप्रतिहारो रैभ्यः, तृतीया व वासवदत्ताधात्री वसुन्धरा। प्रविश्य ते उदयनसंकेतेन प्रणम्य वत्सेशं यथायोग्यमासनान्यधितस्थुः।

उज्जयिनीतः समागतान् वासवदत्तासम्बन्धिनः समवलोक्य पुनरपि जज्वाल प्रचण्डविरहदावाग्निस्तस्य वराकस्योदयनस्य हृदये। वासवदत्तैव मे सर्वस्वं प्राणभूता, तां विनाऽप्यहमद्य श्वसिमि, प्रणयविलासांश्चोपभोक्तुमन्यया प्रणयिन्या समासक्तचित्तो भवामि, इति संस्मृत्य विगलदश्रुक्लिन्ननयनकपोलः स शशाक न कमपि शब्दमुच्चारयितुं कण्ठेन। संतप्तवाष्पजलैः स विरहाग्निरुज्वलतरो बभूव। कञ्चित्कालं करतलाभ्यां नयने पिधाय वस्त्रप्रान्तेन प्रमृज्याश्रूणि दुःखावेगं च संस्तभ्य सगद्गदगिरा प्रोवाच सालङ्कायनम्—

"सेनापते ! किं कुशली पितृतुल्योऽस्माकं महाराजश्चण्डमहासेनः ? किं सुप्रसन्नाऽस्माकं माता महादेवी अङ्गारवती ? किं कुशलिनौ पालकगोपालकौ ?'

सालङ्कायनः प्रत्युदरत्—"देव ! उज्जयिन्यां सर्व एव कुशलिनः सानन्दाश्च वर्तन्ते। केवलं परं समये-समये तस्या अवन्तिदेशशोभायाः वासवदत्तायाः स्मरन्ति। महाराजश्चण्डमहासेनो महादेवी अङ्गारवती च साशीर्वादमभिव्यनक्तः

स्वस्नेहम् । पालकगोपालकौ च द्वावेव राजकुमारौ प्रणमतो भवन्तं सविनयम् । आगच्छत्येव राजकुमारो गोपालको भवद्दर्शनायाचिरेणैव । महाराजेन महादेव्या च सन्दिष्टो भवान् यदुदयन एव तृतीयः पुत्रोऽस्माकं पालकगोपालकाभ्यां सह । दीर्घावधिर्व्यतीतो न चावलोकनेन तस्य तृप्तान्यावयोश्चक्षूंषि । सोत्कण्ठावावां तस्य सुन्दरोज्ज्वलवदननिःसृताभिः वार्ताभिः तर्पयितुं श्रोत्राणि । आगमनेन प्रसादयतु स अविलम्बमेवोज्जयिनीम् । अतश्च······"

निरुध्यैव तं मध्ये साङ्कलायनमवादीद् विह्वलीभूत उदयनः सगद्गदगिरा—

'सेनापते ! विरम-विरम । नातः परं किमपि कथनीयम् । किमहं योग्योऽस्मि मुखमपि दर्शयितुं तयोरादरणीययोः पित्रोः समक्षम् ? पितृतुल्यस्नेहकारिणोरपि तयोः सुताया अपहरणं मया कृतम्, न च सा रक्षिता । अतोऽप्यधिकं नृशंसत्वं किं भवति, स्वर्गगतायामेव तस्यामत्रैव लावणकग्रामदाहे द्वितीयो विवाहोऽपि विहितो रतिविलासलोलुपेन मया । अतिशयेनापराधवति दण्डनीयेऽपि कथं स्निह्यति अवन्तिमहीपतिः । कथमपि नोत्सहे न च समर्थोऽहं मुखमप्युद्घाटयितुं तस्य समक्षम् ।" इत्युक्त्वा विगलदश्रूणि कथमप्युन्ममार्ज वत्सदेशाधिपः ।

तं तथा विषीदन्तं वत्सेशं सान्त्वयन् सालङ्कायनोऽब्रवीत्—

"देव ! न त्वया कश्चिदपि शोकः करणीयः । जगति प्रथित एव तेऽविनश्वरः स्नेहोऽवन्तिराजकन्यां प्रति । रक्षसि त्वमधुना तं स्नेहं सर्वतो मनसि संव्याप्तम् । उपस्थिते मृत्युकाले कः कं रक्षितुं समर्थः । भवितव्यता भवत्येव । न कश्चिदपि तां वारयितुं समर्थः । कथयति च महादेवी जननी वासवदत्तायास्त्वाम्—

पुत्र ! नाकलोकाधिष्ठितायामपि मे सुतायां जीवति मे पुत्र उदयनः । प्रथममेव मया त्वं जामातृरूपेण वृतः । एतत्प्रयोजनसम्पादनार्थमेव त्वमानीत

उज्जयिनीं बलात्कारपूर्वकं नीलगजव्याजेनापहृत्य । सङ्गीतशिक्षाव्याजेन चार्पिता मया स्वकीया सुता तुभ्यम् । अपहृता च यदि सा त्वया, स्वकीयवस्तुन एवापहरणं कृतं स्वमनसश्चाञ्चल्येन । तदनन्तरं च मया चित्रकरैर्युवयोः प्रतिकृतिः कारयित्वा, चित्रगतावेव शास्त्रोक्तविधिना पाणिग्रहणसंस्कारेण सम्पन्नविवाहौ कृतौ । तदनु च प्रेषितो गोपालकः सर्वसम्भारैः सह कौशाम्बीम् ।

अथ च पुनरपि निवेदयति सा अवन्तिदेशमहादेवी यद् वत्सराजपरिणयनसम्बन्धेन पद्मावत्यपि मे सुता स्नेहपात्री च । वासवदत्तायामिव तस्यामपि स्निह्यति मेऽन्तःकरणम् । समागच्छतु तया सह वत्सेश उज्जयिनीं तथैव, यथा काचित् पुत्री भर्त्रा सह स्वपितुः गृहमागच्छति । प्रेषितं च महादेव्या विवाहसंस्कारसमयसंलक्षकं चित्रमेतत् ।" इत्युक्त्वा विरराम स सेनापतिः सालङ्कायनः ।

एतस्मिन्नन्तरे वासवदत्ताधात्री वसुन्धराऽर्पितवती चित्रमेकं शुक्लपटपरिवेष्टितं प्रणम्य चोदयनाय । "हा वासवदत्ते ! चित्रावशिष्टैव त्वमालोक्यसे मयाद्य" इति विलपन्नुदयन उद्‌घाटयामास चित्रम् । वाष्पजलौघः प्रवहितुमारभत तस्य नयनाभ्याम् । विगतचेतन इव स न कथमपि पारयामासात्मानं संस्तम्भयितुम् । परमौत्सुक्यभरितहृदया पद्मावत्यप्यवलोकयितुं प्रवृत्ता नेत्रकोणेन तं चित्रम् । चित्रगतां कामिनीमेकाग्रचित्तेनावलोकयन्ती सा पप्रच्छ वत्सराजम्—

'आर्यपुत्र ! केयं चित्रगताऽलौकिकसौन्दर्यमण्डिता रमणी ?" उदयनः प्रत्युदतरत्—

'प्रिये ! न त्वया परिचीयते केयं ममाङ्गसङ्गिनी पार्श्वप्रणयिनी ? का भवेदियं वासवदत्ता विना ? परं महदाश्चर्यं मे मनसि समुद्‌भवति, कस्मात्कारणात् त्वमेतादृशी उद्विग्ना प्रसन्ना च दृश्यते चित्रमेतत् समवलोक्य ?"

पद्मावती अवदत्—"आर्यपुत्र ! यथेयमाकृतिरस्मिन् चित्रे देव्या आर्यायाः वासवदत्तायाः संलक्ष्यते, तादृशी कामिन्येका वर्तते मम संरक्षणे, कस्यचिद् ब्राह्मणस्य सुता न्यासरूपेण" ।

पद्मावत्याः संकथनेनैव सस्मारोदयनः सकलानामपि मगधनरेशान्तःपुरस्योदन्तानां वासवदत्तासम्बन्धिनाम् । अत्युत्कण्ठया व्यग्रतया च चानुरुरोध स पद्मावतीं प्रस्तुतीकरणाय तस्याः कामिन्याः ।

पद्मावती निवेदयामास—"आर्यपुत्र ! मम कन्याभावे ब्राह्मणेनैकेन परिव्राजकवेषधारिणा युवत्यैकयाऽनुगम्यमानेन समागत्य प्रार्थिताऽहम् आवन्तिकानाम्नी ममैका सुतेयम्, विवाहिता च स्वल्पसमयपूर्वमेव । प्रव्रजितोऽस्य भर्ता कार्यवशाद् इमां पितृगृहे विसर्ज्य । अहमपि परिव्राजकव्रतमुपपन्नः देशाद्देशं सततं भ्रमामि । रक्षणीयेयं भवत्या यावदहमस्य भर्ता वा न निवर्तते । कथयित्वैवं स्वसुतां समर्प्य मह्यं गतः स परिव्राजकब्राह्मणः । आवन्तिका च सा तदवधि मेऽन्तरङ्गसखीव हृदयसर्वस्वभूतेव वर्तते । समागता च सा मया सहैव । परं परपुरुषमुखदर्शनपरिहरणस्वीकृतव्रता न साऽत्र राजसभायामानेतुं शक्यते । इयमार्या वसुन्धरा स्वयमेवान्तःपुरं प्रविश्य यदि तां परिचिनुयात् तदैव श्रेयः ।"

एवंविधेषु च वार्तालापेषु सत्स्वेव समागत्य निवेदितं द्वारपालेन—

"महाराज ! द्वारि तिष्ठत्यवन्तिराजपुत्रो गोपालको ब्राह्मणेनैकेन सह भवद्दर्शनाभिलाषी ।"

वासवदत्ताभ्रातुः प्रियश्यालकस्य गोपालकस्यागमनसमाचारं श्रुत्वैवोदयनस्य हृदयं सम्भृतं विविधैः भावैर्विचित्ररूपैः । चिन्ता-भय-दुःख-करुणा-ग्लानि-त्रपादयो भावाः समागत्यैकपद एव मथितुं प्रवृत्तास्तस्य हृदयम् । झटित्येवासनादुत्थितो भूत्वा स्वयमेव समागत्य द्वारदेशं गोपालकं च वक्षसि समालिङ्ग्य समानीय

चान्तः स्वाधिष्ठितासनस्यैकदेशे स तमुपवेशयामास। परिव्राजकवेषधारी स ब्राह्मणोऽपि तमनुससार।

चिरकालानन्तरमेव भगिनीपतिश्यालकयोर्मिलनमेतत् सञ्जातमासीत्। चक्षुर्भ्यामिव पिबन्तावन्योन्यं वाष्पजलार्द्राभ्यां नाशक्नुवतामेकमपि शब्दं कण्ठादुच्चारयितुं भावोद्वेगवशात्। कथमपि संयम्य स्वात्मानमवादीद् गोपालकः—

"राजन्! पित्रा मात्रा च विसृष्टोऽहमुज्जयिनीतः समागच्छन्नासं कौशाम्बीम्। परमाकर्ण्य भवन्तं लावणकग्रामस्थितं समागतं मयात्रैव दर्शनाय प्रबलोत्कण्ठाभरितमनसा। भवच्छिविरबाह्यप्रदेशेष्वेव दृष्टोऽसौ ब्राह्मणो मया भवद्दर्शनाभिलाषी कार्यार्थी। अस्य सुता काऽप्यावन्तिकानाम्नी वर्तते न्यासरूपेण मगधराजकन्यायाः पद्मावत्याः संरक्षायाम्। समानीतः स मया भवद्दर्शनाभिलाषी ब्राह्मणः।"

उदयनस्य सङ्केतं लब्ध्वा साशीर्वादं सविनयं च प्रोवाच स ब्राह्मणः—

"राजन्! मगधदेशराजकन्यायै तस्याः कौमार्यभावे समर्पिता मया स्वकीयाऽऽवन्तिकानाम्नी सुता प्रवासाय प्रस्थितेन। प्रवासान्निवृत्तोऽस्याः भर्ताऽभिलषति तां स्वगृहं नेतुम्।"

उदयनस्यानुमतिं परिलक्ष्य समादिष्टा सेविका पद्मावत्याऽऽवन्तिकामानेतुम्। गमिष्यति सा जनकेन सह स्वकीयं चिरकालविरहव्यथादायिनं भर्तारम्। वासवदत्ताऽपि कथमपि समुच्छलद्धृदयान्तर्वर्तिभावान् सन्निरोधयन्ती समायाता तत्र सभामण्डपे दीर्घावगुण्ठनेन च स्वकीयमुखदर्शनं परिहरन्ती तस्थौ। पद्मावती प्रोवाच तं ब्राह्मणम्—

"विप्रवर! समुपस्थितेयं भवतः सुता। नयतु भवानेताम्। प्रियमिलनसुखमनुभवतु चिरप्रवसितभर्तुर्मिलनाकांक्षिणीयम्।"

एतस्मिन्नन्तरे महासेनसुताया इवास्या आकृतिः प्रतीयते इत्यौत्सुक्यविस्मय-

भराभिभूतहृदयया वसुन्धरया समीपमागत्याऽपनीतमवगुण्ठनम् । निर्गतं च पूर्णचन्द्रमिवोज्ज्वलं स्मितालङ्कृतं च वासवदत्ताया मुखमण्डलम् । "वत्से ! वासवदत्ते ! जीवसि त्वमिति" हर्षोद्वेगसमुच्छ्वसितचित्ता वसुन्धरा तामङ्के कृत्वा गाढमालिलिङ्ग ।

"अहो ! किमियमेव देवी वासवदत्ता, जीवति सा, न च दग्धा लावणकग्रामदाहे," इति सम्भ्रमस्तत्र परिव्याप्तो बभूव । चित्रालिखिता इवाभवन् सर्व एव जनाः परमविस्मयाभिभूताः । पद्मावत्युदयनावुभावपि परमविस्मयेनावालोकयतां ताम् । प्रसन्नतापारावारनिमग्नमनाः चिरकालविरहवह्निसन्तप्तसकलमनःप्राणः ग्रीष्मसन्तापपरिशुष्यमाणलताकालजलदजलसंतृप्यमान इव समीपमागत्य स चक्षुर्भ्यामिव पीयमानस्तां बभाषे—

'प्रिये ! जीवसि त्वम् ? पुनर्जन्मैव मेऽद्य सञ्जातम् । क्षमस्व ममापराधम् । अजानतैव मया कृतोऽयमपराधो बाध्यमानेन बहुशो मन्त्रिभिः प्रजारञ्जनवादिभिः । त्वमेव मे हृदयवासिनी सर्वस्वभूता प्राणवल्लभा ।" इत्युक्त्वा तस्याः पाणिमाकृष्येयेष सर्वजनसमक्षमेव तामालिङ्गनबद्धां कर्तुम् ।

अवलोक्य तदद्भुतं दृश्यं तारस्वरेणोवाच स ब्राह्मणो महतोद्वेगेन—

"राजन् ! किमिदं भवता क्रियते महदनर्थं, यत् परकीया कुलवधूरात्मीया क्रियते । जगद्वन्दनीये प्रथिते पाण्डववंशे समुत्पन्नो भवान् । न्यायः सदाचारश्च पालनीय एव । इयं मे पुत्री आवन्तिका नार्हति भवद्विहितमेतादृश व्यवहारम् । उच्चब्राह्मणकुलदीपिकेयम् । प्रतीक्षते चिरप्रवासान्निवृत्तोऽस्याः परिणेता । कथं लक्ष्मीमदान्धकारितनयनो भवान् ईदृशीं कुचेष्टां करोति ? अनुमन्यतां मामेतया सह गृहं गन्तुम् ।"

ब्राह्मणस्यैतानि वचांस्याकर्ण्य किंकर्तव्यविमूढो भूत्वा उदयनो विस्मयक्षो-

भत्रपादुःखादिभिर्भावैश्चक्षुषी विदार्य कदाचिद् वासवदत्तां, कदाचिद् ब्राह्मणं, कदाचित् पद्मावतीं, कदाचिद् गोपालकं, कदाचिदन्यांश्च सर्वानेवोपस्थितान् जनान् प्रेक्षते। सर्वेऽपि निस्तब्धवाचः प्रतीक्षमाणा, बभुवुः धगद्धद्धृदयाः किमग्रे भविष्यतीति। कञ्चन कालं विरम्योदयनः प्रोवाच तं ब्राह्मणं मन्दस्वरेण—

"ब्रह्मन्! किं कथ्यते भवता? इयं तु निःसंशयं मे पत्नी वासवदत्ता वर्ततेऽवन्तिदेशराजकुमारी। पृच्छतु भवानेवैनं गोपालकं, सालङ्कायन वा। वसुन्धरा एव वा कथयतु यस्या उत्सङ्गे क्रीडानिर्भरेयं यौवनं सम्प्राप्ता, केयमिति।"

वत्सराजमनिवेद्यैव ब्राह्मणो गत्वा पद्मावतीसमक्षं करौ संयोज्य प्रोवाच—

"देवि! न्यायस्त्वया कर्तव्यः। प्रत्यर्पितन्यासा भवत्या भाव्यम्। एष एव न्यायः। न केवलमेव राजधर्मः सामाजिकसमुदाचारोऽपि वर्तते। भवत्समक्षमेव राजा लक्ष्मीमदगर्वितः सौन्दर्यपानविलासलालसः परित्यज्य राजधर्मं सामाजिकनियमानां चावहेलनां कृत्वा अपहर्तुमभिलषति मे सुतामसाधारणलावण्यरूपद्धिभूषितां विवाहितामपि। किं कथयिष्याम्यहं तावदेतस्याः परिणेतारम्। भवत्येव मे शरणम्।"

पद्मावत्यपि महतोद्वेगेन सम्भ्रान्ता किंकर्तव्यविमूढा सञ्जाता। सा कदाचिद् भर्तारं, कदाचिद् ब्राह्मणं, कदाचिच्चाऽऽवन्तिकां प्रेक्षते। वत्सराजो जानाति तां स्वप्रियसहचरीं, परं कथमनेन ब्राह्मणेन सा आवन्तिकानाम्नी स्वकीया सुतेति कृत्वा न्यासरूपेण तस्यै समर्पिता। प्रत्यर्पणीय एव न्यासो भवति। इति उद्वेगचिन्ताभारसमाकुलितया तया करतलाभ्यामवगुण्ठ्य नयने निमीलिते।

उदयनस्य पद्मावत्याश्चैतादृशीमवस्थामवर्णनीयामवलोक्य काऽपि स्मितरेखा शोभमाना बभूव तस्य ब्राह्मणपरिव्राजकस्यौष्ठयोः। कथञ्चिदपि निरुद्धहासवेगो गोपालकोऽट्टहासेन जहास। यावन्निरीक्षेते पद्मावत्युदयनौ तं, यौगन्धरायणेन

परित्यक्तः स ब्राह्मणपरिव्राजकवेषः। शिरसि धृतं जटाभारं वदनाच्छादकं च श्मश्रुसमूहमपनीय एकेन पदेनाग्रीभूय विनम्य प्रणमन् स तारस्वरेणाघोषयत्—

"विजयतां वत्सराजः।"

एतस्मिन्नन्तरे वासवदत्तयाऽपि वत्सेशस्य चरणयोः प्रणम्य स्मितशोभमानवदनान्निस्सरन्त्या पीयूषवर्षिण्या मधुरगिरा घोषितम्—

"विजयतामार्यपुत्रः।"

विस्मयाभिभूत उदयनो यावदेव ब्राह्मणरूपिणमवलोकयति यौगन्धरायण तावदेव स पादयोः सन्निपत्य क्षमायाचनपरो बभूव। परं तं कूटनीतिनिपुणं स्वामिभक्तं राज्यसमुन्नतिसंलग्नमनसं समुत्थाप्य वक्षस्यालिङ्ग्य हसन्नाह स महीपतिः—

"सत्यमेव छलितोऽहमनेन दुष्टमन्त्रिणा। यथायोग्यं च दण्डं प्राप्स्यत्येवायम्।"

महदाश्चर्यहर्षभराक्रान्तहृदया पद्मावती इयमावन्तिकैवार्या वासवदत्तेति विज्ञाय तत्क्षणमासनादवतीर्य वासवदत्तामुपगम्य क्लेदयन्ती वाष्पजलैः कपोलौ चरणयोर्निपत्य कथयितुमारेभे—

"आर्ये! अजानतैव मया समुपेक्षितः समुदाचारः। परं क्षन्तव्या भवत्या परमोदारस्वभावया स्वकीयैवानुजेयं पद्मावती।"

वासवदत्ता अश्रुभरार्द्रनयनां करुणं रुदन्तीं पद्मावतीमङ्के गृहीत्वा करेण शिरसि परामृशन्ती सान्त्वयामास—

"पद्मावति! न ते कोऽप्यपराधः। अहमेव अपराधिनी अस्मि यज्जान॰

न्त्याऽपि मया त्वं सपत्नीजन्यदुःखपारावारे निक्षिप्ता। परं त्वं तु मे भगिन्येव। महत्सुखं विगतचिन्तत्वं चाऽनुभूतं मया त्वदन्तिके मगधराजप्रासादान्तःपुरे।

महदानन्दप्रसरणमभूत् तत्र चिरकालविरहसन्तापदह्यमानहृदयानां मिलन-मेघवारिवर्षणसिञ्चितहृदयानाम्। दुःखाश्रवस्तेषामानन्दाश्रुरूपेण परिणताः। प्रियभगिनीमवलोकमवलोकं गोपालकस्य प्रसन्नतापारावारो हृदयतटमुल्लंघ्य क्लेदयति स्म तस्य वपुषं मनः प्राणांश्च। सा वराकी उपेक्षितसकलराजसुखवि-लासा पत्युरेवाभ्युदयाकांक्षिणी चिरं परामृष्टा च शिरसि गोपालकेन। को जनः शक्तः निरोद्धुं मनस उद्वेगमवलोक्य समानस्तनपायिनीमनुजाम्।

विश्रान्तेषु किञ्चित् किञ्चित् चित्तोद्वेगेषु सर्वेषामेव प्रियदर्शनसञ्जातप्रह-र्षाणां जनानां, ग्रहणं कुर्वत्सु च तेषु स्वकीयानामासनानामुदयनो पप्रच्छ यौगन्धरायणम्—

"मन्त्रिवर! किमिदं सर्वं भवत एव कूटनीतिपाशप्रसारणप्रभावः? कथयतु कथयतु कस्मात् कारणाद् विहितमेतच्छलं भवताऽचिन्तनीयमपि मनसा?"

यौगन्धरायणो बद्धाञ्जलिः प्रोवाच—

"देव! न भवान् कदाचिदपि रोषाविष्टो भवतु। वस्तुतः सकलमेव यद् भूतं मया च विधिना च साफल्येन सम्पूरितं तत्सकलं भवतो राज्यस्य चाभ्युद-यायैव। यदि च क्षमार्होऽहं भवता, निवेदयामि सकलमेवोदन्तजातम्।" उदय-नेनानुमतः स पुनरपि बभाषे—

"देव! ज्योतिर्विद्भिराघोषितं, मगधराजकन्यायाः पद्मावत्याः परिणेता नरपतिः सकलमेव भरतखण्डं विजित्य चक्रवर्तिपदभाग् भविष्यति। महादेव्यां वासवदत्तायामतितरामासक्तचित्तो भवान् न कस्यामप्यवस्थायामनुनेतुं शक्यते द्वितीयां कामपि राजकन्यां परिणेतुम्। सपत्नीजन्यपीडावहनाक्षमा मे प्राण-

वल्लभा सुता इति मगधराजोऽपि नाङ्गीचकार पद्मावतीपाणिग्राहणं भवते वासवदत्तानिमग्नमनसे। परं राजकन्या पद्मावती मनस्येवाभिलषति भवते सत्यपि सपत्नीजन्यपीडाभये इति गुप्तचरैर्विदित्वा मया संयोजिता योजना ह्येषा।

परं न भेतव्यमन्यथा वा चिन्तनीयं भवता। न केवलमहमेवापराध्यत्र, महादेवी वासवदत्ता, भवतः श्यालको गोपालकः, सेनापतिः रुमण्वान्, नर्मसचिवो वसन्तकः सर्व एव चात्रापराध्यन्ति। सर्वेषामेव परामर्शेण सुमन्त्रिता, सुविचारिता च सुसम्पादितैषा योजना। उज्जयिनीनरेशस्य चण्डप्रद्योतस्य मगधाधिपस्य प्रद्योतस्याप्यप्रसन्नतायाः नाशंका करणीया। महादेव्याः भ्राता गोपालकः पूर्वमेवास्यां योजनायां सम्मिलित आसीद् भगिन्या च कौशाम्ब्यामाहूतस्तस्मिन् काले। सुतसुखाभिलाषिण एव भवन्ति पितरः। सुताया अभ्युन्नतिं पुत्रस्य चानुमतिं वीक्ष्य न कमपि क्रोधमवाप्स्यति उज्जयिनीनरेशः। पद्मावत्याः मनसोऽभिलाषं विदित्वा दुहितृजामातृवत्सलो मगधेशोऽपि न कथमपि भविष्यत्यप्रसन्न इति निःसंशयमेव भवानवगच्छतु। यद्यपि नावगच्छति स्म राजकुमारी पद्मावती योजनामिमामस्माकं, छलिता चाऽस्माभिः सा ब्राह्मणपरिव्राजकतत्सुतारूपेण छलेन, तथापि वत्सराजाभिलाषिणी सा क्षमयतु मेऽपराधम्।"

उदारहृदया पद्मावती कथयामास—

"मन्त्रिवर! न कश्चिदपि शोको भवता करणीयोऽत्र विषये। यद् भूतं भगवतः कृपया, कल्याणार्थमेव परिणतम्। न शोचन्ते बुद्धिमन्तोऽपगतानि। ते भविष्यदुन्नत्यै च प्रयतन्ते। सर्वदैवानुगताहमार्यपुत्रस्यार्यायाः वासवदत्तायाश्च ज्येष्ठभगिन्याः। एतयोः प्रसन्नतैव मे प्रसन्नता। प्रसन्नीभूतायां च मयि मम पितरावपि प्रसन्नावेव।"

गोपालकोऽप्यवादीत्—

"राजन् ! उज्जयिनीतः प्रस्थितेन निवेदितं मया सकलमेवोदन्तं जनकाय जनन्यै च। सन्तुष्टौ सुप्रसन्नौ च बभूवतुः द्वावपि तौ। किञ्चिद् रोषावेशविवशोऽपि मेऽग्रजः पालको ऽनुनीतः। जानाति मे जनकोऽवन्तीनरेशो महासेनः पद्मावतीमिमां स्वकीयदुहितरमेव सहजाम्। ममापीयमनुजेव स्नेहभाजनभूता। उपहाररूपेण प्रेषितेयं रत्नावली जनन्या पाणिग्रहणसंस्कारावसरेऽस्मिन्नस्यै पद्मावत्यै। इत्युक्त्वा गोपालकेन स्वोत्तरीयवस्त्रग्रन्थिमुन्मुच्य धृतैका रत्नावली चमच्चाकचक्यप्रकाशेनापूरयन्ती पटमण्डपं परमविस्मयकारिणी पद्मावतीकोमलकरकिसलयतले।

वासवदत्ताऽपि स्नेहगर्भगिरा मन्दं-मन्दं स्मयमाना प्रकाशयन्ती च मुखमण्डलमतिशुभ्रदन्तपंक्तिमयूखसम्मिश्रितया मौक्तिकसन्निविष्टविद्रुमराशिपरिगतयेव गिरा सर्वजनसमक्षमुवाच—

"आर्यपुत्र ! न कश्चिदपि खेद आनीतव्यो मनसि भवता। छलेनानेनानुभूता या विरहव्यथा क्रकचविदारणतुल्या, क्षमस्व मामेनं च यौगन्धरायणं महामन्त्रिणं राजभक्तिप्रकाशितहृदयम्। जानाम्यहं भवतोऽकूपारकूपारसमं स्नेहम्। अनुभूतश्च सर्वदा मया सा स्नेहदीपशिखा दीप्यन्ती मेऽन्तःकरणे जीवनधारणहेतुः। सैव मे सौभाग्यं सम्पत्तिश्च। इयं भगिनी मे पद्मावती समानीता मया परमसौभाग्यशालिनी वत्सवंशगौरववर्धिनी सर्वदैव प्रसादनीया भवता।" इत्युक्त्वा तया उदयनचित्राङ्कितं हीरकजटितमङ्गुरीयकमेकं तस्याः पद्मावत्याः कराङ्गुलिप्रणयि कृतम्।

अस्मिन्नेव प्रसङ्गे यौगन्धरायणेनापि सौख्यदायिभिः तत्समयोचितैः वचोभिरभिव्यक्ततां नीताः हृदयनिहितान्तर्गतभावाः—

"देव ! दुःखं परित्यज्य विगतचिन्तो भूत्वा रमयतु भवानेनां मगधराजसुताम्। राजकार्येषु दत्तावधानो भवतु। समागतोऽयं तेऽनुकूलसमयः द्विशो

विजेतुम् । चक्रवर्तिपदभाग् भविष्यति भवानचिरेणैव कालेन । अस्मिन् भरतखण्डे जम्बूद्वीपे द्वावेव प्रबलविरोधिनावास्तां भवतो मार्गनिरोधकशिल इव—उज्जयिनीभूमिपतिश्चण्डमहासेनो मगधेशश्च प्रद्योतः । प्राणेभ्योऽपि बल्लभयोः सुतयोः परिणेतुर्विरोधं न कदाचिदपि भवनीयं भवेत् ताभ्याम् ।"

अतिशयाह्लादजनकैरेतैः प्रसङ्गैरतितरां प्रफुल्लितमभवद् हृदयपुण्डरीकं वत्सराजस्य । प्रवृद्धिं गतश्च वासवदत्तायै तस्यादरः स्नेहश्च । विश्वस्ततममादरभाजनं यौगन्धरायणं स हृदयाभिन्नमेव मेने । कंचित्कालं यावत् ते सर्वे लावणकग्रामनिवासमेव बहु मन्यमानाः प्रमोदहर्षनिर्भराः सन्तोऽतिष्ठन् । विहिताः सर्वे याचका अदरिद्राः दानिनश्चोदारस्वभावेनोदयनेन । पुरस्कृताः सर्वे सेवकाः परिजनाश्च विविधैरमूल्यैरुपहारैः । कतिपयदिवसानन्तरं वासवदत्ताभ्राता गोपालकः सपरिजनः प्रतिनिवृत्तोऽनुमतिं लब्ध्वा वत्सराजस्य स्वजन्मभूमिमुज्जयिनीम् ।

एकस्मिन् दिवसे यौगन्धरायण एकाकिनमुपलभ्य वत्सराजं प्राह—

"देव ! गन्तव्यमिदानीमस्माभिः कौशाम्बीम् । प्रमोदनिर्भराणामस्माकमत्र निमग्नानामानन्दोत्सवेषु दीर्घावधिर्व्यतीतः । प्रतीक्षन्ते प्रजाजनाः महादेवीवासवदत्ताविदितवृत्तान्ताः हृदयेष्वानन्दममन्दमुद्वहन्तो भवन्तम् । स्वागतसमुत्सुकाः सन्ति सर्वे वासवदत्तापद्मावतीदर्शनाभिलाषिणः ।

अपरतश्च दिशो विजित्य सकलाश्चक्रवर्तिसम्राडेव भवान् भविष्यतीति लक्ष्यमुद्दिश्य मया प्रयासाः सर्वे विहिताः । सर्वासु दिक्षु सर्वेषु देशेषु चास्माकं चाराः प्रचरन्ति । तत्रत्यांश्च समाचारान् प्रेषयन्ति । विदितं मया चारमुखेभ्यो यदुज्जयिनीनरेशश्चण्डमहासेनो मगधाधिपः प्रद्योतश्च विरोधभावं परित्यज्यानुकूल्यं भजन्तौ स्वकीयायां प्रियजामातरि स्निह्यत एव । साम-दान-भेदप्रयोगैः

बहवो राजानः स्वयमेव भवदाधीनतां स्वीकुर्वन्तस्ते स्वागतं करिष्यन्ति। अन्ये च बाहुपराक्रममदोन्मत्ताः दण्डेनैव वशं नेया" इति।

नीतिगर्भितान्यभ्युदयकारीण्येतानि वचांस्याकर्ण्य महामन्त्रिणो यौगन्धरायणस्य प्रसादेनोत्साहेन च सम्भृतमभूदुदयनस्य हृदयम्। अनुमेने च स कौशाम्बीप्रस्थानम्। सज्जीभूताः सर्वे परिजनाः सचिवाः सैनिकाश्च प्रातिष्ठन् गृहगमनोत्सुकाः। सकलेऽप्यस्मिन् जनसमुदये महती सुव्यवस्था कृता यौगन्धरायणेन। सर्वेषामग्रतः राजकीयध्वजधारिणोऽश्वारूढाः वत्सराजस्याङ्गरक्षकाः सैनिकाः सन्ति। तदनु विविधान् वाद्यान् वादयन्तो वाद्यवादकाः प्रचलन्ति। तदनु उभयतो राज्ञीभ्यां वासवदत्तापद्मावतीभ्यां समवेतो वत्सराजो हस्तिपृष्ठमारूढः संलक्ष्यते। तदनु हस्त्यारूढा एव मन्त्रिणः पौरजानपदमुख्याश्च प्रचलन्ति। तदनु पदातिसेना, रथसेना, अश्वसेना च क्रमेण संस्थापिता प्रसरति। मन्दगत्येयं यात्रा सम्प्राप्ता अचिरेणैव कालेन कौशाम्बीद्वारम्।

महादेवी जीवति। उदयनेन वत्सराजेन कृतो द्वितीयोऽपि परिणयः। समागच्छति स द्वाभ्यामेव राज्ञीभ्यां सह कौशाम्बीमिति समाचारेण प्रमोदनिर्भराः बभूवुः सर्वे नागरिकाः। सकला सा राजधानी विहितप्रसाधना शुशुभे दीर्घप्रवासनिवृत्तभर्तृस्वागताय समुत्सुका वधूरिव। राजपथेषु, महापथेषु, विपणिषु वीथिष्वपि च सर्वत्र तोरणसुशोभितेषु निर्मितेषु द्वारेषु लम्बमाना आसंस्तत्र सूत्रग्रथितसुरभितविविधवर्णकुसुमकिसलयवन्दनवारिका इन्द्रधनूंषीव संख्यातीतानि प्रकटयन्त्यो मन्दमारुतान्दोल्यमानाः। अतिशुभ्रसुधावलिप्तानि राजपथोभयपार्श्वशोभमानानि हर्म्याणि प्रकटयन्ति स्म प्रबलप्रवाहमिव हर्षोल्लासस्य हेमशृङ्गोच्छ्रितैः निवारितसूर्यालोकैः शुभ्ररक्तध्वजैरसंख्यैः। राजपथेन व्रजन्तं सलक्ष्मीसरस्वतीकं चक्रधरमिव वासवदत्तापद्मावत्यलङ्कृतोभयपार्श्वमुदयनमवलोकयितुं क्षणमपि लभ्येतेति त्यक्त्वाऽन्यकार्याः पौरजानपदाः समवेताः

बभूवुः । तदालोकनोत्कण्ठाभरितहृदयाभिः परित्यक्तविविधप्रसाधनालङ्काराभिः ससम्भ्रमं भवनवलभीगवाक्षवातायनसंनिकर्षं व्रजन्तीभिः पौराङ्गनाभिर्निहित-सकलेन्द्रियवृत्तिदृष्टिभिरापिबन्तीभिरिव हृदयप्रीतिकरं तं सकलजनरञ्जनं नृपं बभूवुस्तानि हर्म्याणि समुदितासंख्यचन्द्रमण्डलानीव सहस्रपत्राभरणानीव च ।

कृतार्थोऽयमभवद् राजा सकलभुवनसौन्दर्यसारसमुदायमिव सञ्चयन्तीभ्यां मगधावन्तीराजसुताभ्यां परिगत इति श्रोत्रसुखकथाकथनसंलग्नानां पौरवधूनां कोमलविटपानुकारिभिः करैः विप्रकीर्णैरक्षतैः कुसुमैश्च समाकीर्णे राजपथे शनैः शनैः प्रसरंस्तस्योदयनस्य वाहनभूतो वारणः समाससाद राजभवनद्वारम् ।

पूर्वमेव तत्रोपस्थितैः सामन्तराजभिः मन्त्रिभिः प्रमुखैरधिकारिवर्गैः सम्भ्रान्तपौरजनैश्च स्वागतीक्रियमाणोऽन्तःपुरवर्तिनीभिः मङ्गलसंविधानकुशलाभिः वृद्धाभिरुद्भासितमङ्गलसंविधः प्रविवेश स राजसभाभवनम् । अङ्गीचकार च तत्र स महार्हसिंहासनसंस्थितः महार्घरत्नदुकूलयुग्मादिसंमिश्रितान् विविधानुपहारान् स्नेहभक्तिसंसिक्तान् नरनारीजनेभ्यः ।

यथोचितं च तदनन्तरं पारितोषिकादिभिः सम्मान्य सकलमेव राजप्रजावर्गं सन्तोष्य च दानादिना याचकवर्गं विवेशान्तःपुरं वासवदत्तापद्मावतीभ्यां सह । अनेकदिवसं यावदानन्दोत्सवनिर्भरैर्नागरिकैर्विविधप्रमोदक्रीडासु नरपतिनोदयनेन च विविधललितनवविलासेषु सुखमनुभूयते ।

——:o:——